Diploma In Sanskrit
Paper - III, Part - C

# TARKASAṄGRAHAḤ

*( Mūlamātram)*

**Directorate of Distance Education**

Rashtriya Sanskrit Vidyapeetha
***Accredited at A level by NAAC***
Tirupati - 517 507 (A.P.)

# UNIT-I
# तर्कसङ्ग्रहः- परिचयः

## संरचना

१.०. परिचयः
१.१. लक्ष्याणि
१.२. तर्कसङ्ग्रहः- परिचयः
१.२.१.तर्कसङ्ग्रहः- अन्नंभट्टः
१.२.२.तर्कसङ्ग्रहः- नामवैशिष्ट्यम्
१.२.३. तर्कसङ्ग्रहः- स्वरूपपरचयः
१.२.४.तर्कसङ्ग्रहः- ग्रन्थवैशिष्ट्यम्
१.३.उपसंहारः
१.४.अभ्यासः

## १.०. परिचयः

मानवः बुद्धिजीवः। अनादिकालतः तस्य जिज्ञासा अधिका।तेन 'कुतोऽहम्-कस्मात् अहम्' इति जिज्ञासा मनवबुद्धौ प्रकृत्या उदेति। तस्य समाधाननिर्धारणक्रमे दर्शनानाम् उद्भवः जातः। वैदिकसाहित्यं विश्वस्य आद्य- तमम्। वैदिककाले एव दार्शनिकचिन्तनधारा प्रवृत्ता। तस्याः एव विकासरूपेण उपनिषदः जाताः। तासाम् एव अध्ययनक्रमे गच्छता कालेन षट् आस्तिकदर्शनानि,त्रीणि नास्तिकदर्शनानि च आविर्भूतानि। तत्र वेदान्त- मीमासा-सांख्य-योग-न्याय-वैशेषिकाणि षट् आस्तिकदर्शनानि। चार्वाक-जैन-बैद्धानि त्रीणि नास्तिकदर्शनानि। आस्तिक-नास्तिकविभजनं वेदानां प्रमाण्यम् आधारीकृत्य प्रवृत्तम्।प्रतिपाद्यमानं सिद्धन्तसारूप्यं मनसि निधाय दार्शनिकाः आस्तिकदर्शनेषु वर्गत्रयं कल्पितवन्तः। तत्र वेदान्त-मीमासयोः एकः वर्गः। सांख्य-योगयोः अपरः वर्गः ,न्याय-वैशेषिकयोः तृतीयः वर्गः। न्यायवैशेषिकौ समानतन्त्रत्वेन स्वीक्रियेते। न्यायदर्शनं प्रमाणादिषोडशपदार्थान् निरूपयति।वैशेषिकं तु द्रव्यादिसप्तपदार्थान् निरूपयति। तथापि विश्लिष्यमाणे प्रमाणादिषोडशानां वा, द्रव्यादि- सप्तानां वा पदार्थानां निरूपणे परस्परं कोऽपि विरोधः नास्ति। विभागकल्पने तर-तमभेदः एव सः। एवं न्याय- वैशेषिकयोः प्रतिपाद्यमानानाम् अंशानां सुखेन बालानां परिचयाय अवतीर्णः अयं ग्रन्थराजः।

## १.१. लक्ष्याणि

अत्र तर्कसङ्ग्रहे न्यायदर्शनतः प्रमाणविचारणं वैशेषिकतः पदार्थविचारणं च प्रवृत्तम्।तत्र पदार्थः नाम कः? पदार्थाः कति? द्रव्याणि कानि? गुणाः के? कर्म नाम किम्? सामान्यशब्देन कः उच्यते? विशेषः कीदृशः? समवायः कथम्भूतः? अभावप्रकाराः के? प्रमाणविचारः कुत्र अवतरितः? प्रमाणं नाम किम्? तत् कति विधम्? इति एते विषयाः ज्ञातव्याः सन्ति। तेषां स्वरूप-स्वभावादिकं सप्रपञ्चं निरूपितम्। एतादृशः महत्त्वपूर्णः विषयः लघुकाये केन ग्रन्थस्थीकृतः? अस्य रचयिता कः? तस्य जीवनविधानं किम्? विषयः कथं , नाम कया प्रणाल्या ग्रन्थस्थीकृतः? इत्येतद्विषयज्ञापनाय उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन—

- दर्शनोत्पत्तिक्रमम् अवगन्तुं पारयति।
- आस्तिक-नास्तिकदर्शनविभागं प्रति अवगाहनाम् अधिगच्छति।
- ग्रन्थकर्तुः परिचयं प्राप्तुं पारयति।
- तर्कसङ्ग्रहस्य स्वरूपम् अधिगच्छति।
- तर्कसङ्ग्रहस्य वैशिष्ट्यटं लिखितुं समर्थो भवति।

## १.२. तर्कसङ्ग्रहः- परिचयः

### १.२.१.तर्कसङ्ग्रहः- अन्नंभट्टः

तर्कसङ्ग्रहस्य रचयिता अन्नंभट्टः आन्ध्रदेशीयः। अर्काट्(चित्तूर् )नगरवासी। एते पण्डितवरेण्यानां श्रीराघवसोमयाजीनां वंशजः, श्रीमतः तिरुमलाचार्यस्य पुत्रः। अयं मल्लिनाथात्पूर्वः।भट्टोजीदीक्षितात् परः १६ शताब्दस्य उत्तरार्थे, १७शताब्दस्य पूर्वार्थे वा आसीत् इति ज्ञायते। कञ्च अयं काञ्चीनगरपालकस्य त्रिभुवनतिलकस्य उल्लेखं कृतवान्। एते च सुखेन जीवितं यापितवन्तः। कदापि यं कमपि राजानं नाश्रितवान्, नापि याचितवान्।अस्य ज्येष्ठभ्राता रामकृष्णभट्टः। अयं सिद्धान्तकौमुद्याः सिद्धान्तरत्नाकरः इति व्याख्यां प्रणीतवान्।

**अन्नंभट्टस्य विद्याभ्यासः**- अयं द्वादशवर्षाणि यावत् कौण्डिन्यपुरे (कोण्डवीडु) पाठशालायां स्थित्वा न्यायशास्त्र-अध्ययनं कृतवान्। अयं बाल्ये एव शेषवीरेश्वरस्य सकाशे न्यायं वैशेषिकं च अधीत्य प्रौढं पाण्डित्यं सम्पादितवान्। उदयनाचार्य-कृतन्यायपरिशिष्टस्य न्यायपरिशिष्टप्रकाशनाम्ना व्याख्यां प्रणीतवान्। अन्नंभट्टः सप्त-दशशततमे वर्षे काशीं गत्वा ,स्वीयपाण्डित्येन समस्तं विद्वन्मण्डलं क्षुब्धं कृतवान्।

**१.२.२.तर्कसङ्ग्रहः- नामवैशिष्ट्यम्**

तर्क्यन्तेउविचार्यन्ते,विभज्य प्रदर्श्यन्ते, इति तर्काः पदार्थाः इति 'तर्क'पदस्य व्युत्पत्तिः। 'तर्क'पदेन पदार्थाः बोध्यन्ते। सम्पूर्वक'ग्रह'धातोः अच् प्रत्यये कृते निष्पन्नः सङ्ग्रहशब्दः। सम् इत्यस्य सङ्क्षेपेण इति, ग्रह इत्यस्य बोधनम्, इति च अर्थः। आहत्य तर्कानाम्उ पदार्थानां, सङ्ग्रहउ सङ्क्षेपेण बोधनम् इत्यर्थं मनसि निधाय तर्कसङ्ग्रह इति नाम कृतम् ।

**१.२.३. तर्कसङ्ग्रहः- स्वरूपपरचयः**

तर्कसङ्ग्रहे च पदार्थाः द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय- अभावाः इति सप्तधा परिगणिताः। तेषां सामान्यलक्षणानि च कथितानि। पृथिवी, अप्, तेजो,वायु,आकाश,काल,दिक्,आत्म,मनांसि,नव द्रव्याणि प्रोक्तानि। तेषां स्वभावः विभागश्च निरूपितः।चतुर्विंशतिगुणाः, पञ्चकर्माणि,सामान्य,विशेष-समवाय-अभावाः च निरूपिताः। बुद्धिविभागः अपि प्रपञ्चितः।स्मृति- अनुभवात्मकं बुद्धेः द्वैविध्यं दर्शितम्। अनुभवस्य विभागद्वयम्, तत्रापि यथार्थस्य प्रत्यक्ष-अनुमिति- उपमिति- शाब्दभेदाः अयथार्थस्य संशय-विपर्यय-तर्कभेदाः च विश्लेषिताः। करणस्य लक्षणम् उक्तम्। कार्यस्य लक्षणम् दर्शितम्। करणस्य लक्षणम्, तस्य त्रयः भेदाश्च च विवृताः उदाहृताः च।

प्रत्यक्षप्रमाणम्;अत्र च षट् इन्द्रियार्थसन्निकर्षाःससूक्ष्मं प्रदर्शिताः।तज्जन्यं ज्ञानं प्रत्यक्षम् इति, तदसाधा- रणकारणं प्रत्यक्षप्रमाणम् इति च निरूपितम्। अनुमानप्रमाणम्;अत्र च अनुमानप्रमाणस्य चर्चा प्रचलति। व्याप्ति- परामर्श- पक्षधर्मतादीनां,पक्ष-सपक्ष-विपक्षादीनां लक्षणानि प्रदर्शितानि।स्वार्थानुमानम् परर्थानुमानम् इति अनुमानस्य द्वैविध्यं च प्रतिपादितम्। हेत्वाभासाश्च सोदाहरणं निरूपिताः। उपमानप्रमाणं च विवृतम्। शब्दप्रमाणम्; शब्दस्य, वाक्यस्य,पदस्य च लक्षणानि उक्तानि। वाक्यार्थज्ञानहेतवः विवृताः। वाक्यस्य द्वैविध्यं च प्रदर्शितम्।

**१.२.४.तर्कसङ्ग्रहः- ग्रन्थवैशिष्ट्यम्**

तर्कसङ्ग्रहः प्रकरणग्रन्थः अस्ति। न्यायदर्शनं वैशेषिकदर्शनं च समानतन्त्रे। एतत् दर्शनद्वयम् आश्रित्य अयं लघुग्रन्थः आविर्भूतः। समानतन्त्रे आश्रित्य आविर्भूतस्य ग्रन्थस्यैव प्रकरणग्रन्थः इति व्यवहारः। अत्र विषयस्य विचारणे एकस्य प्राधान्यं, अपरस्य अप्राधान्यम्,अन्यत्र अपरस्य प्राधान्येन, अन्यस्य अप्राधान्येन च विषयसमावेशः

भवति। अयम् अत्यन्तं लघुकायः तथापि न्याय-वैशेषिकशास्त्रविषयप्रतिपादकः प्रामाणिकग्रन्थः प्रकरणग्रन्थः। अस्य लघुग्रन्थस्य दीपिका नाम्ना ग्रन्थकर्ता एव स्वयं व्याख्यां लिखितवान्।गोवर्धनाचार्यः न्यायबोधिनीव्याख्याम्, नीलकण्ठदीक्षितः नीलकण्ठीव्याख्याम्, चन्द्रजयसिंहः पदकृत्यटीकां प्रणीतवान्।अस्य चतुर्विंशतिव्याख्याः जाताः इत्ययमेव अस्य वैशिष्ट्यं ख्यापयति।अयं च ग्रन्थः सरलवाक्यैः पदार्थानां स्वभावं निरूपयति। बालानां च सुखबोधाय भवति।

**स्वावलोकनप्रश्नाः**

१).तर्कसङ्ग्रहस्य रचयिता कः ?

२).तर्कसङ्ग्रहस्य वैशिष्ट्यम किम् ?

३).प्रमाणानि कति ?

४).तर्कसङ्ग्रहस्य रचना शैली कीदृशी ?

५).तर्कसङ्ग्रहस्य विषयप्रतिपादना रीतिः कीदृशी ?

## १.३.उपसंहारः

एवमत्र मानवीयचिन्तनधारा वर्णिता।दर्शनानाम् आविर्भावक्रमः दर्शितः,समानतन्त्राणां वर्गीकरणं तर्कसङ्ग्र- हस्य कर्तुः तस्य कुटुम्बनेपथ्यम्, तस्य विद्याभ्यासं च प्रस्तावितम्। तर्कसङ्ग्रहस्य विषयप्रतिपादनस्वरूपं च प्रदर्शितम्।

## १.४.अभ्यासः

- तर्कसङ्ग्रहस्य स्वरूपं विशदयत ?
- तर्कसङ्ग्रहस्य वैशिष्ट्यं प्रतिपादयत ?

* * *

# UNIT-II
# पदार्थाः

## संरचना


२.०. परिचयः

२.१. लक्ष्याणि

२.२. ग्रन्थप्रारम्भः > मङ्गलाचरणम्

 २.२.१. ग्रन्थप्रारम्भः > अनुबन्धचतुष्टयम् > विषयनिर्देशनम्

२.३. पदार्थाः

 २.३.१.पदार्थाः > निर्वचनम्

 २.३.२.पदार्थाः > परिगणनम्

 २.३.३.पदार्थाः > प्रत्येकं लक्षणानि

  २.३.३.१.पदार्थाः > द्रव्याणि (Substance)

  २.३.३.२.पदार्थाः > गुणाः (Quality)

  २.३.३.३.पदार्थाः > कर्म (Action)

  २.३.३.४.पदार्थाः > सामान्यम् (Genus)

  २.३.३.५.पदार्थाः > विशेषाः (Difference)

  २.३.३.६.पदार्थाः > समवायः (Co-inherence)

  २.३.३.७.पदार्थाः > अभावाः (Non-existence)

२.३.उपसंहारः

२.४.अभ्यासः


## २.०. परिचयः

तर्क्यन्ते उविचार्यन्ते इति तर्काः नाम पदार्थाः। मानवस्य जीवनम् अधिकाधिकम् प्रकृतौ आधारितम्। प्रकृतिश्च भौतिकी बौद्धिकी च। यतश्च मानवः भौतिकं बौद्धिकं च जीवनं यापयति ततः अयम् अवश्यं तत्परिज्ञानवान् भवेत्। प्रकृत्यात्मकम् इदं जगत् स्थूलतः कतिपयान् सामान्यधर्मान् आधारीकृत्य इति पदार्थरूपेण विभजते।

## २.१. लक्ष्याणि

विश्वं गमनशीलम्। गमनं च परिणामकारकम्। परिणामं च विश्ववस्तु स्वभावाधीनम्। स्वभावं च पुरस्कृत्य विश्वस्य वस्तूनि सर्वाणि प्रविभक्तानि। विभागश्च सर्वदा सामान्यधर्मं पुरस्कृत्य प्रवर्तते।विश्वस्य वस्तुजातं एकैकम् अपि कतिपयान् सामान्यधर्मान् वहति। के च ते सामान्यधर्माः ? ते सामान्यधर्माः कथं वस्तुविभाग कारकाः भवन्ति इत्येवमंशाः अत्र दिङ्मात्रं निर्दिश्यन्ते। तदर्थं प्रवृत्तः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन—

- पदार्थस्वरूपम् अवगन्तुं पारयति।
- पदार्थविभागं प्रति अवगाहनाम् अधिगच्छति।
- द्रव्यस्वरूपं , द्रव्यविभागं च पठितुं पारयति।
- गुणस्वरूपं प्रति,गुणविभागम् प्रति च अवगाहनाम् अधिगच्छति।
- सामान्यस्वरूपं परिचितं भवति,विशेषस्य समवायस्य च लक्षणं लिखितुं समर्थो भवति।
- अभावस्य विभागं ज्ञातुं समर्थो भवति।

## २.२. ग्रन्थप्रारम्भः- मङ्गलाचरणम्

लोके शुभकार्यस्य आरम्भे भगवतः स्मरणम् आचारपरम्परायाम् अस्ति। ग्रन्थरचनं अपि विश्वस्य श्रेयस्साधकं कर्म भवति। अतः ग्रन्थस्य विर्विघ्नपरिसमाप्तिम् अभिलष्य, शिष्टाः= आस्तिकाः, ग्रन्थस्य आरम्भे देवतादेः प्रार्थनारूपं वा, गुरोः वन्दनरूपं वा , मङ्गलम् आचरन्ति।एवंविधं मङ्गलस्य आचरणं, गुरुभिः ग्रन्थादौ मङ्गलं कृतम्, अस्माभिः अपि मङ्गलं कर्तव्यम् इत्येवं शिष्याणां शिक्षणाय च कल्पते । शिष्याः अपि मङ्गलम् अनुतिष्ठन्ति। क्रमशः एषः, सम्प्रदायः सञ्जातः। तत्र मङ्गलं त्रिप्रकारकम् १.आशीर्वादात्मकम् २.नमस्कारात्मकम् ३.वस्तु-निर्देशा-त्मकं चेति। प्रकृते अत्र तर्कसङ्ग्रह नाम्ना पदार्थविश्लेषणात्मकं वस्तु निर्दिष्टम् अस्ति। तथाहि-

**मङ्गलश्लोकः**

निधाय हृदि विश्वेशम्, विधाय गुरुवन्दनम्।
बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः।।

**श्लोकस्य अर्थः**

विश्वेशम्,(विश्वस्य ईशः,तम्) विश्वस्य =जगतः, ईशम् =प्रभुम्, परमेश्वरम्, हृदि =मनसि, निधाय =नितरां स्थापयित्वा,गुरुवन्दनम्,(गुरोः वन्दनम्)गुरोः =ज्ञानप्रदातुः, वन्दनम् =नमस्कारम्,विधाय =कृत्वा, बालानाम् =न्यायशास्त्रम् अध्येतुम् मनःकृतवताम्, सुखबोधाय,सुख=सुलभतया, अनायासेन, बोधायउपदार्थानां तत्त्वस्य अवगमनाय, तर्कसङ्ग्रहः =तर्कसङ्ग्रहाख्यः ग्रन्थः, क्रियते उरच्यते।

**श्लोकस्य भावः**

श्रीविश्वनाथं हृदये संस्थाप्यउध्यात्वा,गुरुभ्यश्च नमस्कारं कृत्वा, बालाः जटिलान् अपि तर्कशास्त्रविषयान् सुलभतया सम्यक् जानीयुः इति आशयेन अन्नंभट्टः अहं तर्कसङ्ग्रहनामाकं ग्रन्थं कर्तुम् उद्युक्तः भवामीति भावः।

### २.२.१. ग्रन्थप्रारम्भः- अनुबन्धचतुष्टयम्- विषयनिर्देशनम्

श्रोतृप्रवृत्तये, ग्रन्थादौ अनुबन्धचतुष्टयं वक्तव्यम्। १).विषयः, २).प्रयोजनम्, ३).सम्बन्धः, ४).अधिकारी,इति इमानि चत्वारि मिलित्वा अनुबन्धचतुष्टयं भवन्ति। अत्र श्लोके विषयः, प्रयोजनम्, सम्बन्धः, अधिकारी, इति अनुबन्धचतुष्टयम् अपि सूचितम्। तर्क्यन्तेउ प्रतिपाद्यन्ते इति व्युत्पत्त्या, द्रव्यादिपदार्थः अस्य ग्रन्थस्य प्रधानतया प्रतिपाद्यमानः विषयः। सुखबोधाय इत्यनेन द्रव्यादिपदार्थज्ञानस्य अनायासेन अवगमनम् अस्य ग्रन्थस्य प्रयोजनम्। द्रव्यादिपदार्थस्य अस्य ग्रन्थस्य च प्रतिपाद्य-प्रतिपादकभावः सम्बन्धः। बालः= अनधीतन्याय- शास्त्रः, एतद्ग्रन्थस्य अध्ययने अधिकारी।

## २.३. पदार्थाः

### २.३.१. पदार्थाः -निर्वचनम्

पदस्य अर्थः=पदार्थः इति पदार्थपदस्य विग्रहः। पदेन बोध्यः अर्थः= वस्तुजातम् इत्यर्थः। सुबन्तं तिङन्तं च पदसञ्ज्ञकं भवति इति वैयाकरणानाम् अभिप्रायः। शक्तं पदम् इति नैयायिकानां सिद्धान्तः। जगति प्रतिवस्तु पदेनैव अभिधेयं भवति। पदप्रयोगं विना अर्थः नैव बुद्ध्यारूढो भवति। अप्रत्यायकः =अर्थं बुद्ध्यारूढम् अकुर्वन् शब्दः अपि न विद्यते। एवं शब्दार्थौ परस्परम् अविहाय एव बोधनाय प्रवर्तेते। अतः शब्दार्थयोः सम्बन्धः नित्यः। एवं सर्वः अपि विषयः शब्देन= पदेन

अभिधेय एव भवति। एवं यः अर्थः वा , यः विषयः वा पदैः=शब्दैः बोध्यते, अथवा पदैः समर्प्यते वा , अथवा बुद्धौ उपस्थाप्यते सः सः अर्थः वा,सः सः विषयः वा सर्वः अपि पदार्थशब्देन उच्यते। 'न सोऽस्ति प्रत्ययः लोके यः शब्दानुगमात् ऋते' इति वचनम् सर्वस्य अपि पदबोध्यत्वं द्रढयति। एवं पदार्थशब्देन तत्सर्वं गृह्यते यत्किञ्चित् इह शब्दैः अभिव्यज्यते। पदानि च निखिलसृष्टिगतं तद्बहिर्भूतं च तत्त्वं बोधयन्ति। अतः पदार्थशब्दः विश्वस्य यावद्-वस्तु बोधकः भवति। तथा च निखिलं सृष्टिगतं विश्वस्य वस्तुजातम् एव पदार्थशब्दस्य अर्थः भवति।

### २.३.२. पदार्थाः ऊ परिगणनम्

**(मूलम्)** द्रव्य-गुण-कर्म-सामान्य-विशेष-समवाय-अभावाः सप्त पदार्थाः।

**(विवरणम्)** इदं वाक्यं पदार्थस्वरूपं,पदार्थानां विभागं च निरूपयति। पदस्य (पदैः) अभिधेयाः अर्थाः पदार्थाः भवन्ति। पदस्य (पदैः) बोध्याः अर्थाः इति पदार्थपदस्य अर्थः।एवं पदार्थशब्दः एव, पदस्य बोध्यत्वं वा,पदस्य अभिधेयत्वं वा पदार्थस्य लक्षणं भवति इति सूचयति । एते च पदार्थाः १).द्रव्याणि, २).गुणाः, ३).कर्म, ४).सामान्यम्, ५).विशेषाः, ६).समवायः ७).अभावः च इति सप्तधा विभक्ताः सन्ति। एतत् सप्तातिरिक्ततया पदार्थाः नैव सन्ति। यदि वा सन्ति इति यैः कैश्चित् भाव्यते, तर्हि ते अपि उक्तेषु एव सप्तसु अन्तर्भवन्ति। अतः सप्तभ्यः अतिरिक्ततया पदार्थाः नैव अङ्गीकर्तव्याः इति नैयायिकानां सिद्धान्तः।

**स्वावलोकनप्रश्नाः**

१).पदार्थः कः ?

२) .पदार्थाः कति ?

### २.३.२.१. पदार्थाः > द्रव्याणि (Substance) > परिगणनम्

**(मूलम्)** तत्र द्रव्याणि-पृथिवी-अप्-तेजो-वायु-आकाश-काल-दिक्-आत्म-मनांसि, नव (९) एव।

**(विवरणम्)** इदं वाक्यं द्रव्यस्य स्वरूपं , द्रव्यस्य विभागं च प्रतिपादयति। द्रु-गतौ इत्यस्मात् धातोः,द्रव्यम् इति पदं निष्पन्नम्। द्रव्यं नाम प्राप्यम् इत्यर्थः। उपरि पदार्थानां परिगणनवाक्यं पठितं खलु। तत्र (द्रव्य)अनन्तरवर्तिनः गुणादयः केचन

पदार्थाः सन्ति, तेषाम् आश्रयत्वेन यत् प्राप्यं वर्तते , तत् , द्रव्यं भवति। यः धरति, यः वहति वा सः आधारः (Container) इति उच्यते। द्रव्याणि सर्वाणि, स्वेतराणां पदार्थानाम् आश्रयाणि भवन्ति। प्रधानतः= स्पष्टतः, गुणानां क्रियाणां च आश्रयभूतानि इमानि द्रव्याणि। अत एव गुणाश्रयत्वम्, क्रियाश्रयत्वं वा द्रव्यस्य सामान्यलक्षणं भवति। एतानि च - १).पृथिवी, २).अप्, ३).तेजः, ४).वायुः, ५).आकाशम्, ६).कालः, ७).दिक्, ८).आत्मा, ९).मनः , इति द्रव्याणि नवधा विभक्तानि सन्ति। एतत् नव-अतिरिक्ततया द्रव्याणि नैव सन्ति। यदि वा सन्ति इति यैः कैश्चित् भाव्यते, तर्हि ते अपि उक्तेषु एव नवसु अन्तर्भवन्ति इति मूलवाक्यस्य अर्थः।

**स्वावलोकनप्रश्नाः**

१).द्रव्यस्य सामान्यलक्षणं किम् ?

२) .द्रव्याणि कति ?

३) .द्रव्याणि कानि ?

### २.३.२.२.पदार्थाः > गुणाः (Quality) > परिगणनम्

**(मूलम्)** रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्म-अधर्म-संस्काराः इति चतुर्विंशतिः गुणाः।

**(विवरणम्)** इयं पंक्तिः, गुणानां स्वरूपम्, गुणानां विभजनं च वर्णयति। गुणाः सर्वे आधेयाः भवन्ति। यः धार्यते सः आधेयः भवति। यः आश्रित्यउआश्रयं प्राप्य, तिष्ठति स आधेयः (Content) भवति। गुणाः सर्वे अपि सर्वदा यत् किञ्चिद् आश्रित्यैवउआश्रयं प्राप्य एव, तिष्ठन्ति। रूपं यत्किञ्चित् द्रव्यम् अनाश्रित्य पृथक् दृशोः गोचरः नैव भवति । गन्धः पृथिवीं वा पृथिवीतः ये उत्पद्यन्ते तान् वा आश्रित्य , तिष्ठति। मधुरगुणः जलम् आश्रित्यैव तिष्ठति। अत्र सर्वत्र रूपम्, गन्धः, मधुररसः एवम् आदयः यंकञ्चन आश्रित्य एव विद्यन्ते। अतः आश्रिततत्वं तेषां प्रधानं लक्षणं भवति। अतः द्रव्याश्रिततत्वं गुणानां सामान्यलक्षणं भवति। प्राथमिकस्तरे अवगाहनासम्पादनाय मात्रमेव इदम् उपयुक्तं भवति। वस्तुतः तु द्रव्य -कर्म -भिन्नत्वे सति सामान्यवत्वं गुणानां समान्यलक्षणं कथयन्ति शास्त्रकाराः।

गुणाश्च १).रूप २).रस ३). गन्ध ४).स्पर्श ५).सङ्ख्या ६).परिमाण ७).पृथक्त्व ८).संयोग ९).विभाग १०). परत्व ११).अपरत्व १२).गुरुत्व १३).द्रवत्व १४).स्नेह १५.शब्द १६). बुद्धि १७). सुख १८). दुःख १९).इच्छा २०).द्वेष २१).प्रयत्न. २२). धर्म २३). अधर्म २४).संस्काराः इति चतुर्विंशतिः भवन्ति।

**स्वावलोकनप्रश्नाः**

१).गुणानां प्रधानलक्षणं किम् ?

२).कति गुणाः सन्ति ?

**२.३.२.३.पदार्थाः > कर्म (Action) > परिगणनम्**

**(मूलम्)** उत्क्षेपण- अपक्षेपण-आकुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि

**(विवरणम्)** इदं वाक्यं कर्मणः प्रभेदान् नामतः निर्दिशति। कर्म नाम क्रिया। इदं कर्म, कर्तरि समवायसम्बन्धेन वर्तते। 'क्रिया-क्रियावतोः समवायः' इति नियमात्। इदम् अपि द्रव्यम् आश्रित्यैव तिष्ठति। इदम् १).उत्क्षेपणम्, २).अपक्षेपणम् ३).आकुञ्चनम् ४).प्रसारणम्, ५).गमनम् इति पञ्चविधम्।

**२.३.३.१.कर्मणः भेदाः > निर्वचनम्**

**(मूलम्)** चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुः उत्क्षेपणम्। अधोदेशसंयोगहेतुः अवक्षेपणम्। शरीरसन्निकृष्टसंयोग हेतुः आकुञ्चनम्। शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत् सर्वं गमनम्। पृथिव्यदिचतुष्टयमनोमात्रवृत्ति।

**(विवरणम्)** इमानि वाक्यानि, कर्मणः, तत्प्रभेदानां च स्वभावं वर्णयन्ति। चलनात्मकं हि कर्म भवति। वस्तुतः क्रिया कञ्चन पदार्थं, अवस्थातः अवस्थान्तरं चालयति = प्रापयति इत्यर्थः। अतः कर्म नाम अवस्थान्तरप्रापणं भवति। एतत् च १).उत्क्षेपणम्, २).अपक्षेपणम् ३).आकुञ्चनम् ४).प्रसारणम्, ५).गमनम् इति पञ्चविधं वर्तते। क्रमशः तेषां स्वरूप-स्वभावादिकं च वर्ण्यते।

१).तत्र ऊर्ध्वदेशेन सह वस्तुनः संयोगं प्रति कारणीभूतं कर्म उत्क्षेपणम्। ऊर्ध्वं नयनेन अनेन कर्मणा कस्यचित् वस्तुनः प्रस्तुतदेशात् ऊर्ध्वदेशेन सह संयोगो जायते।

२). अधोदेशेन सह वस्तुनः संयोगं प्रति कारणीभूतं कर्म अपक्षेपणम्। अनेन कर्मणा कस्यचित् वस्तुनः स्वदेशात् अधोदेशेन सह संयोगो जायते।

३).शरीरसमीपदेशेन सह वस्तुनः संयोगं प्रति कारणीभूतं कर्म आकुञ्चनम्। अनेन कर्मणा वृक्षशाखादीनां स्वशरीरसमीपदेशेन सह संयोगो जायते।

४).शरीरविप्रकृष्टदेशेन सह वस्तुनः संयोगं प्रति कारणीभूतं कर्म प्रसारणम्। अनेन च कर्मणा कस्यचित् वस्तुनः शरीरदेशात् दूरदेशेन सह संयोगो जायते।

५).एतत् कर्मचतुष्टयात् अतिरिक्तं कर्म सर्वम् अपि गमनम्। गमनं नाम उत्तरदेशसंयोगानुकूला क्रिया। अनया च क्रियया गन्तुः पुरुषादेः स्वदेशात् उत्तरदेशेन संयोगः जायते। अस्मिन् एव गमने वाय्वादीनां तिर्यग्गमनं, अग्न्यादेः ऊर्ध्वज्वलनम्, जलादीनां स्यन्दनम्, इत्येवमादीनां क्रियाणां सर्वासाम् अपि यथाकथञ्चित् उत्तरदेशसंयोगा- नुकूलत्वेन गमने अन्तर्भावः। वस्तुतः चलनरूपं कर्म एकरूपम् एव। तज्जन्याः संयोगाः एव भिद्यन्ते। तद्भेदाच्च कर्मणः भेदः दर्शितः।

तदेतत्कर्म पृथिवी-जल-तेजो-वायुषु चतुर्षु, मनसि च वर्तते। एवं द्रव्येषु एव कर्म वर्तते इति, तत् कर्म, द्रव्यस्य लक्षणं भवति।

**स्वावलोकनप्रश्नाः**

१).कर्म नाम किम् ?

२).कर्म कतिविधम् ?

३).पञ्च कर्माणि कानि ?

२.३.२.४.पदार्थाः > सामान्यम् (Genus/ Generality)> परिगणनम्

**(मूलम्)** नित्यम् एकम् अनेकानुगतं सामान्यम्। द्रव्य-गुण-कर्मवृत्ति।

**(विवरणम्)** इदं वाक्यं सामान्यपदार्थस्य स्वरूपं विभागं च निरूपयति। समानस्य भावः सामान्यम् इति। सामान्यपदस्य निष्पत्तिः। समानधर्मः इति तस्य अर्थः। लोके अनेकेषु घटेषु अयं घटः अयं घटः इत्याकारिका एकाकाराउसमानाकारप्रतीतिः जायते। तस्याः एव एक-आकारप्रतीतेः हेतुं निर्दिशन् नौयायिकाः सामान्यम् इति

कञ्चन पदार्थं प्रतिपादयन्ति। इदं च पदार्थेषु अन्यतमम्,चतुर्थम् च। यथा -घटेषु घटत्वम्,गोषु गोत्वम् । तथाहि-

जगति घटाः जलाहरणय अनुकूलं आकृतिं विस्तृतिं च वहन्ति। जलाहरणय अनुकूलतां दृष्टौ निधाय एव लोके जनाः घटान् धरन्ति। जलम् आनयन्ति च। एवम् इदानीं जलाहरणानुकलाकृतिमत्वं घटानां समानः धर्मः भवति। सः समानधर्मः एव घटत्वम् इति नाम्ना सामान्यपदार्थः भवति।

सर्वे अपि गावः सास्नां लाङ्गूलं शृङ्गद्वयं पादचतुष्टयं च वहन्ति।सास्ना-लाङ्गूलादिमत्वं गवां समानः धर्मः। एवं गोषु सामानतया विद्यमानं सास्ना-लाङ्गूलादिमत्वरूपं धर्मम् एव गोत्वम् इति नाम्ना सामान्यपदार्थं व्यवहरन्ति।

**पदार्थाः > सामान्यम् > भेदाः**

**(मूलम्)** परम् अपरं चेति द्विविधम्। परं सत्ता, अपरं द्रव्यत्वादि।

**(विवरणम्)** इदं वाक्यं सामान्यपदार्थस्य विभागस्वरूपं च निरूपयति। सामान्यं द्विविधं परम् अपरं च। परम् अधिकदेशवृत्ति,नाम अधिकं प्रदेशम् आक्रम्य विद्यते। अस्य परिधिः विस्तृता भवति। अपरञ्च तद्विपरीतम्, न्यूनदेशवृत्ति,नाम अल्पं प्रदेशं व्याप्नोति। अस्य परिधिः न्यूनाउ अल्पीयसी भवति। अस्य अर्थः अयम्-यथा विविधेषु घटेषु-घटत्वम्, तथैव घटेषु घटिभन्नेष्वपि पृथिवीत्वम्। एवम् एव पृथिवीषु तदभिन्नेष्वपि द्रव्यत्वम्, तथैव द्रव्येषु तद्भिन्नेष्वपि सत्ता जातिः। एवम् अत्र अधिकं प्रदेशम्उ घटम्,पृथिवीम्, द्रव्यं च, आक्रम्य स्थिततत्वात् सत्ता (सत्वं वा) परा जातिः भवति। घटत्वं तु अल्पं प्रदेशम्उ एकं घटम् एव,व्याप्य स्थिततत्वात् अपरा जातिः भवति।

**स्वावलोकनप्रश्नाः**

१).सामान्यं नाम किम् ?

२).सामान्यं कतिविधम् ?

३).परसामान्यं कीदृशम् ?

४).अपरसामान्यं कीदृशम् ?

२.३.२.५..पदार्थाः >विशेषाः (Difference/Particularity) >परिगणनम्

(मूलम्) नित्यद्रव्यवृत्तयः विशेषाः तु अनन्ताः एव।

(विवरणम्) इदं वाक्यं विशेषस्य स्वरूपं बोधयति। विउ विशेषतया, अन्यान् शेषयतिउ व्यावर्तयति इति विशेषः इति विशेषपदार्थस्य व्युत्पत्तिः। यः स्ववैशिष्ट्येन पदार्थान्तरान् व्यावर्तयति सः विशेषः,नाम अन्येषां व्यावर्तकः धर्मः एव विशेषाख्यः पदार्थो भवति। अयं च सामान्यात् (पदार्थात्) भिन्नः अन्यतमः पञ्चमः पदार्थः। लोके कस्यचित् पदार्थस्य तद्भिन्नपदार्थस्य यत् भिन्नत्वं लक्ष्यते, तत्, तत्र, विशेषात् एव इति, लोके विशेषपदार्थ- सिद्धिः। एते च सङ्ख्यारीत्या अनन्ताः। विशेषाः नित्यद्रव्येषु वर्तन्ते। पृथिव्याः, जलस्य, तेजसः, वायोश्च परमाणवः, आकाश-काल-दिक्-आत्म-मनांसि च नित्यद्रव्याणि भवन्ति।

**स्वावलोकनप्रश्नाः**

१).विशेषः कः ?

२) .नित्यद्रव्याणि कानि ?

## २.३.२.६.पदार्थाः >समवायः (Co-inherence/ Intimate Relation) > परिगणनम्

**(मूलम्)** समवायस्तु एक एव। नित्यसम्बन्धः समवायः, अयुतसिद्धवृत्तिः। ययोः द्वयोः मध्ये एकम् अविनश्यत् - अवस्थम् अपराश्रितम् एव अवतिष्ठते तौ अयुतसिद्धौ। यथा- अवयव-अवयविनौ, गुण-गुणिनौ, क्रिया-क्रियावन्तौ, जाति-व्यक्ती, विशेष-नित्यद्रव्ये चेति।

**(विवरणम्)** इदं वाक्यं समवायस्य स्वरूपं बोधयति।सम् ,अव, इति उपसर्गद्वय पूर्वकात् अय धातोः निष्पन्नः समवायशब्दः।सम्उसमन्तात्, अवउअवयवेषु ,अयः= गतिः, अशेष-अवयवसम्बद्धतावाप्तिः।सम्बन्धेषु नित्यसम्बन्धः समवायः। सम्बन्धः हि सम्बन्धिभ्यां भिन्नः, तदुभयाश्रितः एकरूपश्च भवति।यथा हस्तपुस्तक- संयोगः हस्तपुस्तक- द्वयाश्रितः तदुभयभिन्नः एकरूपश्च भवति। हस्तपुस्तकविभागे सः संयोगः विनश्यति च। समवायः नित्यसम्बन्धः अयुतसिद्धवृत्तिश्च भवति। घट-पटादिवत् आदितः पृथक् स्थातुं योग्यौ युतसिद्धौ। तादृशद्रव्ययोः सम्बन्धः संयोगो

भवति।स्वतन्त्ररूपेण पृथक् स्थितिः ययोः नास्ति, ययोः अन्यतरः स्थितिकालं यावत् अन्याश्रितः एव स्थातुं शक्नोति, न पृथक् कदाचिदपि,तौ द्वौ अयुतसिद्धौ,तयोश्च सम्बन्धः समवायः। यथा अवयवः-अवयवी, गुण- गुणी, क्रिया-क्रियावान्, जातिः-व्यक्तिः, विशेषः-तदाश्रयं नित्यद्रव्यं च प्रतियुगलम् अयुतसिद्धं भवति।तत्र च अवयवी अवयवान् विहाय न पृथक् स्थातुं न प्रभवति।विनाशपर्यन्तं अवयवान् आश्रित्यैव सः तिष्ठति।एवं गुणः गुणिनम्, क्रिया क्रियावन्तं ,जातिः व्यक्तिम्,विशेषः नित्यद्रव्यं च विहाय न पृथक् स्थातुं प्रभवन्ति। स्थितिकालं यावत् अपराश्रितैव तत्सत्ता।एवं पृथक् स्थितिमतोः संयोगः, पृथक् स्थितिरहितयोः समवायः सम्बन्धः इति फलितम्। सः च एकः नित्यः इति प्राचीनाः। संयोगवत् सः अपि अनित्यः,नानैवेति नवीनाश्च अभिप्रयन्ति।

**स्वावलोकनप्रश्नाः**

१).समवायः कः ?

२) .समवायः कतिविधः ?

**२.३.२.७.पदार्थाः > अभावाः (Non-existence/Negation) > परिगणनम्**

**(मूलम्)** अभावः चतुर्विधः। १).प्रागभावः २).प्रध्वंसाभावः ३).अत्यन्ताभावः ४).अन्योन्याभावः

**(विवरणम्)** इदं वाक्यं अभावपदार्थस्य स्वरूपं विभागं च निरूपयति। अभावः नाम षड्भावपदार्थव्यतिरिक्तः निषे- धमुखेन प्रतीयमानः कश्चित् पदार्थविशेषः। अयम् अभावः निषेधमुखेन प्रतीतिविषयः भवति। अर्थात् यः विषयः 'न' इति शब्देन प्रतीयते स एव अभवपदार्थः भवति। अयं १).प्रागभावः २).प्रध्वंसाभावः ३).अत्यन्ताभावः ४).अन्योन्या- भावः इति चतुर्विधः।

**अभावभेदानां स्वरूपम्**

**(मूलम्)** अनादिःसान्तः प्रागभावः।उत्पत्तेः पूर्वकार्यस्य। सादिः अनन्तः प्रध्वंसाभावः। उत्पत्तेः अनन्तरं कार्यस्य। त्रैकालिकसंसर्गाभावः अत्यन्ताभावः।यथा, भूतले घटो नास्तीति। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावःअन्यो- न्याभावः। यथा, घटः

पटो न भवति इति।

**(विवरणम्)** इमानि वाक्यानि अभावभेदानां स्वरूपं वर्णयन्ति। अयम् अभावः १).प्रागभावः २).प्रध्वंसाभावः ३).अत्यन्ताभावः ४).अन्योन्याभावः इति चतुर्विधः। तत्र १).प्रागभावः - अस्य अभावस्य आदिः = उत्पत्तिः न भवति। अन्तस्तु (ध्वंसस्तु) विद्यते = दृश्यते । यस्य कस्यापि वा वस्तुनः उत्पत्तेः पूर्वं विद्यमानः अभावः प्रागभावः भवति। २).प्रध्वंसाभावः-अस्य अभवस्य आदिःउ उत्पत्तिः भवति । अन्तस्तु (ध्वंसस्तु) न विद्यते उन दृश्यते भवति, यस्य कस्यापि वा वस्तुनः नाशस्यउ ध्वंसस्य अनन्तरं विद्यमानः अभावः प्रध्वंसाभावः भवति । ३).अत्यन्ताभावः यत्र कश्चित् स्वाधिकरणे कदापिउभूत-भविष्यत् वर्तमानेषु त्रिष्वपि कालेषु नित्यसम्बन्धेन स्थातुं न शक्नोति स अत्यन्ताभावः इति कथ्यते। यथा - भूतले घटः नास्ति। नित्यसम्बन्धेन भूतले घटः कदापि न भवति इति,भूतले घटाभावः अत्यन्ताभावः भवति। एवम् एव आत्ममात्रवृत्तिगुणाः ज्ञानादयः अत्मेतरेषु ज्ञानादिषु कदापि न तिष्ठन्ते। अत एव आत्मेतरेषु पृथिव्यादिद्रव्येषु ज्ञानादीनाम् अत्यन्ताभावः इति कथ्यते। अथवा वायु-आकाशादिषु गन्धगुणस्य अत्यन्तभावः।एवञ्च पृथिवीतरेषु गन्धाभावः, जलेतरेषु रसाभावः, वाय्वितरेषु स्पर्शाभावः, एवमन्यत्रापि अत्यन्ताभावः बोध्यः। ४).अन्योन्याभावः यत्र तादात्म्यसम्बन्धेन यस्य अभावः बोध्यते , तत्र सः अभावः अन्योन्याभावः भवति। यथा- घटः पटो न । अत्र घटे तादात्म्यसम्बन्धेन पटस्य अभावः बोध्यते इति घटे पटाभवः अन्योन्याभावः भवति।

**स्वावलोकनप्रश्नाः**

१). अभावः कति विधः ?

२).अभावः कथं बुद्धिगोचरः भवति ?

* * *

# UNIT-III
# द्रव्याणि

## संरचना

३.०. परिचयः

३.१. लक्ष्याणि

३.२. द्रव्याणि

३.२.१. द्रव्याणि > निर्वचनम्

३.२.२. द्रव्याणि > परिगणनम्

३.२.३. द्रव्याणि > प्रत्येकं लक्षणानि

३.२.३.१.द्रव्याणि > पृथिवी (Earth)

३.२.३.२.द्रव्याणि > अप् (Water)

३.२.३.३.द्रव्याणि > तेजः(Light)

३.२.३.४.द्रव्याणि > वायुः (Air)

३.२.३.५.द्रव्याणि > आकाशः (Ether/Sky)

३.२.३.६.द्रव्याणि > कालः (Time)

३.२.३.७.द्रव्याणि > दिक्(Directional Place)

३.२.३.८.द्रव्याणि > आत्मा(Soul)

३.२.३.९.द्रव्याणि > मनः(Mind)

३.३.उपसंहारः

३.४.अभ्यासः

## ३.०. परिचयः

तर्कशास्त्रं पदार्थविश्लेषणशास्त्रम्।पदार्थनिरूपणं पदार्थविभागश्च अत्र प्रधानतया प्रवर्तते।पदार्थनिरूपणं वा पदार्थविभागो वा कञ्चन समानधर्मं पुरस्कृत्यैव प्रचलति। पदार्थनिरूपणाय वा पदार्थविभजनाय वा अनुसृताः सामान्यधर्माः के ? द्रव्यस्य प्रत्येकं लक्षणं किम् ? एकैकं द्रव्यं प्रत्येकतः मौलिकतया कीदृशं विभजनम् अर्हति ? इत्येतदंशानां स्थूलः परिचयः अत्र भवति।

## ३.१. लक्ष्याणि

आश्रयत्वम्, आधेयत्वम्, गतिशालित्वम् (अवस्थान्तरप्रापणम्),समानत्वम्, भिन्नत्वम्, पदार्थस्य अविद्यमानत्वम् (=अदर्शनम्)इत्येते पदार्थविभजनकारकाः सामान्यधर्माः भवन्ति। तत्र आश्रयत्वम् पुरस्कृत्य कश्चन पदार्थ- विभागः प्रवृत्तः। सः एव द्रव्यविभागः भवति। गुणाः द्रव्यम् आश्रित्य तिष्ठन्ति। क्रियाश्च अपि द्रव्यम् आश्रित्य प्रचलन्ति। एवं द्रव्यं गुणानां, क्रियाणां च आश्रयं भवति। इमम् एव सामान्यधर्मं पुरस्कृत्य गुणाश्रयत्वं क्रिया- श्रयत्वं च द्रव्यस्य सामान्यलक्षणं कथयन्ति। किञ्च एतत् द्रव्यं नवप्रकारकं। तत्र एकैकस्य पृथक् लक्षणं किं भवति? कः गुणः कं द्रव्यम् आश्रित्य तिष्ठति। केन सम्बन्धेन गुणः द्रव्यं आश्रित्य तिष्ठति ? एकैकस्य द्रव्यस्य स्वभावः कः ? एकैकस्य द्रव्यस्य प्रत्येकतः कीदृशः विभागः वर्तते? इत्येतदंशानां बोधनम् अत्र प्रधानतया उद्दिष्टम्। एतत्पाठ्यांशस्य अध्ययनेन -

- द्रव्यसमान्यलक्षणम् अवगन्तुं पारयति।
- नित्यद्रव्याणि पठितुं पारयति।
- नित्यत्व-अनित्यत्वलक्षणानि लिखितुं समर्थः भवति।
- द्रव्यस्य प्रत्येकं शरीर-इन्द्रिय-विषयभेदान् अवगच्छति।
- गुणग्राहकाणि इन्द्रियाणि लिखितुं समर्थो भवति।
- काल-दिक्-आत्म-मनसाम् अभौतिकत्वं, सर्वव्यापकत्वं च अवगच्छति।

## ३.२. द्रव्याणि

### ३.२.१. द्रव्याणि -निर्वचनम्

यः, आ= समन्तात् = प्रति अवयवं , धरति सः आधारः (Container) इति उच्यते। आधारः, आश्रयः इत्येतौ समानार्थकौ एव।द्रव्याणि सर्वाणि आधारभूतानि; स्वेतराणां पदार्थानाम् आश्रयाणि भवन्ति।प्रधानतः गुणानां क्रियाणां च आधारभूतानि भवन्ति इमानि द्रव्याणि। अत एव (गुणानाम् आधारभूतानि =) गुणाश्रयत्वम्, (क्रियाणां च आधार भूतानि) क्रियाश्रयत्वं वा द्रव्यस्य सामान्यलक्षणम् उक्तं भवति।

### ३.२.२. द्रव्याणि - परिगणनम्

एतानि च - १).पृथिवी, २).अप्, ३).तेजो,४). वायु, ५). आकाश, ६).काल, ७).दिक्, ८).आत्म , ९).मनांसि , नवैव भवन्ति।

### ३.२.३. द्रव्याणि > प्रत्येकं लक्षणानि

### ३.२.३.१.द्रव्याणि > पृथिवी (Earth)

**(मूलम्)** तत्र गन्धवती पृथिवी।

**(विवरणम्)** इदं वाक्यं पृथिव्याः लक्षणं वर्णयति।

पृथिव्याः लक्षणम्; तत्र = सप्तपदार्थानां मध्ये इत्यर्थः। गन्धवती इति लक्षणपरं पदम्। गन्धवत्त्वं पृथिव्याः लक्षणम् इति तस्य अभिप्रायः। गन्धः अस्याम् अस्तीति गन्धवती। अत्र गन्धशब्दः सर्वेषां रसायनिकपदार्थानाम् उपलक्षणम्। अतः गन्धशब्दः लोहान् (METALS), धातुजान् (MINERALS), रसायनानि (CHEMICALS) च बोधयति। पृथिवी इमान् वहति। लोहाः (METALS), धातुजाः (MINERALS), रसायनानि (CHEMICALS) च समिष्ट्या वसुपदेन व्यवहृताः भवन्ति। वसून् इमान् धरति इति प्रसिद्ध्या एव पृथिव्याः वसुन्धरा इति व्यवहारः सञ्जातः। अयमपि व्यवहारः गन्धस्य, लोहानाम्, धातुजानाम्, रसायनानां च पृथिवीवाहकत्वं सूचयति। गन्धः आधेयः। पृथिवी अधिकरणम्। समवायः सम्बन्धः। तथा च गन्धः समवायसम्बन्धेन (INSEPERABLY) यत्र वर्तते, अथवा समवायसम्बन्धेन (INSEPERABLY) गन्धस्य यत् अधिकरणम् (= यः आधारः) भवति सा पृथिवी भवति इति पृथिव्याः लक्षणम् उक्तं भवति।

**(मूलम्)** सा द्विविधा; नित्या अनित्या चेति। नित्या परमाणुरूपा, अनित्या कार्यरूपा।

**(विवरणम्)** इमानि वाक्यानि पृथिव्याः विभागं वर्णयन्ति।

पृथिव्याः द्वैविध्यम् ;सा नाम पृथिवी,पृथिवी स्थूलतः नित्या = नित्यपृथिवी, अनित्या = अनित्यपृथिवी चेति द्वेधा भवति। अत्र नित्या का ? अनित्या का ? नित्या कीदृशी भवति ? अनित्या कीदृशी भवति ? इति आदौ ज्ञातव्यः अस्ति। नित्या नाम यस्याः उत्पत्तिः न भवति, विनाशः अपि न विद्यते, यस्याः आदि-अन्तौ च न भवतः, यः परिणामम् अप्राप्य कालत्रये अपि अवतिष्ठते, यः अनादिकालप्रवाहप्रयातः सन् वर्तते सा नित्या भवति। अनित्या एतत् विरुद्धा। नाम

यस्याः उत्पत्तिः भवति, विनाशः अपि विद्यते, यस्याः आदि-अन्तौ च भवतः, यः परिणामं प्राप्नोति, रूपान्तरम् आप्नोति, अवस्थान्तरम् अनुभवति, सा अनित्या भवति।

प्रकृत्या प्रति द्रव्यं परमाणुरूपेण अवस्थीयते। इयं द्रव्यस्य प्राथमिका दशा ।ततः कार्यात्मना परिणामम् आप्तुं परमाणुभिः राशीभवति। इयं द्रव्यस्य द्वितीया दशा। पृथिवी अपि एवम् एव। कार्यसाधनायउकार्यात्मना परिणामम् आप्तुं, चोदिताः सन्तः समायत्ताः परमाणवः, परस्परम् आकर्षन्ति, मिलन्ति, संयोगम् आप्नुवन्ति। तत्र कार्य- साधनाय चोदितः कश्चन अणुः, अण्वन्तरेण मिलति, सः द्व्यणुकः भवति। द्व्यणुकः अपरेण अणुना मिलति, त्र्यणुकः भवति। त्र्यणुकः अपि एवम्, अपरेण, अपरेण, अपरेण, मिलति, राशीभवति, कार्यं साधयति। अस्मिन् क्रमे परमाणुरूपेण स्थिता या पृथिवी, तस्याः उत्पत्ति-विनाशौ न स्तः। तस्याः आद्यन्तौ न जानीमः। सा न परिणमते। कालत्रये अपि तथैव अवतिष्ठते। अनादिकालतः तथैव भवति। अतः परमाणुरूपा सा , नित्या पृथिवी इति उच्यते।
जालसूर्यमरीचस्थं यत्सूक्ष्मं दृश्यते रजः।

तस्य षष्ठतमो भागः परमाणुः स उच्यते।। इदं पद्यं परमाणुस्वरूपं ख्यापयति। कार्यसाधनाय चोदिता सती समायत्ता द्व्यणुकपृथिवी , अण्वन्तरसम्पर्कात् जातत्वेन, सा उत्पत्तिं वहति। द्व्यणुकादिपरिणामं प्राप्नोति। अवस्थान्तरं अनुभवति च। अतः कार्यसाधनाय समायत्ता द्व्यणुकादिपृथिवी अनित्या भवति। अनित्या द्व्यणुकादिपृथिवी एव कार्यसाधनाय चोदिता इति कृत्वा,एषा कार्यरूपा भवति। एवं स्थूलतः, पृथिवी, नित्या- अनित्या चेति द्विविधा भवति।

**(मूलम्)** पुनः त्रिविधा;शरीर-इन्द्रिय-विषयभेदात्; शरीरम् अस्मदादनाम्, इन्द्रियं गन्धग्राहकं घ्राणम्, तच्च नासाग्रवर्ति, विषयो मृत्-पाषाणादि ।

**(विवरणम्)** इमानि वाक्यानि अनित्यपृथिव्याः त्रैविध्यं वर्णयन्ति। तथा हि- अनित्यपृथिव्याः त्रैविध्यम्; कार्यसाधनाय समायत्ता द्व्यणुकादिपृथिवी, परोक्षतया,शरीररूपेण- इन्द्रियरूपेण- विषयरूपेण च त्रिप्रकारतया विश्वस्य सृष्टिक्रमं प्रचालयति। **तथा हि -** शरीरपृथिवी ; आत्मनः भोगस्य आयतनं शरीरम्। सुख दुःख साक्षात्कारः भोगः। तस्य अयम् अर्थः। आत्मनः, मनसः माध्यमेन सुखस्य अनुभूतिः जायते। तथैव दुःखस्य अनुभूतिः अपि जायते। एवम् आत्मनः जायमानयोः

सुख-दुःखयोः अनुभूतिःउ अनुभवः एव भोगपदेन व्यवहृतः भवति। सुख-दुःखयोः अनुभवस्य आयतनम् उनिलयम्, स्थानम् , यत् अस्ति तदेव शरीरम् भवति। किञ्च अद्भ्यः पृथिवी, पृथिवीभ्यः ओषधयः, ओषधीभ्यः अन्नम्, अन्नात् रेतः, रेतसः पुरुषः ...इत्ययं मन्त्रभागः पुरुषस्य उत्पत्तिक्रमं निरूपयति। अत्र पृथिवी परणाणुभ्यः ओषधीनां परमाणवः सञ्जाताः, ओषधीनां परमाणुभ्यः अन्नपरमाणवः आविर्भूताः, अन्नपरमाणुभ्यः रेतसः(कणाः) परमाणवः भवन्ति , तेभ्यः पुरुषः उत्पद्यते। एवम् अस्मदादीनां शरीरम् परोक्षतया पृथिवीपरमाणुभ्यः एव निर्मितमिति अवगन्तव्यम्। तदेवं गन्धवत् -अस्मदादीनां शरीरं पार्थिवं वा शरीरपृथिवी वा भवति।

इन्द्रियपृथिवी ; ज्ञानकारणमनस्संयोगाश्रयम् इन्द्रियम्।तस्य अयम् अर्थः। विश्वं प्रकृत्यात्मकम्। प्रकृतिः पञ्चभिः भूतैः सङ्कलिता सती, लोकोपकाराय प्रवर्तते। पञ्चानां च भूतानां प्रत्येकतः लोकोपकारकगुणाः विद्यन्ते। एतेषां लोकोपकारकगुणानां ज्ञानम् अस्माभिः = पुरुषैः, प्राप्तव्यम् अस्ति। तादृशज्ञानप्रापणस्यैव प्रत्यक्षम् इति व्यवहारः अस्ति। गुणानां ज्ञानप्राप्त्यै (= अनुभवाय अथवा साक्षात्का- राय) शरीरे निबद्धं परिकरम् एव इन्द्रियं भवति। प्रकृते -पृथिव्यां विद्यमानः लोकोपकारकः गुणः गन्धः। पृथिव्यां विद्यमानस्य एतस्य गन्धगुणस्य ज्ञानम् अस्माभिः आप्तव्यम् अस्ति। तत्प्रापणाय शरीरे उपनिबद्धं परिकरम्=इन्द्रियम्, घ्राणम्। तदेवं पृथिव्यां समवायसम्बन्धेन विद्यमानस्य गन्धस्य साक्षात्कारसाधनं घ्राणेन्द्रियम्। तदेव च प्रकृते पार्थिवेन्द्रियम्, अथवा इन्द्रियपृथिवी च भवति। तच्च नासिकायाः अग्रभागे भवति।

विषयपृथिवी; शरीरभिन्नः इन्द्रियभिन्नः गन्धवान् निर्जीवः पदार्थः यः विषयः सः पार्थिवविषयः । तरुगुल्मादिः विषयः पृथिवी भवति।

**स्वावलोकनप्रश्नाः**

१).द्रव्यानां नामानि कानि ?

२).पृथिव्याः मुख्याः भेदाः के ?

३).नित्या पृथिवी किं रूपा ?

४).पार्थिवम् इन्द्रियं किम् ?

५).पार्थिवः विषयः कः ?

## ३.२.३.२. द्रव्याणि > अप् (Water)

**(मूलम्)** शीतस्पर्शवत्यः आपः।

**(विवरणम्)** इदं वाक्यं अपाम् = जलस्य,स्वरूपं वर्णयति।

जलस्य लक्षणम् ; शीतस्पर्शवत्यः इति स्वरूपनिर्देशपरम्। शीतः च असौ स्पर्शः च शीतस्पर्शः। शीतस्पर्शः आसाम् अस्तीति शीतस्पर्शवत्यः इति विग्रहः। यासां शातस्पर्शः विद्यते ताः आपः = जलम् इत्यर्थः। शीतस्पर्सवत् -द्रव्यं जलं भवति। तस्य अयम् अभिप्रायः। इतः पूर्वं चतुर्विंशतिगुणाः परिगणिताः खलु। तत्र चतुर्थः गुणः स्पर्शः। सः च शीतस्पर्शः, उष्णस्पर्शः, अनुष्ण-अशीतस्पर्शः च इति त्रिप्रकारकः अस्ति। शीतस्पर्शः आधेयः। आपः = जलम्, अधिकरणम्। समवायः सम्बन्धः। तथा च शीतस्पर्शः गुणः यस्मिन् (द्रव्ये) समवायसम्बन्धेन आधेयतया वर्तते, तत् (द्रव्यम्) अप् = जलम् इति कथ्यते। शैत्यं हि यत् , सा प्रकृतिः जलस्य इति कालिदासकथनम् अपि जलस्य शैत्यप्रकृतित्वं निरूपयति।

**(मूलम् )** ताः द्विविधाः; नित्याः अनित्याः चेति, नित्याः परमाणुरूपाः, अनित्याः कार्यरूपाः।

**(विवरणम्)** इमानि वाक्यानि जलस्य स्थूलतः विद्यमानं प्राथमिकं विभागं निरूपयन्ति। जलस्य द्वैविध्यम्; ताः इति स्त्रीलिंग तद् शब्दस्य प्रथमाबहुवचनान्तम्, अपां परामर्शकम्। यासां शातस्पर्शः विद्यते ताः आपः इति तस्य अर्थः। आपः (= जलम् ) च नित्याः=नित्य-आपः इति, अनित्याः= अनित्य-आपः इति, चेति द्विप्रकारकाः भवन्ति। नित्य-आपः काः ? ताः कीदृशाः ? अनित्य-आपः काः ? ताः कीदृशाः ? इति प्रथमम् अवगन्तव्यम् अस्ति। नित्यः नाम यस्य उत्पत्तिः न भवति, विनाशः अपि न विद्यते, यस्य आदि-अन्तौ च न भवतः,यः परिणामम् अप्राप्य कालत्रये अपि अवतिष्ठते, यः अनादिकालप्रवाहप्रयातः सन् वर्तते सः नित्यः भवति। अनित्यः नाम यस्य उत्पत्तिः भवति, विनाशः अपि विद्यते, यस्य आदि-अन्तौ च भवतः,यः परिणामं प्राप्नोति, रूपान्तरम् आप्नोति, अवस्थान्तरम् अनुभवति, सः अनित्यः भवति।

प्रति द्रव्यं परमाणुरूपेण अवस्थीयते। इयं द्रव्यस्य प्राथमिका दशा । ततः कार्यात्मना परिणामम् आप्तुं परमाणुभिः राशीभवति। इयं द्रव्यस्य द्वितीया दशा। जलम् अपि तथैव। कार्यसाधनाय = कार्यात्मना परिणामम् आप्तुं चोदिताः सन्तः समायत्ताः जलपरमाणवः परस्परम् आकर्षन्ति, मिलन्ति, संयोगम् आप्नुवन्ति। तत्र कार्यसाधनाय चोदितः कश्चन जलपरमाणुः, अण्वन्तरेण मिलति, सः द्व्यणुकः भवति। द्व्यणुकः अपरेण अणुना मिलति, त्र्यणुकः भवति। त्र्यणुकः अपि एवम्, अपरेण, अपरेण, अपरेण, मिलति, राशीभवति, कार्यं साधयति। अस्मिन् क्रमे परमाणुरूपेण स्थिताः याः आपः, तासां परमाणुत्वेन, उत्पत्ति-विनाशौ न स्तः। तासाम् आद्यन्तौ न जानीमः। ताः न परिणमन्ते। कालत्रये अपि तथैव अवतिष्ठन्ते। अनादिकालतः तथैव भवन्ति। अतः परमाणुरूपाः ताः , नित्याः आपः भवन्ति।

कार्यसाधनाय चोदिताः सत्यः समायत्ताः द्व्यणुकादि-आपः तु,अण्वन्तरसम्पर्कात् जातत्वेन,ताः उत्पत्तिं वहन्ति। द्व्यणुकादिपरिणामं प्राप्नुवन्ति। अवस्थान्तरं च अनुभवन्ति। अतः कार्यसाधनाय समायत्तं द्व्यणुकादिजलम् अनित्यं भवति। अनित्यं द्व्यणुकादिजलं एव कार्यसाधनाय चोदितम् इति कृत्वा, एतत् जलं कार्यरूपं भवति। एवं स्थूलतः, आपः (= जलम्), नित्याः अनित्याः चेति द्विविधाः भवन्ति।

**(मूलम्)** पुनः त्रिविधाः,शरीर-इन्द्रिय-विषयभेदात्; शरीरं वरुणलोके,इन्द्रियं रसग्रहकं रसनम्,तच्च जिह्वा- ग्रवर्ति, विषयः सरित् समुद्रादिः ।

**(विवरणम्)** इमानि वाक्यानि अनित्य-अपाम् = अनित्यजलस्य, त्रैविध्यं वर्णयन्ति। अनित्यानाम् अपां त्रैविध्यम्;कार्यसाधनाय समायत्ताः द्व्यणुकादिः आपः (= जलम्), परोक्षेण,शरीररूपेण- इन्द्रियरूपेण- विषयरूपेण च त्रिप्रकारतया विश्वस्य सृष्टिक्रमं प्रचालयति। तथा हि -

जलशरीरम् ; आत्मनः भोगस्य आयतनं शरीरम्। सुख दुःख साक्षात्कारः भोगः। तस्य अयम् अर्थः। आत्मनः, मनसः माध्यमेन सुखस्य अनुभूतिः जायते। दुःखस्य अपि अनुभूतिः जायते।एवम् आत्मनः जायमानयोः सुख-दुःखयोः अनुभूतिःउ अनुभवः एव भोगपदेन व्यवहृतः भवति। सुख-दुःखयोः अनुभवस्य आयतनम् उनिलयम्, स्थानम्, यत् अस्ति तदेव शरीरम् भवति। एवं वरुणलोके विद्यमानानां शरीरं परोक्षतया जलपरमाणुभ्यः एव निर्मितमिति अवगन्तव्यम् अस्ति।

वरुणलोकवासिनः जलमयं शरीरं धरन्ति। तदिदं जलशरीरम् अयोनिजं भवति। रसनेन्द्रियम्; ज्ञानकारणमनस्संयोगाश्रयम् इन्द्रियम्। तस्य अयम् अर्थः। विश्वं प्रकृत्यात्मकम्। प्रकृतिः पञ्चभिः भूतैः सङ्कलिता सती, लोकोपकाराय प्रवर्तते। पञ्चानां च भूतानां प्रत्येकतः लोकोपकारकगुणाः विद्यन्ते। एतेषां लोकोपकारकगुणानां ज्ञानम् अस्माभिः= पुरुषैः, प्राप्तव्यम् अस्ति। तादृशज्ञानप्रापणस्यैव प्रत्यक्षम् इति व्यवहारः अस्ति। गुणानां ज्ञानस्य प्राप्त्यै (=अनुभवाय अथवा साक्षात्काराय) शरीरे निबद्धं परिकरम् एव इन्द्रियं भवति। प्रकृते- जलेषु विद्यमानः लोकोपकारकः गुणः रसःउरुचिः। जले विद्यमानस्य एतस्य रसात्मकगुणस्य ज्ञानम् अस्माभिः आप्तव्यम् अस्ति। तत्प्रापणाय शरीरे उपनिबद्धं परिकरम्उ इन्द्रियम्, रसनं नाम जिह्वा। तदेवं अप्सु समवायसम्बन्धेन विद्यमानस्य रसस्य साक्षात्कारसाधनं इन्द्रियं रसनम्। तदेव प्रकृते रसनेन्द्रियं भवति। तच्च जिह्वायाः अग्रभागे वर्तते।

विषयजलम्; शरीरभिन्नं इन्द्रियभिन्नं शीतस्पर्शवत् जलं यत् तत् जलस्य विषयं भवति। सरित्-समुद्रादिः जलविषयस्य उदाहरणं भवति।

**स्वावलोकनप्रश्नाः**

१).जलस्य लक्षणं किम् ?

२).जलशरीरं के धरन्ति ?

३).जले समवायसम्बन्धेन विद्यमानः गुणः कः ?

### ३.२.३.३.द्रव्याणि > तेजः (Light)

**(मूलम्)** उष्णस्पर्शवत् तेजः

**(विवरणम्)** इदं वाक्यं तेजसः स्वभावं प्रतिपादयति।

तेजसः लक्षणम् ; उष्णस्पर्शवत्यः इति स्वरूपनिर्देशपरम्। उष्णः च असौ स्पर्शः च उष्णस्पर्शः। उष्णस्पर्शः अस्य अस्तीति उष्णस्पर्शवत् इति विग्रहः। यस्य उष्णस्पर्शः विद्यते तत् तेजः इत्यर्थः। उष्णस्पर्शवत् -द्रव्यं तेजः भवति। तस्य अयम् अभिप्रायः। इतः पूर्वं चतुर्विंशतिगुणाः परिगणिताः खलु। तत्र चतुर्थः गुणः स्पर्शः। सः च शीतस्पर्शः, उष्णस्पर्शः, अनुष्ण-अशीतस्पर्शः च इति त्रिप्रकारकः अस्ति। उष्णस्पर्शः

आधेयः। तेजः, अधिकरणम्। समवायः सम्बन्धः। तथा च उष्णस्पर्शः गुणः यस्मिन् (द्रव्ये) समवायसम्बन्धेन आधेयतया वर्तते, तत् (द्रव्यम्) तेजः इति कथ्यते। (मूलम्) तत् द्विविधम्;नित्यम् अनित्यम् चेति, नित्यं परमाणुरूपम्, अनित्यं कार्यरूपम्। तेजसः द्वैविध्यम्;तत् इति नपुंसकलिंग तद् शब्दस्य प्रथमैकवचनान्तम्, तेजसः परामर्शकम्। यस्य उष्णस्पर्शः गुणः विद्यते तत्तेजः इति तस्य अर्थः। तेजः नित्यम् = नित्यतेजः इति, अनित्यम् = अनित्यतेजः इति, चेति द्विप्रकारकं भवति। नित्यं तेजः किम् ? तत् कीदृशम् ? अनित्यं तेजः किम् ? तत् कीदृशम् ? इति आदौ बोद्धव्यम् अस्ति। नित्यं नाम यस्य उत्पत्तिः न भवति, विनाशः अपि न विद्यते, यस्य आदि-अन्तौ च न भवतः,यः परिणामम् अप्राप्य कालत्रये अपि अवतिष्ठते, यः अनादिकालप्रवाहप्रयातः सन् वर्तते तत् नित्यं भवति। अनित्यं नाम यस्य उत्पत्तिः भवति, विनाशः अपि विद्यते, यस्य आदि-अन्तौ च भवतः,यः परिणामं प्राप्नोति, रूपान्तरम् आप्नोति, अवस्थान्तरम् अनुभवति, तत् (अनित्यं भवति।)

प्रति द्रव्यं परमाणुरूपेण अवस्थीयते। इयं द्रव्यस्य प्राथमिका दशा। ततः कार्यात्मना परिणामम् आप्तुं परमाणुभिः राशीभवति। इयं द्रव्यस्य द्वितीया दशा। तेजः अपि तथैव। कार्यसाधनायउकार्यात्मना परिणामम् आप्तुं, चोदिताः सन्तः समायत्ताः तेजसः परमाणवः परस्परम् आकर्षन्ति, मिलन्ति, संयोगम् आप्नुवन्ति। तत्र कार्यसाधनाय चोदितः कश्चन तेजसः परमाणुः, अण्वन्तरेण मिलति, सः द्व्यणुकः भवति। द्व्यणुकः अपरेण अणुना मिलति, त्र्यणुकः भवति। त्र्यणुकः अपि एवम्, अपरेण, अपरेण, अपरेण, मिलति, राशीभवति, कार्यं साधयति। अस्मिन् क्रमे परमाणुरूपेण स्थितं यद् तेजः, तस्य परमाणुत्वेन, उत्पत्ति-विनाशौ न स्तः। तस्य आद्यन्तौ न जानीमः। तत् न परिणमते। कालत्रये अपि तथैव अवतिष्ठते। अनादिकालतः तथैव भवति। अतः परमाणुरूपं तत्, नित्यं तेजः भवति।

कार्यसाधनाय प्रवृत्तं सत् समायत्तं द्व्यणुकादि-तेजस्तु , अण्वन्तरसम्पर्कात् जातत्वेन,तत् उत्पत्तिं वहति।द्व्यणुकादिपरिणामं प्राप्नोति। अवस्थान्तरं च अनुभवति। अतः कार्यसाधनाय समायत्तं द्व्यणुकादितेजः अनित्यं भवति। अनित्यं द्व्यणुकादितेजः एव कार्यसाधनाय प्रवर्तते इति कृत्वा, एतत् तेजः कार्यम् इति नाम्ना अपि व्यवहृतं भवति। एवं स्थूलतः, तेजः नित्यम् , अनित्यं च इति द्विविधं

भवति।

**(मूलम्)** पुनः त्रिविधम्;शरीर-इन्द्रिय-विषयभेदात्; शरीरम् आदित्यलोके, इन्द्रियं रूपग्राहकंक्षुः, तच्च कृष्णताराग्रवर्ति, विषयः चतुर्विधः भौम-दिव्य-औदर्य-आकरजभेदात्,तत्र भौमं वह्न्यादि, दिव्यम् अप्-इन्धनं विद्युदादि,भुक्तस्य परिणामहेतुः औदर्यम् , आकरजं सुवर्णादि ।

**(विवरणम्)** इमानि वाक्यानि अनित्यतेजसः, त्रैविध्यं वर्णयन्ति।

अनित्यतेजसः त्रैविध्यम्; कार्यसाधनाय समायत्तं द्व्यणुकादिः तेजः, परोक्षतया , शरीररूपेण- इन्द्रियरूपेण- विषयरूपेण च त्रिप्रकारतया विश्वस्य गमनं चालयति। तथा हि -तेजश्शरीरम् ; आत्मनः भोगस्य आयतनं शरीरम्। सुख दुःख साक्षात्कारः भोगः। तस्य अयम् अर्थः। आत्मनः, मनसः माध्यमेन सुखस्य अनुभूतिः जायते। दुःखस्य अपि अनुभूतिः जायते। एवम् आत्मनः जायमानयोः सुख- दुःखयोः अनुभूतिः= अनुभवः एव भोगपदेन व्यवहृतः भवति। सुख-दुःखयोः अनुभवस्य आयतनम् उनिलयम्, स्थानम्, यत् अस्ति तदेव शरीरम् भवति। प्रकृते आदित्यलोके विद्यमानानां शरीरं परोक्षतया तेजः परमाणुभ्यः एव निर्मितमिति अवगन्तव्यम् अस्ति। आदित्यलोकवासिनः तेजोमयं शरीरं धरन्ति। तदिदं तेजोशरीरम् अयोनिजं भवति।

चक्षुरिन्द्रियम् ; ज्ञानकारणमनस्संयोगाश्रयम् इन्द्रियम्। तस्य अयम् अर्थः। विश्वं प्रकृत्यात्मकम्। प्रकृतिः पञ्चभिः भूतैः सङ्कलिता सती, लोकोपकाराय प्रवर्तते। पञ्चानां च भूतानां प्रत्येकतः लोकोपकारकगुणाः विद्यन्ते। एतेषां लोकोपकारक-गुणानां ज्ञानम् अस्माभिः= पुरुषैः,प्राप्तव्यम् अस्ति। तादृशज्ञानप्रापणस्यैव प्रत्यक्षम् इति व्यवहारः अस्ति। गुणानां ज्ञानस्य प्राप्त्यै (=अनुभवाय अथवा साक्षात्काराय ) शरीरे निबद्धं परिकरम् एव इन्द्रियं भवति। प्रकृते-तेजसि विद्यमानः लोकोपकारकः गुणः रूपम् । तेजसि विद्यमानस्य एतस्य रूपात्मकगुणस्य ज्ञानम् अस्माभिः आप्तव्यम् अस्ति। तत्प्रापणाय शरीरे उपनिबद्धं परिकरम्उ इन्द्रियम्, चक्षुः,नाम नेत्रम् । तदेवं तेजस्सु समवायसम्बन्धेन विद्यमानस्य रूपस्य साक्षात्कारसाधनं इन्द्रियं चक्षुः,नाम नेत्रम्। चक्षुरिन्द्रियं रूपप्रत्यक्षं जनयति। तच्च चक्षुषि कृष्णतारायाः अग्रभागे वर्तते।

**विषयतेजः**; शरीरभिन्नं इन्द्रियभिन्नं उष्णस्पर्शवत् तेजः यत् तत् विषयतेजः भवति। सुर्णादिकं विषयतेजसः उदाहरणं भवति । तथा हि - विषयतेजसः चतुर्विध्यम्;

विषयतेजः अपि भौम-दिव्य-औदर्य-आकरज-भेदात् पुनः चतुर्था भवति। भूमौ उत्पन्नम्, भौमं तेजः भवति। दैनन्दिनजीवने शाक-पाकादीनां करणाय भुवि कृत्रिमपद्धत्या अग्निपेटिकातः उत्पद्यमानं सत् उपयुज्यमानम् अग्न्यादिकं भौमं तेजः भवति। जलपूर्णः मेघः वर्षणाय दिवि आवृतः भवति। तादृशात् मेघात्, दिवि, तटित् उत्पद्यते। तत् विद्युदादि दिवि जातम् इति कृत्वा दिव्यं तेजः भवति। उदरे जातम् उदर्यम्। भुक्तस्य अन्नादेः, पीतस्य जलस्य परिणामः= जीर्णता। तस्य(परिणामस्य) हेतुभूतः अग्निः उदर्यं भवति। नाम भुक्तं पदार्थं यः जीर्णं करोति,सः औदर्यं तेजः भवति। तस्यैव जठराग्निः इति प्रसिद्धिः अस्ति। आकरः नाम खनिः (Mines)। तेषु जातं तेजः = आकरजं भवति। सुवर्णम्, रजतम् इत्यादि आकरजं तेजः भवति।

**स्वावलोकनप्रश्नाः**

१) विषयतेजः कतिविधम् ?

२) कीदृशं दिव्यं तेजः भवति ?

३) आकरजं तेजः किम् ?

### ३.२.३.४.द्रव्याणि > वायुः (Air)

**(मूलम्)** रुपरहितस्पर्शवान् वायुः।

**(विवरणम् )** इदं वाक्यं वायोः स्वरूपं स्वभावं च वर्णयति।

वायोः लक्षणम् ; रुपरहितस्पर्शवान् इति स्वरूपनिर्देशपरम्। रूपेण रहितः रूपरहितः= रूपहीनः, रूपाभाववान् यस्य रूपं न भवति सः इत्यर्थः। स्पर्शः अस्मिन् अस्तीति स्पर्शवान्। यः स्पर्शेन अवगन्तुम् = अनुमातुम् = निश्चेतुम् शक्यः सः। अत्र स्पर्शवान् इत्यस्य अयम् अर्थः। इतः पूर्वं चतुर्विंशतिगुणाः परिगणिताः खलु। तत्र चतुर्थः गुणः स्पर्शः। सः च १).शीतस्पर्शः,२).उष्णस्पर्शः,३).अनुष्ण-अशीतस्पर्शः च इति त्रिप्रकारकः विद्यते। अत्र स्पर्शपदस्य तृतीयः अनुष्ण-अशीतस्पर्शः अर्थः। रूपरहितः च असौ स्पर्शवान् च रूपरहितस्पर्शवान्, रूपरहितत्वं स्पर्शवत्त्वं च वायोः स्वरूपं ख्यापयति। अनुष्ण-अशीतस्पर्शो गुणः आधेयः। वायुः अधिकरणम्। समवायः सम्बन्धः। तथा च यस्मिन् (द्रव्ये)समवायसम्बन्धेन रूपं न विद्यते, यस्मिन्

(द्रव्ये) च अनुष्ण-अशीतस्पर्शः गुणः समवायसम्बन्धेन आधेयतया वर्तते, तत् (द्रव्यम्=अधिकरणम् ) वायुः इति कथ्यते।

**वायोः विभागः**

**(मूलम्)** सः द्विविधः;नित्यः अनित्यः चेति ।नित्यः परमाणुरूपः,अनित्यः कार्यरूपः।

**(विवरणम्)** इदं वाक्यं ,स्थूलतः विद्यमानं वायोः द्वैविध्यं निरूपयति।

वायोः द्वैविध्यम्;सः च नित्यः-अनित्यः चेति द्विप्रकारकः भवति। उत्पत्ति-विनाश-शून्यः नित्यः भवति। उत्पत्ति- विनाश-शालिनी अनित्यः भवति। परमाणुरूपतया यः वायुः विद्यते,तस्य उत्पत्ति-विनाशौ न भवतः। सः एव नित्य- वायुः इति उच्यते। यश्च उत्पत्तिविनाशशली सन् द्व्यणुकादिः भूत्वा कार्यं वहति सः अनित्यवायुः भवति।

**(मूलम्)** पुनः त्रिविधः , शरीर-इन्द्रिय-विषयभेदात् ;शरीरं वायुलोके।

**(विवरणम्)** इदं वाक्यं ,अनित्यवायोः त्रैविध्यं निरूपयति।

अनित्यवायोः त्रैविध्यम्; कार्यसाधनाय समायत्तं द्व्यणुकादिः वायुः, परोक्षतया , शरीररूपेण- इन्द्रियरूपेण- विषयरूपेण च त्रिप्रकारतया विश्वस्य गमनं चालयति। तथा हि -वायोः शरीरम्;आत्मनः भोगस्य आयतनं शरीरम्। सुख- दुःखयोः साक्षात्कारः, नाम सुख-दुःखयोः अनुभवः= भोगः। तस्य अयम् अर्थः। आत्मनः, सुखस्य अनुभूतिः जायते। दुःखस्य अनुभूतिः अपि जायते।एवम् आत्मनः जायमानयोः सुख-दुःखयोः अनुभूतिः = अनुभवः एव भोगपदेन व्यवहृतः भवति। सुख-दुःखयोः अनुभवस्य आयतनम् = निलयम्, स्थानम्, यत् अस्ति तदेव शरीरम् इति उच्यते। प्रकृते वायुलोके विद्यमानानां शरीरं वायु परमाणुभ्यः एव निर्मितम् अस्ति। तदेवं वायुलोक-वासिनः वायुमयं शरीरं धरन्ति। इदं शरीरम् अयोनिजं च भवति।

त्वगिन्द्रियम्

**(मूलम् )** इन्द्रियं स्पर्शग्राहकं त्वक्, सर्वशरीरवृत्तिः।

**(विवरणम्)** इदं वाक्यं, अनित्यवायोः त्रैविध्ये त्वगिन्द्रियस्वरूपं निरूपयति। ज्ञानकारणमनस्संयोगाश्रयम् इन्द्रियम्। तस्य अयम् अर्थः। विश्वं प्रकृत्यात्मकम्। प्रकृतिः पञ्चभिः भूतैः सङ्कलिता सती, लोकोपकाराय प्रवर्तते। पञ्चानां च भूतानां प्रत्येकतः लोकोपकारकगुणाः विद्यन्ते। एतेषां लोकोपकारकगुणानां ज्ञानम् अस्माभिः = पुरुषैः, प्राप्तव्यम् अस्ति। तादृशज्ञानप्रापणस्यैव प्रत्यक्षम् इति व्यवहारः अस्ति। गुणानां ज्ञानस्य प्राप्त्यै (= अनुभवाय अथवा साक्षात्काराय ) शरीरे निबद्धं

परिकरम्= साधनम्, एव इन्द्रियं भवति। प्रकृते- वायौ विद्यमानः लोकोपकारकः गुणः अनुष्ण-अशीतस्पर्शः । वायौ विद्यमानस्य एतस्य अनुष्ण-अशीतस्पर्शगुणस्य ज्ञानम् अस्माभिः आप्तव्यम् अस्ति। तत्प्रापणाय शरीरे उपनिबद्धं परिकरम्= इन्द्रियम्, त्वगिन्द्रियम् ,नाम चर्म। तदेवं वायौ सम- वायसम्बन्धेन विद्य- मानस्य अनुष्ण-अशीतस्पर्शगुणस्य साक्षात्कारसाधनं, ज्ञानप्राप्तिपरिकरम् एव इन्द्रियं त्वगिन्द्रियम्। त्वगिन्द्रियं अनुष्ण-अशीतस्पर्शस्य प्रत्यक्षम् (= अनुभवम् अथवा साक्षात्कारम्) जनयति। त्वगिन्द्रियम्, शरीरम् सर्वम् अभिव्याप्य वर्तते। नाम स्पर्शः शरीरे सर्वत्र वर्तते। सर्वं शरीरं स्पर्शं जानाति = स्पर्शं गृह्णाति।

**विषयवायोः स्वरूपम्**

**(मूलम्)** विषयो वृक्षादिकम्पनहेतुः वायुः। शरीरान्तस्संचारी वायुः प्राणश्च। स चैकोऽपि उपाधिभेदात् प्राण- अपानादिसंज्ञां लभते।

**(विवरणम्)** वृक्षादीनां कम्पनाय हेतुभूतः यः वायुः विद्यते सः विषयः (वायुः) भवति। शरीरस्य अन्तः यः वायुः सञ्चरति, सः विषयवायोः एव अन्यतमः कश्चन भेदः। सः प्राणः इति नाम्ना प्रसिद्धिम् आप्नोति। सः च यद्यपि एकः एव, तथापि उपाधिभेदम् उशरीरे सञ्चरणप्रदेशम् अनुसृत्य १).प्राणवायुः २).अपानवायुः ३) व्यानवायुः ४).उदानवायुः ५).समानवायुः इत्यादिनाम्ना व्यवहृतः भवति।

**हृदि प्राणः, गुदे अपानः, समानः नभिसंस्थितः।**
**उदानः कण्ठदेशस्थः, व्यानः सर्वशरीरगः।।**

इत्ययं श्लोकः पञ्चानाम् अपि वायूनां स्वभावं निरूपयन्ति।

**स्वावलोकनप्रश्नाः**

१). वायुसम्बन्धि इन्द्रियं किम् ?

२). शरीरान्तः सञ्चारी वायुः कः ?

३). वायोः शरीरं कुत्र ?

**३.२.३.५.द्रव्याणि > आकाशम् (Space/Sky)**

**(मूलम्)** शब्दगुणकम् आकाशम्। तच्च एकम्, विभु , नित्यम् ।

**(विवरणम्)** इदं वाक्यं आकाशस्य स्वरूपं स्वभावं च निरूपयति।

**आकाशस्य लक्षणम्;**

रूपं गन्धो रसः स्पर्शः स्नेहः सांसिद्धिको द्रवः।

बुद्ध्यदिभावनान्ताश्च शब्दो वैशेषिका गुणाः। अत्र कारिकायां विशेषगुणाः परिगणिताः। एतेषु विशेषगुणेषु शब्दः (SOUND) अन्यतमः। शब्दः (SOUND) गुणः यस्य/ यस्मिन् तत् शब्दगुणकम् । मूलवाक्ये गुणपदम्, एकस्य विशेषगुणस्य शब्दस्यैव अधिकरणम् इति अर्थं बोधयति। शब्दः (SOUND) आधेयः। आकाशम् अधिकरणम्। समवायः सम्बन्धः। तथा च यस्मिन् द्रव्ये (अधिकरणे ), शब्दः (SOUND) समवायसम्बन्धेन आधेयतया वर्तते तत् द्रव्यम् (अधिकरणम्) आकाशम् इति कथ्यते।

आकाशम् एकम्। अनेन समानः द्वितीयः न अस्ति। आकाशस्य अवान्तरभेदाः न सन्ति। नाम एकात्मनैव उअखण्डतया बुद्धिगोचरः भवति। किञ्च एतत् आकाशं विभु च। विभुत्वं च सर्वमूर्तद्रव्यसंयोगित्वम् पृथिव्यादि- चतुष्टयं मनश्च मूर्तद्रव्याणि। तस्य अयम् अर्थः। १.पृथिवी (भूमिः/EARTH) २.अप् (जलम्/ WATER ) ३.तेजः (कान्तिः/LIGHT) ४.वायुः (मरुत् /AIR) (पृथिव्यादिचतुष्टयम्) अ मनः (MIND) एतानि पञ्च मूर्तद्रव्याणि इति उच्यन्ते। क्रियाश्रयत्वं मूर्तद्रव्याणां लक्षणम्। एतेषां सर्वेषां मूर्तद्रव्याणां संयोगं प्राप्य अवस्थानं यत् विद्यते तदेव विभुशब्देन व्यवहृतं भवति। किञ्च इदम् आकाशं नित्यम्, नाम आकाशस्य उत्पत्तिः न भवति, विनाशः अपि न विद्यते, आकाशस्य आद्यन्तौ च न भवतः,अयं परिणामम् अप्राप्य कालत्रये अपि तथैव अवतिष्ठते, अपि च अनादिकालप्रवाहप्रयातं सत् वर्तते।

**स्वावलोकनप्रश्नाः**

१). नित्यं नाम किम् ?

२). विभु नाम किम् ?

३). आकाशम् एकम् इत्यस्य अर्थः कः ?

३.२.३.६.द्रव्याणि > कालः(Time)

(मूलम्) अतीतादिव्यवहारहेतुः कालः। सा च एका, विभ्वी , नित्या च

(विवरणम्) इदं वाक्यं कालस्य स्वरूपम् बोधयति।

कालस्य लक्षणम्; व्यवहारः नाम शब्दप्रयोगः, भाषणादि। यस्य कस्यापि अर्थस्य सिद्धिः=वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। अयम् एति=गच्छति (Present Tense) इति कश्चन व्यवहारः विद्यते । अयम् अतीतः=गतः (Past Tense) इत्यपि अपरः व्यवहारः अस्ति।अयम् अनागतःउन आगतः (Past-Negative),इत्यपि अन्यः व्यवहारः वर्तते खलु। एतादृशानां व्यवहाराणां कारणभूतं द्रव्यं किम् इति आकाङ्क्षायां समाधानतया योग्यः कश्चन पदार्थः उपस्थितः भवति। सः एव 'कालः' इति कथ्यते। अयं कालः अखण्डः । अतः एकः इति व्यवहृतः भवति।

किञ्च अयं कालः विभुः च। विभुत्वं च सर्वमूर्तद्रव्यसंयोगित्वम्, पृथिव्यादिचतुष्टयं मनश्च मूर्तद्रव्याणि। तस्य अयम् अर्थः। १.पृथिवी (भूमिः/ EARTH) २.अप् (जलम्/ WATER ) ३.तेजः (कान्तिः/LIGHT) ४.वायुः (मरुत् /AIR) (पृथिव्यादिचतुष्टयम्) मनः (MIND) एतानि पञ्च मूर्तद्रव्याणि इति उच्यन्ते। क्रियाश्रयत्वं मूर्त- द्रव्याणां लक्षणम्। एतेषां सर्वेषां मूर्तद्रव्याणां, संयोगं प्राप्य अवस्थानं यत् विद्यते तदेव विभुशब्देन व्यवहृतं भवति। प्रकृते कालः, सर्वान् अपि मूर्तद्रव्याणि व्याप्य (संयोगं प्राप्य) वर्तते। एकस्मिन् एव समये सर्वैः उपलभ्यः भवति। किञ्च अयं कालः नित्यः, नाम कालस्य उत्पत्तिः न भवति, विनाशः अपि न विद्यते, कालस्य आद्यन्तौ च न भवतः,अयं परिणामम् अप्राप्य भूत-भविष्यत्-वर्तमानेषु तथैव अवतिष्ठते, अपि च अनादिप्रवाहप्रयातं सत् वर्तते।

**स्वावलोकनप्रश्नाः**

१) कालं कथम् अवगन्तुं शक्नुमः ?

२) शब्दप्रयोगः कः ?

३.२.३.७.द्रव्याणि > दिक् (Direction)

**(मूलम्)** प्राच्यादि-व्यवहार-हेतुः दिक्। सा च एका, विभ्वी , नित्या च।

**(विवरणम्)** इदं वाक्यं दिशः स्वरूपं बोधयति।

दिशः लक्षणम्; व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः= वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यं भवति। इयम् पूर्वा (East),अयं प्राच्यः, इयम् पश्चिमा (West), अयं पाश्चात्यः , इयम् उत्तरा (North), अयम् उदीच्यः, इयम् दक्षिणा (South) अयं दाक्षिणात्यः इति एते व्यवहाराः केचन वर्तन्ते। तादृशव्यवहाराय हेतुभूतं द्रव्यं किम् इति आकांक्षायां समाधानतया योग्यः कश्चन उपस्थितः भवति। सा एव ' दिक्' इति कथ्यते।

इयम् अखण्डा एका । तस्याः अयम् अर्थः। प्राची, प्रतीची,दक्षिणा, उत्तरा इत्येवं प्राच्यादयः दिशः प्रसिद्धाः। वस्तुतः उदयाचलसन्निहिता दिक् प्राची। अस्ताचलसन्निहिता दिक् प्रतीची। मेरुपर्वतसन्निहिता उदीची, मेरोः स्वव्यवहिता दिक् दक्षिणा इति चतस्रः दिशः प्रधानाः। परम् अत्र एक एव देशः, तत्पूर्ववासिनां पश्चिमः, तत्पश्चिमवासिनां पूर्वः, तत् दाक्षिणात्यानाम् उत्तरः, तत् औत्तराहानाञ्च दक्षिणः इत्येवं व्यवह्रियते। प्राच्यत्वादयः वस्तुधर्माः सापेक्षाः। एवं, दिक् तावत् अखण्डा, एकात्मना अवगन्तव्या अस्ति।समकाले सर्वेषाम् उपलब्धा भवति।

किञ्च इयं दिक् विभ्वी च।विभुत्वं च सर्वमूर्तद्रव्यसंयोगित्वम्, पृथिव्यादिचतुष्टयं मनश्च मूर्तद्रव्याणि। तस्य अयम् अर्थः। १.पृथिवी (भूमिः/EARTH) २.अप् (जलम्/ WATER) ३.तेजः (कान्तिः/LIGHT) ४.वायुः (मरुत् /AIR) (पृथिव्यादिचतुष्टयम्) मनः (MIND) एतानि पञ्च मूर्तद्रव्याणि इति उच्यन्ते। क्रियाश्रयत्वं मूर्त- द्रव्याणां लक्षणम्। एतेषां सर्वेषां मूर्तद्रव्याणां संयोगं प्राप्य अवस्थानं यत् विद्यते तदेव विभुशब्देन व्यवहृतं भवति। प्रकृते दिक् , सर्वान् अपि मूर्तद्रव्याणि व्याप्य (संयोगं प्राप्य) वर्तते। एकस्मिन् एव समये सर्वैः उपलभ्या भवति। किञ्च इयं दिक् नित्या,नाम दिशः उत्पत्तिः न भवति,विनाशः अपि न विद्यते, दिशः आद्यन्तौ च न भवतः, इयं परिणामम् अप्राप्य भूत-भविष्यत्-वर्तमानेषु अपि तथैव अवतिष्ठते,अपि च अनादिप्रवाहप्रयाता सती वर्तते।

**स्वावलोकनप्रश्नाः**

१) कीदृशैः व्यवहारैः दिशः स्वरूपम् अवगन्तुं शक्नुमः ?

२) मूर्तद्रव्याणि कानि ?

३.२.३.८.द्रव्याणि > आत्मा (Soul)

**(मूलम्)** ज्ञानाधिकरणमात्मा। स द्विविधः ; परमात्मा जीवात्मा चेति, तत्र ईश्वरः सर्वज्ञः परमात्मा एक एव जीवस्तु प्रतिशरीरं भिन्नः,विभुः, नित्यश्च।

**(विवरणम्)** इदं वाक्यं आत्मनः स्वरूपं स्वभावं च बोधयति।

आत्मनः लक्षणम्; ज्ञानस्य, अधिकरणम् , ज्ञानाधिकरणम्। ज्ञानस्य आश्रयभूतम् इत्यर्थः। ज्ञानवान् आत्मा इति वक्तव्ये ज्ञानाधिकरणम् इति आत्मनः लक्षणकथनम्, आत्मनि समवायसम्बन्धेन ज्ञानं वर्तते इति अवगमनाय इति अवधेयम्। ज्ञानम् आधेयः। आत्मा अधिकरणम्। समवाय सम्बन्धः। समवायसम्बन्धेन ज्ञानं यत्र आधेयतया विद्यते तत् 'आत्मा' इति कथ्यते। अयं द्रव्येषु अन्यतमः, अष्टमः च। अयम् आत्मा जीवात्मा परमात्मा इति द्विविधः। तत्र परमात्मा ईश्वरः; अयं सर्वं जानाति इति सर्वज्ञः। अयम् एकः; स एव सर्वेः अभिगम्यः भवति। सुखरहितः, दुःखरहितः च अयं निर्गुणः।जीवात्मा प्रतिशरीरं भिन्नः भवति। जीवात्मा अपि विभुः; सर्वत्र व्याप्य वर्तते। अयम् अपि नित्यः; उत्पत्ति-विनाशशून्यः।

**स्वावलोकनप्रश्नाः**

१) आत्मनि समवायसम्बन्धेन किं वर्तते ?

२) आत्मा कतिविधः ?

३.२.३.९.द्रव्याणि > मनः(Mind)

(मूलम्)सुखाद्युपलब्धिसाधनम् इन्द्रियं मनः। तच्च प्रत्यात्मनियतत्वात् अनन्तम्,परमाणुरूपम्, नित्यं च।

मनसः लक्षणम्; सामान्यतः सर्वेषाम्, इष्टं सुखं जनयति। कष्टं दुःखं च जनयति। इष्टं सुखं वा कष्टं दुःखं वा जनयति इत्युक्ते सुखम् सन्तोषानुभूतिं जनयति, दुःखं

शोकानुभूतिं जनयति इत्यर्थः। एवं सुखानुभूतेः वा ,दुःखानुभूतेः वा प्रप्तिसाधनं किञ्चित् विद्यते, तस्य एव सुख-दुःखयोः अनुभूतिसाधनम् इति व्यवहारः। एवं सुख-दुःखसाधनं सत् ज्ञानकारणमनस्-संयोगस्य च आश्रयं (=इन्द्रियम्) 'मनः'इति कथ्यते।इदं च मनः एकैकस्य जीवात्मनः एकैकं भवति। अतः मनः अनन्तम् । कश्चन यत्किमपि वस्तु पश्यतिउप्रत्यक्षं करोति इत्यत्र कश्चन क्रमः अस्ति । प्रथमतः आत्मा मनसा युज्यते। मनः स्वातिरिक्तैः इन्द्रियैः मिलति। तानि इन्द्रियाणि वस्तुसम्बन्धं यान्ति। ततः वस्तुनः साक्षात्कारः अनुभूयते । अस्मिन् क्रमे वस्तुनः साक्षात्कारस्य अवाप्तये कारणभूतः यः आत्मना सह संयोगः, तत्संयोगाश्रयम् इन्द्रियं मनः इत्यर्थः। इदम् अपि नित्यम्; उत्पत्ति-विनाशशून्यम्। अपि च इदं परमाणुरूपतया वर्तते।

**स्वावलोकनप्रश्नाः**

१) सुखाद्युपलब्धिः नाम का ?

२) कश्चन यत्किमपि वस्तु पश्यतिउप्रत्यक्षं करोति इत्यत्र विद्यमानः क्रमः कः ?

## ३.३.उपसंहारः

एवम् अत्र द्रव्यसामान्यलक्षणं सूचितम्। नवानां द्रव्याणां प्रत्येकं लक्षणम् उक्तम्। स्थूलः विभागश्च प्रदर्शितः। नित्यत्व-अनित्यत्व-विभुत्वादीनां लक्षणानि प्रोक्तानि।शरीर-इन्द्रिय-विषय विभागश्च दर्शितः। आत्मनः द्वैविध्यं च प्रतिपादितम्। आद्याः चत्वारः नित्यत्व- अनित्यत्व भेदवन्तः,अन्त्याः पञ्च नित्यत्व- विभुत्वभेदवन्तश्च।

## ३.४.अभ्यासः

अ).तेजसः लक्षणम् उक्त्वा तदीयान् भेदान् निरूपयत ?

इ).आत्मनः लक्षणं किम् ? तदीयान् भेदान् निरूपयत ?

उ).वायोः लक्षणं किम् ? तदीयान् भेदान् निरूपयत ?

* * *

# UNIT-IV
# गुणाः

## संरचना

४.०. परिचयः

४.१. लक्ष्याणि

४.२. गुणाः

- ४.२.१. गुणाः > निर्वचनम्
- ४.२.२. गुणाः > परिगणनम्
- ४.२.३. गुणाः > प्रत्येकं लक्षणानि
  - ४.२.३.१. गुणाः > रूपम् (Colour / Shape)
  - ४.२.३.२.गुणाः > रसः (Savour)
  - ४.२.३.३.गुणाः > गन्धः (Odour )
  - ४.२.३.४.गुणाः > स्पर्शः (Tangibility)
  - ४.२.३.५.गुणाः > सङ्ख्या (Number )
  - ४.२.३.६.गुणाः > परिमाणम् (Dimension )
  - ४.२.३.७.गुणाः > पृथुक्त्वम् (Severalty)
  - ४.२.३.८.गुणाः > संयोगः (Cojunction)
  - ४.२.३.९.गुणाः > विभागः (Disjunction)
  - ४.२.३.१०.गुणाः > परत्वम् (Priority)
  - ४.२.३.११.गुणाः > अपरत्वम् (Posteriority)
  - ४.२.३.१२.गुणाः > गुरुत्वम् (Weight)
  - ४.२.३.१३.गुणाः > द्रवत्वम् (Fluidity)
  - ४.२.३.१४.गुणाः > स्नेहः (Viscidity)
  - ४.२.३.१५.गुणाः > शब्दः (Sound)
  - ४.२.३.१६.गुणाः > अवगमनम् (Understanding)

१६.१.बुद्धिः > स्मृतिज्ञानम्

१६.२.बुद्धिः > अनुभवज्ञानम्

१६.२.१.बुद्धिः > अनुभवज्ञानम् > यथार्थानुभवज्ञानम्

१६.२.२.बुद्धिः > अनुभवज्ञानम् > अयथार्थानुभवज्ञानम्

१६.२.४.बुद्धिः > अनुभवज्ञानम् > यथार्थानुभवज्ञानस्य भेदाः (चातुर्विध्यम्)

१६.२.५.बुद्धिः > अनुभवज्ञानम् > अयथार्थानुभवज्ञानस्य भेदाः (त्रैविध्यम्)

१६.२.५.१.बुद्धिः> अनुभवज्ञानम् >अयथार्थानुभवज्ञानस्य भेदाः-> संशयः

१६.२.५.२.बुद्धिः>अनुभवज्ञानम् > अयथार्थानुभवज्ञानस्य भेदाः- > विपर्ययः

१६.२.५.३.बुद्धिः>अनुभवज्ञानम् > अयथार्थानुभवज्ञानस्य भेदाः-> तर्कः

१६.२.५.३.बुद्धिः > स्मृतिज्ञानम् भेदाः

४.२.३.१७.गुणाः > सुखम्(Pleasure)

४.२.३.१८.गुणाः > दुःखम्(Pain)

४.२.३.१८.गुणाः > इच्छा(Desire)

४.२.३.२०.गुणाः > द्वेषः (Aversion)

४.२.३.२१.गुणाः > यत्नः (Effort)

४.२.३.२२.गुणाः > धर्मः (Merit)

४.२.३.२३.गुणाः > अधर्मः (Demerit)

४.२.३.२४.गुणाः > संस्कारः (Faculty)

४.३.उपसंहारः

४.४.अभ्यासः

## ४.०. परिचयः

तर्कशास्त्रं पदार्थविश्लेषणशास्त्रम्।पदार्थनिरूपणं पदार्थविभागश्च अत्र प्रधानतया प्रवर्तते। कञ्चन समानधर्मं पुरस्कृत्यैव पदार्थविभागः प्रचलति।पदार्थाश्च सप्तधा विभक्ताः। द्रव्य-गुण-कर्म-सामान्य -विशेष -समवाय -अभावाः सप्त पदार्थाः।प्रकृते अस्मिन् पाठ्यांशे गुणानां चर्चा प्रचलति। गुणानां सामान्यधर्मः कः ? गुणाः कति ? कः गुणः कस्मिन् वर्तते ? गुणः केन सम्बन्धेन वर्तते ? इत्येतेषाम् अंशानां स्थूलः परिचयः अत्र भवति।

## ४.१. लक्ष्याणि

आश्रयत्वम्, आधेयत्वम्, गतिशालित्वम्, समानत्वम्, भिन्नत्वम्, वस्तुनः अविद्यमानत्वम् (=अदर्शनम्) इत्येते पदार्थविभजनकारकाः सामान्यधर्माः भवन्ति। तत्र आधेयत्वम् पुरस्कृत्य कश्चन पदार्थविभागः प्रवृत्तः। सः एव गुणविभागः भवति। गुणाः द्रव्यम् एव आश्रित्य तिष्ठन्ति। गुणाः द्रव्यम् आश्रित्य तिष्ठन्तः

द्रव्याणां पदार्थान्तसम्बन्धं निर्धारयन्ति।एवं गुणानाम् आधेयत्वं प्रधानः धर्मः ।यः ध्रियतेउ ध्रियते, धार्यते, वा आधेयः भवति। इमम् एव सामान्यधर्मं पुरस्कृत्य द्रव्याश्रितत्वं गुणानां सामान्यलक्षणं कथयन्ति। चतुर्विंशतिगुणाः सन्ति ।तत्र एकैकस्य गुणस्य पृथक् लक्षणं किं भवति ? कः गुणः कं द्रव्यम् आश्रित्य तिष्ठति। गुणः द्रव्यं केन सम्बन्धेन आश्रित्य तिष्ठति ? एकैकस्य गुणस्य स्वभावः कः ? एकैकस्य गुणस्य प्रत्येकतः कीदृशः विभागः वर्तते ? इत्येतदंशानां बोधनम् अत्र प्रधानतया उद्दिष्टम्। एतत्पाठ्यांशस्य अध्ययनेन —

- गुणसमान्यलक्षणम् अवगन्तुं पारयति।
- चतुर्विंशतिगुणानां स्वरूपं स्वभावं च पठितुं पारयति।
- गुणानां द्रव्यवृत्तित्वं प्रति लिखितुं समर्थः भवति।
- आत्मगुणान् अवगच्छति।
- विशेषगुणान् ज्ञातुं समर्थो भवति।

## ४.२. गुणाः

४.२.१. गुणाः - निर्वचनम्

द्रव्याश्रितत्वं गुणानां सामान्यलक्षणं भवति।गुणाः आधेयतास्वभावाः।आधेयत्वं तेषां प्रधानः धर्मः।गुणाः सदा स्वभावेन किञ्चित् द्रव्यम् आश्रित्य एव अवतिष्ठन्ते।द्रव्यम् अनाश्रित्य स्वतन्त्रतया गुणाः स्थातुं नैव प्रभवन्ति। एते च गुणाः गुणान्तरेषु नैव तिष्ठन्ति। क्रियाम् अपि नैव आश्रयन्ति। अत एव एते गुणाः निर्गुणाः निष्क्रियाश्च अभिवर्ण्यन्ते।।

### ४.२.२. गुणाः- परिगणनम्

१रूपम्(Colour / Shape) २.रसः (Savour) ३ गन्धः(Odour) ४.स्पर्शः(Tangibility) ५.सङ्ख्या (Number)६. परिमाणम् (Dimension) ७.पृथुक्त्वाम् (Severalty),८.संयोगः(Cojunction)९.विभागः(Disjunction),१०.परत्व (Priority) ११.अपरत्व(Posteriority),१२.गुरुत्वम् (Weight),१३.द्रवत्वम् (Fluidity,) १४. स्नेहः (Viscidity)१५.शब्दः (Sound) १६.बुद्धिः (Understanding), १७.सुखम् (Pleasure),१८.दुःखम् (Pain),१९.इच्छा (Desire) २०.द्वेषः (Aversion), २१.यत्नः (Effort),२२.धर्मः (Merit),२३.अधर्मः (Demerit),२४.संस्कारः (Faculty), इति गुणाः चतुर्विंशतिः भवन्ति।

### ४.२.३. गुणाः - प्रत्येकं लक्षणानि

**४.२.३.१.गुणाः > रूपम् (Colour / Shape)**

(मूलम्)चक्षुर्मात्रग्राह्यः गुणःरूपम्। तच्च शुक्ल-नील-पीत-रक्त-हरित-कपिश-चित्रभेदात् सप्तविधम्। पृथिवी-जल- तेजोवृत्ति।तत्र पृथिव्यां सप्तविधम्, अभास्वरशुक्लं जले। भास्वरशुक्लं तेजसि।

(विवरणम्) इमानि वाक्यानि रूपस्य स्वभावं सप्रभेदं निरूपयन्ति।

रूपस्य लक्षणम्;चक्षुः एव चक्षुर्मात्रम्। चक्षुर्मात्रेण ग्राह्यः चक्षुर्मात्रग्राह्यः। अत्र चक्षुश्च चक्षुरिन्द्रियम् ।मात्रेण इत्यत्र मात्रशब्दः इतरव्यावृत्तिं बोधयति। तृतीया जन्यत्वरूपम् अर्थं बोधयति। ग्राह्यः इत्यत्र ग्रहधातोः प्रत्यक्षम् अर्थः। तदुत्तरवर्तिनः कृत् प्रत्ययस्य विषयत्वम् अर्थः। मानवस्य ज्ञानजनकानि साधनानि पञ्च। तेषाम् एव ज्ञानेन्द्रियाणि इति व्यवहारः अस्ति । तेषु चक्षुरिन्द्रियम् अन्यतमम्। चक्षुरिन्द्रियेण जायमानं किञ्चित् आकारकं(One type) ज्ञानं वर्तते। चक्षुरिन्द्रियेण जायमाने ज्ञाने यत् विषयं भवति , तदेव रूपम् इति उच्यते। अस्यैव आंग्लभाषायां (Colour / Shape) इति व्यवहारः अस्ति।

रूपस्य भेदाः इदं च रूपं १).शुक्लम् २).नीलम् ३).पीतम् ४).रक्तम् ५).हरितम् ६). कपिशम् ७).चित्रम् इति सप्तविधं भवति।इदं सप्तविधं रूपं पृथिव्यां उपलभ्यते। जले तु अभास्वरशुक्लमेव लभ्यते। तेजसि एकं भास्वरशुक्लमेव प्राप्यते।

**स्वावलोकनप्रश्नाः**

१) रूपं केन इन्द्रियेण गृह्यते ?

२)भास्वरशुक्लं कुत्र प्राप्यते ?

**४.२.३.२.गुणाः > रसः (Savour)**

(मूलम्) रसनाग्राह्यः गुणः रसः । सः च १).मधुर, २).आम्ल, ३).लवण, ४).कटु, ५).कषाय, ६).तिक्त, भेदात् षड्विधः। पृथिवी-जलवृत्तिः। पृथिव्यां षड्विधः। जले मधुर एव।

(विवरणम्) इमानि वाक्यानि रसस्य स्वभावं सप्रभेदं निरूपयन्ति।

रसलक्षणम् ; रसना च रसनेन्द्रियम्। रसनया ग्राह्यः रसनाग्राह्यः। अत्र रसना नाम

जिह्वा। तदुत्तरवर्तितृतीया जायमानम् इत्यर्थं बोधयति। ग्राह्यः इत्यत्र ग्रहधातोः प्रत्यक्षम् अर्थः।तदुत्तरवर्तिनः कृत् प्रत्ययस्य विषयत्वम् अर्थः। मानवस्य ज्ञानजनकानि साधनानि पञ्च। तेषाम् एव ज्ञानेन्द्रियाणि इति व्यवहारः अस्ति । तेषु रसनेन्द्रियम् अन्यतमम्। रसनेन्द्रियेण जायमानं किञ्चित् आकारकं ज्ञानं वर्तते। तथा रसनेन्द्रियेण जायमाने ज्ञाने यः विषयःउआस्पदः, भवति , सः एव व रसः इति उच्यते। अस्यैव आंग्लभाषायां (Savour / Taste)इति व्यवहारः अस्ति। आहत्य यः रसनेन्द्रियजन्यप्रत्यक्षे विषयः भवति , सः गुणः, रसः भवति।

रसस्य भेदाः अयं च रसः १).मधुर २).आम्ल ३).लवण ४).कटु ५).कषाय ६).तिक्त-भेदेन इतिषड्विधः भवति। अयं च रसः पृथिव्याम् उपलभ्यते। जले च उपलभ्यते। तत्रापि पृथिव्यां षड्विधः अपि रसः प्राप्यते। जले तु एकः मधुरः एव लभ्यते।

**स्वावलोकनप्रश्नाः**

१).रसना नाम का ?

२).रसः कुत्र कुत्र उपलभ्यते ?

**४.२.३.३.गुणाः > गन्धः (Odour )**

(मूलम्) घ्राणग्राह्यः गुणः गन्धः । सः च द्विविधः १).सुरभिः, २).असुरभिः च, पृथिवीमात्रवृत्तिः।

(विवरणम्) इमानि वाक्यानि गन्धस्य स्वभावं सप्रभेदं निरूपयन्ति।

गन्धस्य लक्षणम् ; घ्राणं नाम घ्राणेन्द्रियम्। घ्राणेन ग्राह्यः घ्राणग्राह्यः। घ्राणं च नासिका । तदुत्तरवर्ति- तृतीया जायमानम् इति अर्थं बोधयति। ग्राह्यः इत्यत्र ग्रहधातोः प्रत्यक्षम् अर्थः। तदुत्तरवर्तिनः कृत् प्रत्ययस्य विषयत्वम् अर्थः। मानवस्य ज्ञानजनकानि साधनानि पञ्च। तेषाम् एव ज्ञानेन्द्रियाणि इति व्यवहारः अस्ति। तेषु घ्राणेन्द्रियम् अन्यतमम्। घ्राणेन्द्रियेण जायमानं किञ्चित् आकारकं (One type) ज्ञानं वर्तते। तथा घ्राणेन्द्रियेण जायमाने ज्ञाने यः विषयः भवति, सः गुणः, गन्धः इति उच्यते। अस्यैव आंग्लभाषायां (Odour / Smell) इति व्यवहारः अस्ति।

गन्धस्य भेदाः अयं च गन्धः १).सुरभिः २).असुरभिः इति भेदेन द्विविधः भवति।

अत्र सुरभिपदं घ्रातुम् अर्हान् गन्धान् = गन्धवद्द्रव्याणि बोधयति। असुरभिपदं घ्राणाय अनर्हान् = गन्धाभाववद्द्रव्याणि बोधयति। एतत्- उभयविधः अपि गन्धः केवलं पृथिव्याम् एव वर्ततेउ उपलभ्यते।

**स्वावलोकनप्रश्नाः**

१) गन्धस्य प्रत्यक्षं केन जायते ?

२) गन्धः कतिविधः ?

३) गन्धः कुत्र कुत्र उपलभ्यते ?

**४.२.३.४.गुणाः > स्पर्शः (Tangibility / Touch)**

(मूलम्) त्वक्-इन्द्रियमात्रग्राह्यः गुणः स्पर्शः। सः च त्रिविधः १).शीत, २).उष्ण ३).अनुष्ण-अशीत भेदात्, पृथिवी -अप्-तेजो-वायु-वृत्तिः। तत्र शीतः जले, उष्णः तेजसि, अनुष्ण-अशीतः पृथिवी-वाय्वोः

(विवरणम्) इमानि वाक्यानि स्पर्शस्य स्वभावं सप्रभेदं निरूपयन्ति।

स्पर्शस्य लक्षणम्; त्वक्-इन्द्रियं नाम चर्मेन्द्रियम्। त्वक्-इन्द्रियम् एव त्वक्-इन्द्रियमात्रम्। मात्रपदम् इतराणां इन्द्रियाणां व्यावृत्तिं बोधयति। तदुत्तरवर्तितृतीया च जायमानरूपम् अर्थं बोधयति ।ग्राह्यः इत्यत्र ग्रहधातोः प्रत्यक्षम् अर्थः। तदुत्तरवर्तिनः कृत् प्रत्ययस्य विषयत्वम् अर्थः। मानवस्य ज्ञानजनकानि साधनानि पञ्च प्रसिद्धानि। तेषाम् एव ज्ञानेन्द्रियाणि इति व्यवहारः अस्ति। तेषु त्वक्-इन्द्रियम् अन्यतमम्। त्वक्-इन्द्रियेण जायमानं किञ्चित् आकारकं (One type) ज्ञानं वर्तते। तथा त्वक्-इन्द्रियेण जायमाने ज्ञाने यः विषयः भवति , सः गुणः, स्पर्शः इति उच्यते। अस्यैव आंग्लभाषायां (Tangibility / Touch) इति व्यवहारः अस्ति। आहत्य यः त्वक्-इन्द्रियजन्यप्रत्यक्षविषयः भवति, त्वग्भिन्नेन्द्रियजन्यप्रत्यक्षविषयः न भवति,सः गुणः, स्पर्शः भवति।

स्पर्शस्य भेदाः; अयं च स्पर्शः१).शीतस्पर्शः २).उष्णस्पर्शः २).अनुष्णाशीतस्पर्शःइति त्रिविधः विभागम् अर्हति। अयं च स्पर्शः पृथिव्याम्, जले, तेजसि, वायौ चतुर्षु च वर्तते = उपलभ्यते। तत्रापि शीतस्पर्शः केवलं जले एव लभ्यते। उष्णस्पर्शः केवलं तेजसि एव भवति। अनुष्णाशीतस्पर्शः पृथिव्याम् , एवं वायौ च उपलभ्यते।

**स्वावलोकनप्रश्नाः**

१).स्पर्शः कुत्र कुत्र उपलभ्यते ?

२).स्पर्शः कतिविधः ?

३).अनुष्णाशीतस्पर्शः कयोः द्वयोः समुपलभ्यते ?

(मूलम्)रूपादिचतुष्टयं पृथिव्यां पाकजम् अनित्यं च। अन्यत्र अपाकजं नित्यम् अनित्यं च। नित्यगतं नित्यम्, अनित्यगतम् अनित्यम् ।

(विवरणम्) इमानि वाक्यानि पाकज-अपाकजविवेकं बोधयन्ति।

एतावत्पर्यन्तंगुणेषु रूप-रस-गन्ध-स्पर्शाः निरूपिताः। तत्र एषु गुणेषु गन्ध-रस-रूप-स्पर्शाः पृथिव्याम्, रस-रूप-स्पर्शाः जले, रूप-स्पर्शौ तेजसि, स्पर्शः एकः एव वायौ इत्येवं यथायथं वर्तन्ते। इमे गुणाः पृथिव्यां पाकेनउतेजस्संयोगेन,जायन्ते। एवम् अनित्याश्च भवन्ति। जल-तेजो-वायुषु तु ते पाकेन न उत्पद्यन्ते। न वा विपरिणमन्ति। एवं तत्र परमाणुषु विद्यमानाः एते नित्याः ,अन्यत्र द्व्यणुकादौ विद्यमानास्तु अनित्याः भवन्ति।

पाकः;विजातीयतेजस्संयोगः पाकः। विलक्षणः तेजस्सम्बन्धः एव पाकः इति कथ्यते।तेन पूर्वरूपं नश्यति। रूपान्तरम् उत्पद्यते इत्यर्थः। पार्थिवस्सर्वोऽपि पदार्थः तेजस्संयोगेन परिणामं प्राप्नुवन् परिदृश्यते। तथा पाकेन परिणामं प्राप्तः एव पक्वः भवति। तेजस्संयोगः अयं तत्तत् वस्तु स्वरूप-स्वभावादिकम् अनुसृत्य भिन्न भिन्नः एव आवश्यकः भवति।यथा

वृक्षशाखासु अवस्थितानां आम्र-दाडिमादीनां सूर्यरश्मिभिः,तृणपुञ्जनिक्षिप्तानां तु तेषां तृणपुञ्जगतेन तेजसा, अन्तिकायाम् अधिश्रयिते स्थाल्यादौ तण्डुलादीनां तदधस्तनवह्निज्वालादिना, भुक्तस्य अन्नादेः जठराग्निना, एवं यथाकथम् अपि येन केनापि तेजसा संयोगे सत्येव ते पदार्थाः परिणामं प्राप्य परिपक्वाः भवन्ति। एवं

तृणपुञ्जनिक्षिप्तेषु आम्रादिषु केषुचित् पाकवशात् रूप-रस-गन्ध-स्पर्शाः सर्वे अपि विनूत्नाः जायन्ते, केषुचित् कतिचिदेव। अतः रूपादिपरिणाम-कारणीभूताः पाकाः भिन्नाः एव। नैकेन पाकेन तत् सर्वपरिवृत्तिः भवतीति स्वीक्रियते। एवं विलक्षणतेजस्संयोगः पाकः इति सिद्धान्तः।

### ४.२.३.५.गुणाः > सङ्ख्या(Number )

(मूलम्) एकत्वादिव्यवहारहेतुःसंङ्ख्या। नव द्रव्यवृत्तिः। एकत्वादि-परार्थपर्यन्ता। एकत्वं नित्यम् अनित्यं च, नित्यगतं नित्यम्, अनित्यगतम् अनित्यम्। द्वित्वादिकं तु सर्वत्र अनित्यम् एव।

(विवरणम्) इमानि वाक्यानि संङ्ख्यायाः स्वरूपं स्वभावम्, संङ्ख्यायाः स्थितिम्उसिद्धिम् (Existence), संङ्ख्यायाः विभागान् च निरूपयन्ति।

संख्यायाः लक्षणम् ;एकत्वम् आदिः यस्य सः एकत्वादिः। एकत्वादेः व्यवहारः एकत्वादिव्यवहारः। एकत्वादिव्यवहारस्य हेतुः एकत्वादिव्यवहारहेतुः। एकत्वादेः इत्यस्य द्वित्व-त्रित्वादीनि अर्थः। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः = वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति।हेतुः नाम असाधारणकारणम्। अयम् एकः, इमौ द्वौ, इमे त्रयः, (अयं प्रथमः, अयं द्वितीयः,अयं तृतीयः, अयं तृतीयः) प्रभृतयः व्यवहाराः केचन वर्तन्ते। तादृशव्यवहाराय हेतुः (असाधारणकारणम्) कः इति आकांक्षायां समाधानतया योग्यः कश्चन उपस्थितः भवति। सा एव 'संख्या' इति कथ्यते। तथा च अयम् एकः, इमौ द्वौ, इमे त्रयः इत्याकारकज्ञानजननाय कृतः यः व्यवहारः, तस्य च यत् (असाधारणकारणम्)हेतुः, सः, सङ्ख्या इति उच्यते। सदा वस्तुनिष्ठा एव सती, बुद्धौ उपारूढा भवति इति सङ्ख्या, गुणः भवति।इयं सङ्ख्या, पृथिवी-अप्-तेजो-वायु-आकाश-काल-दिक्-आत्म-मनस्सु नवसु द्रव्येषु वर्तते = व्यवहाराय उपयुक्ता भवति।

संख्यायाः भेदाः इयं च सङ्ख्या एकतः प्रारभ्य परार्थपर्यन्तं विद्यते। सर्वम् अपि सङ्ख्यातुं योग्यम् इत्यर्थः। तत्र एकत्वसङ्ख्या नित्या अनित्या चेति द्विविधा। नित्यद्रव्येषु= पृथिव्यादिचतुष्टयपरमाणुषु, आकाश-काल-दिक्- आत्मसु च विद्यमाना एकत्वसङ्ख्या नित्या एव भवति। कार्य(अनित्य) द्रव्येषु विद्यमाना एकत्वसङ्ख्या अनित्या भवति। द्वित्वादिसङ्ख्या तु सर्वत्र अनित्या एव।

**स्वावलोकनप्रश्नाः**

१).सङ्ख्या कुत्र कुत्र उपलभ्यते ?

२).सङ्ख्या कतिविधा ?

### ४.२.३.६.गुणाः > परिमाणम्(Dimension )

(मूलम्)मान-व्यवहार-असाधारणकारणम् परिमाणम्। नवद्रव्यवृत्तिः। तत् चतुर्विधम्; १).अणु, २).महत् ३).दीर्घम् ४). ह्रस्वं चेति।

(विवरणम्) इमानि वाक्यानि परिमाणस्य स्वभावम्,परिमाणस्य स्थितिम्उसिद्धिम् (Existence),परिमाणस्य प्रभेदान् च निरूपयन्ति।

परिमाणस्य लक्षणम्; मानस्य व्यवहारः,मानव्यवहारः। मानव्यवहारस्य असाधारणकारणम्, मानव्यव- हारासाधारणकारणम्। उन्मानम् (ऊर्ध्वमानम्), प्रमाणम् (दीर्घमानम्) द्रवमानम्, द्रव्यमानम्, कालमानम्, इत्यादेः मानम् इति नाम्ना प्रसिद्धिः अस्ति। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिःउ वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते, तत् । तदेव हेतुः इति नाम्ना वा, शास्त्ररीत्या करणम् इति नाम्ना वा कथ्यते। इदं महत्, (अयं महीयान्), इदं लघु, (अयं लघीयान्), अयं दीर्घः, (अयं दीर्घतरः) इत्याकारकः ज्ञानजनकशब्दप्रयोगः कश्चन अस्ति। तादृशव्यवहाराय हेतुभूतः (असाधारणकारणम् ) कः इति आकांक्षायां समाधानतया योग्यं किञ्चित् उपस्थितं भवति।तत् एव 'परिमाणम्' इति कथ्यते। इदं परिमाणं सदा वस्तुनिष्ठं एव सत्, बुद्धौ उपारूढं भवति इति परिमाणं, गुणः भवति। इदं परिमाणं, पृथिवी- अप्- तेजो- वायु- आकाश-काल-दिक्-आत्म-मनस्सु नवसु द्रव्येषु वर्तते = व्यवहाराय योग्यतया (Agreeably) उपयुक्तं भवति।

परिमाणस्य भेदाः इदं परिमाणं १).लघु, २).महत्, ३).दीर्घः, ४).ह्रस्वः इति चतुर्विधम्। एवं चतुर्विधम् अपि परम-मध्यम-भेदेन द्विविधम् परमलघुत्वं परमह्रस्वत्वं च परमाणु-मनसोः ज्ञातुं प्रभवामः। मध्यमलघुत्वं मध्यम- ह्रस्वत्वं च

द्व्यणुके उपलब्धुं शक्यते। परममहत्वं परमदीर्घत्वं च  गगनादौ द्रष्टुं पारयामः। मध्यममहत्वं, मध्यमदीर्घत्वं च घटादौ च बोद्धुं शक्नुमः।

**स्वावलोकनप्रश्नाः**

१).परिमाणं कुत्र कुत्र उपलभ्यते ?

२).परिमाणं कतिविधम् ?

### ४.२.३.७.गुणाः > पृथुक्त्वम्(Severalty)

(मूलम्) पृथक्-व्यवहार-असाधारणकारणम् पृथक्त्वम् । सर्वद्रव्यवृत्तिः।

(विवरणम्) इमानि वाक्यानि पृथक्त्वस्य  स्वभावम्, पृथक्त्वस्य स्थितिम् =सिद्धिम् (Existence) च  निरूपयन्ति।

पृथक्त्वस्य लक्षणम् ; पृथक्(भावस्य) व्यवहारः,पृथक्-व्यवहारः। पृथक्-व्यवहारस्य असाधारणं कारणम्, पृथक्-व्यवहार-असाधारणकारणम् इति लक्षणपरवाक्यस्य विग्रहः। पृथक् इत्यस्य अपोद्धारः अर्थः।  अपकृत्य = अवधिम् अपेक्ष्य, यः उद्धारःउनिर्धारणम् , सः अपोद्धारः। यत्किञ्चित् व्यक्तेः वा, यस्मात् कस्माच्चन वस्तुनः वा, समुदायात् वा, उद्धृत्य.स्थापनम् इति फलति। एवं  पृथक् पदम्  इदम् अस्मात् पृथक् इत्याकारकं पृथक्-भावरूपम् अर्थं बोधयति। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः = वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते तत् । तदेव हेतुः इति नाम्ना वा, शास्त्ररीत्या करणम् इति नाम्ना वा कथ्यते। इदम् अस्मात् पृथक्,अयम् अस्मात् पृथक् इति ज्ञानजननाय कृतः भाषणात्मकः कश्चन व्यवहारः वर्तते, यत् विना तत्-व्यवहारश्च नोपपद्यते तत्-व्यवहारहेतुभूतं (असाधारणकारणम्) भावम् एव पृथक्त्वम् इति उच्यते। इदं पृथक्त्वं सदा वस्तुनिष्ठं एव सत्, बुद्धौ उपारूढं भवति इति, पृथक्त्वं गुणः भवति। पृथिवी-अप्-तेजो-वायु - आकाश-काल-दिक्-आत्म-मनस्सु सर्वेषु नवसु द्रव्येषु वर्तते= व्यवहाराय योग्यतया(Agreeably) उपस्थितं भवति।

**स्वावलोकनप्रश्नाः**

१).पृथक्त्वस्य अवगतिः कया प्रसिद्ध्या भवति ?

२).पृथक्त्वं कुत्र कुत्र उपलभ्यते ?

### ४.२.३.८.गुणाः > संयोगः (Cojunction)

(मूलम्) संयुक्त-व्यवहार-हेतुः संयोगः । सर्वद्रव्यवृत्तिः।

(विवरणम्) इमानि वाक्यानि संयोगस्य स्वभावम्, संयोगस्य स्थितिम्उसिद्धिम् (Existence),संयोगस्य प्रभेदान् च निरूपयन्ति।

संयोगस्य लक्षणम् ; संयुक्तस्य व्यवहारः संयुक्तव्यवहारः, संयुक्तव्यवहारस्य हेतुः, संयुक्तव्यवहार हेतुः इति संयोगलक्षणपरवाक्यस्य विग्रहः। अत्र संयुक्तता नाम सहजतया एकत्र अवस्थातुम् असमर्थयोः द्वयोः कृत्रिमतया एकस्मिन् अधिकरणे संयोजनम्। एवं संयुक्तपदम् इमौ संयुक्तौ इत्याकारकं संयोजनरूपम् अर्थं बोधयति। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः= वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते तत् । तदेव हेतुः इति नाम्ना वा, शास्त्ररीत्या करणम् इति नाम्ना वा कथ्यते। इमौ संयुक्तौ इति ज्ञानजननाय कृतः भाषणात्मकः कश्चन व्यवहारः वर्तते, यत् विना तत्-व्यवहारश्च नोपपद्यते तत्-व्यवहारहेतुभूतः (असाधारणकारणम्) भावः एव संयोगः इति उच्यते।अयं संयोगः सदा वस्तुनिष्ठः एव सन्, बुद्धौ उपारूढः भवति इति, संयोगः गुणः भवति। अयं च संयोगगुणः पृथिवी-अप्-तेजो-वायु - आकाश-काल-दिक्-आत्म-मनस्सु सर्वेषु नवसु द्रव्येषु वर्तते उ व्यवहाराय योग्यतया(Agreeably) अन्वितः भवति।

संयोगस्य द्वैविध्यम्; संयोगः१).कर्मजः २).संयोगजश्च इति द्विविधः। आद्यःकर्मजः क्रियामाध्यमेन एकेनैव जायमानः संयोगः। यथा; हस्तक्रियया हस्त-पुस्तकसंयोगः। द्वितीयः संयोगजस्तु क्रिया-वस्तु सम्बन्धात् जायमानः संयोगः। यथा; हस्त-पुस्तक संयोगात् काय(शरीर)पुस्तकसंयोगः।

**स्वावलोकनप्रश्नाः**

१).संयुक्तता नाम का ?

२).संयोगः कुत्र कुत्र वर्तते ?

३).संयोगः कतिविधः ?

## ४.२.३.९.गुणाः > विभागः(Disjunction)

(मूलम्) संयोगनाशकः गुणः विभागः । सर्वद्रव्यवृत्तिः।

(विवरणम्)इमानि वाक्यानि विभागस्य स्वभावम्,विभागस्य स्थितिम्उसिद्धिम् (Existence),विभागभेदान् च निरूपयन्ति।

संयोगस्य लक्षणम् ; संयोगस्य नाशकः संयोगनाशकः इति विभागलक्षणपरवाक्यस्य विग्रहः। अत्र संयोगो नाम सहजतया एकत्र अवस्थातुम् असमर्थयोः द्वयोः कृत्रिमतया एकस्मिन् अधिकरणे संस्थापनम् अथवा संयोजनम्। नाशकः नाम भञ्जकः। संयोगस्य भञ्जकः भावः विभागः। विभागे चतस्रः अवस्थाः भवन्ति। ताः च क्रमेण १). विभजनक्रिया २). विभागः ३). ततः पूर्वदेशसंयोगनाशः ४). अन्यदेशसंयोगः। तथा च उत्तरदेशसंयोग -अनुकूलतया पूर्वदेशसंयोगस्य नाशःउ त्यागः यत्र प्रचलति सः विभागः इति उच्यते। अयं च संयोगस्य अभावरूप इति न मन्तव्यम् । कुत इति चेत् अभावः अदर्शनात्मकः, विभागः तु सत्तात्मकः। अयं विभागः सदा वस्तुनिष्ठः एव सन्, बुद्धौ उपारूढः भवति इति, विभागः गुणः भवति। अयं च विभागगुणः पृथिवी-अप्- तेजो-वायु- आकाश- काल-दिक्-आत्म-मनस्सु सर्वेषु नवसु द्रव्येषु वर्ततेउ व्यवहाराय योग्यतया (Agreeably) अन्वितः भवति।

विभागस्य द्वैविध्यम्; विभागः १).कर्मजः २).विभागजश्च इति द्विविधः। आद्यः कर्मजः केवलं क्रियामाध्यमेन जायमानः विभागः। यथा; हस्तनिष्ठक्रियया हस्त-पुस्तकविभागः। द्वितीयः विभागजस्तु क्रिया-वस्तुसम्बन्धात् जायमानः विभागः। यथा; हस्तनिष्ठक्रियया जायमानात् पुस्तक विभागात् काय(शरीर)पुस्तकविभागः।

**स्वावलोकनप्रश्नाः**

१).विभागः नाम कः ?

२).विभागः कुत्र कुत्र वर्तते ?

३).विभागः कतिविधः ?

**४.२.३.१०. : ११.गुणाः > परत्व-अपरत्वे (Priority&Posteriority)**

(मूलम्)पर-अपरव्यवहार-असाधारणकारणे परत्व-अपरत्वे। पृथिव्यादिचतुष्टय-मनोवृत्तिनी। ते द्विविधे; कालकृते, दिक्कृते चेति।दूरस्थे दिक्कृतं परत्वम्। समीपस्थे दिक्कृतम् अपरत्वम्। ज्येष्ठे कालकृतं परत्वम्। कनिष्ठे कालकृतम् अपरत्वम्।

(विवरणम्) इमानि वाक्यानि परत्व-अपरत्वयोः स्वभावम्,परत्व-अपरत्वयोः स्थितिम्उसिद्धिम् (Existence), परत्व- अपरत्वयोः भेदान् च युगपत् निरूपयन्ति। तत्र परत्व-अपरत्वयोः लक्षणपरवाक्यानि मिलित्वा सन्ति। विद्यार्थिनां सुलभतया अवगमनाय तानि वाक्यानि पृथक्कृत्य, परत्व-अपरत्वे प्रत्येकतः निरूप्येते।

गुणाः > परत्वम् (Priority)

(मूलम्)पर-व्यवहार-असाधारणकारणं परत्वम्। पृथिव्यादिचतुष्टय-मनोवृत्ति। तत् द्विविधम्; दिक्कृतं, कालकृतं चेति। दूरस्थे दिक्कृतं परत्वम्। ज्येष्ठे कालकृतं परत्वम्।

(विवरणम्) इमानि वाक्यानि परत्वस्य स्वभावम्,परत्वस्य स्थितिम्उसिद्धिम् (Existence), परत्वभेदान् च निरूपयन्ति।

परत्वस्य लक्षणम्;परस्य व्यवहारः परव्यवहारः परव्यवहारस्य असाधारणकारणम्, परव्यवहारासाधारणकारणम् इति परलक्षणपरवाक्यस्य विग्रहः। अत्र परशब्दस्य सावधिकं पूर्वत्वम् अर्थः। यत्किञ्चित् (काल)अपेक्षया पूर्वत्वं वा, यत्किञ्चित् देश (अपेक्षया) पूर्वत्वं वा अत्र परशब्देन उच्यते। यदि कालतः पूर्वत्वं विवक्षितं तदा परशब्दः पूर्वम् इत्यर्थं

बोधयति। यदि देशतः पूर्वत्वं विवक्षितं तदा परशब्दः दूरम् इत्यर्थं बोधयति। तथा च अत्र परशब्दः पूर्वम् दूरम् इत्यर्थद्वयं बोधयति। व्यवहारः नाम शब्दप्रयोगः,

भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः = वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते तत्। तदेव हेतुः इति नाम्ना वा, शास्त्ररीत्या करणम् इति नाम्ना वा कथ्यते। दूरव्यवहारस्य निमित्तं कारणम् परत्वम् इति फलति ।

कालार्थकाः व्यावहारिकप्रयोगाः ;इदम् अस्मात् (कालात्) परम् (=पूर्व(दूर)कालिकम्), इयम् अस्मात् (कालात्)परा (=पूर्व(दूर)कालिका), अयम् अस्मात् (कालात्) परः (=पूर्वः(दूर)कालिकः) इत्यादयः केचन कालार्थकाः व्यावहारिकप्रयोगाः सन्ति। देशार्थकाः व्यावहारिकप्रयोगाः ;इदम् (क्षेत्रम्) अस्मात् (प्रदेशात् ) परम् (=पूर्वम= दूरप्रदेशकम्), इयम् (कृष्णा) अस्मात् (प्रदेशात्) परा(=पूर्वा =दूरदेशिका), अयम् (पर्वतः) अस्मात् (प्रदेशात्) परः(=पूर्वः= दूरप्रदेशकः) इत्यादयः अपि केचन दूरदेशार्थकाः व्यावहारिकप्रयोगाः सन्ति। एतादृशानां व्यावहारिकप्रयोगाणाम् उपपत्त्यै हेतुभूतं दूरस्त्वम् एव अत्र परत्वम् इति कथ्यते।इदं परत्वं सदा सावधिकम् वस्तुनिष्ठं च एव सत्, बुद्धौ उपारूढं भवति इति, परत्वं गुणः भवति। इदं च परत्वं पृथिवी-अप्-तेजो-वायुषु , मनसि च वर्तते।

परत्वस्य द्वैविध्यम्; इदं च परत्वं १).दिक्कृतं,२).कालकृतं चेति द्विविधम्। दिशतः(Directionally)उप्रदेशतः दूरे विद्यमानं दिक्-कृतं परत्वं भवति। दाक्षिणात्यानां हिमालयेषु विद्यमानं परत्वं दिक्कृतपरत्वस्य उदाहरणंभवति। कालतः(Timely)दूरे विद्यमानं कालकृतं परत्वं भवति। ज्येष्ठे विद्यमानं परत्वं कालकृतपरत्वस्य उदाहरणं भवति।

**स्वावलोकनप्रश्नाः**

१).परत्वं नाम किम् ?

२).परत्वं कतिविधम् ?

### ४.२.३.११. गुणाः >अपरत्वम्(Posteriority)

(मूलम्)अपर-व्यवहार-असाधारणकारणम् अपरत्वम्। पृथिव्यादिचतुष्टय-मनोवृत्ति।

तत् द्विविधम्; दिक्कृतं, काल- कृतं चेति। समीपस्थे दिक्कृतम् अपरत्वम्। कनिष्ठे कालकृतम् अपरत्वम्।

(विवरणम्) इमानि वाक्यानि अपरत्वस्य स्वभावम्,अपरत्वस्य स्थितिम्उसिद्धिम् (Existence), अपरत्वभेदान् च निरूपयन्ति।

अपरत्वस्य लक्षणम् ; अपरस्य व्यवहारः अपरव्यवहारः अपरव्यवहारस्य असाधारणकारणम्, अपरव्यवहारासा- धारणकारणम् इति अपरलक्षणपरवाक्यस्य विग्रहः। अत्र अपरशब्दस्य सावधिकं सामीप्यम् अर्थः। (काल) अपेक्षया वा, देश (अपेक्षया) वा सामीप्यम् अत्र अपरशब्देन उच्यते। यदा कालतः देशतः वा सान्निध्यं वक्तुम् इच्छामः तदा अपरशब्दः सामीप्यम् इत्यर्थं बोधयति। तथा च अत्र अपरशब्दः कालसामीप्यं देशसामीप्यं च बोधयति। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः = वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते तत्। तदेव हेतुः इति नाम्ना वा, शास्त्ररीत्या करणम् इति नाम्ना वा कथ्यते। तथा च सामीप्य- व्यवहारस्य निमित्तं कारणम् अपरत्वम् इति फलति ।

कालार्थकाः व्यावहारिकप्रयोगाः ; इदम् अस्मात् (कालात्) अपरम् (=समीप(अदूर)कालिकम्), इयम् अस्मात् (कालात्) अपरा (=समीप(अदूर) कालिका), अयम् अस्मात् (कालात्) अपरः (उसमीप(अदूर) कालिकः) इत्यादयः केचन कालार्थकाः व्यावहारिकप्रयोगाः सन्ति।

देशार्थकाःव्यावहारिकप्रयोगाः ; इदम् (क्षेत्रम्) अस्मात् (प्रदेशात् ) अपरम् (=समीप(अदूर)प्रदेशकम्), इयम् (कृष्णा) अस्मात् (प्रदेशात्) परा(=समीप(अदूर)प्रदेशिका), अयम् (पर्वतः) अस्मात् (प्रदेशात्) परः(=समीप (अदूर) प्रदेशकः) इत्यादयः अपि केचन दूरदेशार्थकाः व्यावहारिकप्रयोगाः सन्ति। एतादृशानां व्यावहारिक- प्रयोगाणाम् उपपत्त्यै हेतुभूतं सामीप्यम् एव अत्र अपरत्वम् इति कथ्यते। इदम् अपरत्वं सदा सावधिकम् वस्तुनिष्ठं च एव सत् बुद्धौ उपारूढं भवति इति, अपरत्वं गुणः भवति। इदं च अपरत्वं पृथिवी-अप्-तेजो-वायुषु , मनसि च वर्तते।

अपरत्वस्य द्वैविध्यम् ; इदं च अपरत्वं १).दिक्कृतम् २).कालकृतं चेति द्विविधम्। दिशतःउ प्रदेशतः (Directionally) समीपे विद्यमानं दिक्-कृतम् अपरत्वं भवति।

दाक्षिणात्यानां (हिमालयापेक्षया)विन्ध्यादिषु विद्यमानम् अपरत्वं दिक्कृतापरत्वस्य उदाहरणं भवति। कालतः (Timely) समीपे विद्यमानं कालकृतं परत्वं भवति। मध्यमानां कनिष्ठापेक्षया ज्येष्ठे विद्यमानम् अपरत्वं कालकृतापरत्वस्य उदाहरणं भवति।

**स्वावलोकनप्रश्नाः**

१).अपरत्वं नाम किम् ?

२).अपरत्वं कतिविधम् ?

### ४.२.३.१२.गुणाः > गुरुत्वम्(Weight)

(मूलम्) आद्य-पतन- असमवायिकारणं गुरुत्वम्। पृथिवी-जलवृत्ति।

(विवरणम्) इमानि वाक्यानि गुरुत्वस्य स्वभावम्, गुरुत्वस्य स्थितिम् = सिद्धिम् (Existence) च निरूपयन्ति।

गुरुत्वस्य लक्षणम्; आद्यं च तत् पतनं च आद्यपतनम् । आद्यपतनस्य असमवायिकारणम् आद्यपतनासमवायि- कारणम्। आद्यपतनं नाम आद्यम् = प्रथमम्, पतनम् = विश्लेषणम्, प्रथमं विभजनम् अर्थः। पत् धातोः विश्लेषण-वियोजन-विभजन-प्रभृतयः अर्थाः सन्ति। विश्लेषण-वियोजन-विभजन-प्रभृतिषु क्रियासु प्रथमं विभजनम्, अनन्तरं विभागः, तदनन्तरं पूर्वदेशसंयोगनाशः, सर्वतः अन्ते उत्तरदेशसंयोगः इति क्रमः प्रचलति इति विभागगुणविवरणा- वसरे पठितम्। तस्मिन् क्रमे प्रथमा, पतनाय प्रवृत्ता या विभजनक्रिया, तस्याः विभजनक्रियायाः कारणभूतः यः वर्तते,वस्तुनिष्ठः भारः(heaviness / mass),सः एव गुरुत्वम् इति कथ्यते। आद्यपतनस्य गुरुत्वम् असमवायिकारणं भवति। तथा हि-फले पतनक्रिया, क्रिया-क्रियावतोः समवायः इति,समवायेन वर्तते। तत्कारणीभूतः गुरुत्वगुणः अपि, गुण-गुणिनोः समवायः इति समवायेनैव तत्र वर्तते। तथा च कार्येणउपतनेन, सह, एकत्र समवेतं सत् कारणं गुरुत्वं पतनस्य असमवायिकारणं भवति।इदम् गुरुत्वं सदा वस्तुनिष्ठम् एव सत् बुद्धौ उपारूढं भवति इति, गुरुत्वं गुणः भवति। इदं गुरुत्वं पृथिव्यां अप्सु च उपलभ्यते।

**स्वावलोकनप्रश्नाः**

१).गुरुत्वं नाम किम् ?

२).गुरुत्वं कुत्र उपलभ्यते ?

**४.२.३.१३.गुणाः > द्रवत्वम् (Fluidity)**

(मूलम्) आद्य-स्यन्दन- असमवायिकारणं द्रवत्वम्। पृथिवी-जल-तेजो-वृत्ति।

(विवरणम्) इमानि वाक्यानि द्रवत्वस्य स्वभावम्, द्रवत्वस्य स्थितिम्उसिद्धिम् (Existence) च निरूपयन्ति।

गुरुत्वस्य लक्षणम्;आद्यं च तत् स्यन्दनं च आद्यस्यन्दनम् । आद्यस्यन्दनस्य असमवायिकारणम् आद्यस्यन्दन -असमवायिकारणम्। आद्यस्यन्दनं नाम आद्यम्उ प्रथमम्, स्यन्दनम् = स्रवणम्, प्रथमं स्रवणम् अर्थः। स्यदि धातोः स्रवण-प्रवहन-प्रभृतयः अर्थाः सन्ति।स्रवण-प्रवहन-प्रभृतिषु क्रियासु प्रथमं स्रवणम्, अनन्तरं स्रावः, तदनन्तरं पूर्वदेशद्रव्यस्य विलयनम्, सर्वतः अन्ते उत्तरोत्तरदेशप्रापणम् इति क्रमः प्रचलति। अस्मिन् क्रमे प्रथमा, स्यन्दनाय प्रवृत्ता या स्रवणक्रिया, तस्याः स्रवणक्रियायाः कारणभूतः यः वर्तते, वस्तुनिष्ठः द्रवात्मकः गुणः (Fluidity), सः एव द्रवत्वम् इति कथ्यते । द्रवत्वम् आद्यस्यन्दनस्य असमवायिकारणम्। कार्यम्= स्यन्दनम्, क्रिया इति जलादौ समवायेन वर्तते। तत्कारणं द्रवत्वम् अपि गुणिनि तत्र समवायेनैव वर्तते इति आद्यस्यन्दनं प्रति द्रवत्वगुणः असमवायिकारणं भवति। इदम् द्रवत्वं सदा वस्तुनिष्ठम् एव सत् बुद्धौ उपारूढं भवति इति, द्रवत्वं गुणः भवति। इदं द्रवत्वं पृथिव्याम् अप्सु तेजसि च उपलभ्यते।

(मूलम्) तत् (द्रवत्वम्)द्विविधम् ; सांसिद्धिकं नैमित्तिकं च । सांसिद्धिकं जले, नैमित्तिकं पृथिवी- तेजसोः पृथिव्यां घृतादौ अग्निसंयोगजन्यं द्रवत्वम्। तेजसि द्रुतसुवर्णादौ।

(विवरणम्) इमानि वाक्यानि द्रवत्वस्य विभागं सविमर्शं निरूपयन्ति।

द्रवत्वस्य द्वैविध्यम्; द्रवत्वं च १).सांसिद्धिकम् २).नैमित्तिकं चेति द्विविधम्। सांसिद्धिकं द्रवत्वं नाम = स्वाभाविकं वा सहजसिद्धं वा भवति। सांसिद्धिकं द्रवत्वं जले

भवति। नैमित्तिकं द्रवत्वं नाम निमित्तवशात् जातं नाम कारणजन्यं भवति। अग्न्यादिनिमित्तवशात् जातं द्रवत्वम् इत्यर्थः। नैमित्तिकं द्रवत्वं पृथिव्यां तेजसि च वर्तते। आज्यादिषु अग्न्यादिनिमित्तवशात् जातं द्रवत्वं, पृथिवीगतं नैमित्तिकं भवति। सुवर्णादिषु अग्न्यादिनिमित्तवशात् जातं द्रवत्वं, तेजोगतं नैमित्तिकं भवति।

**स्वावलोकनप्रश्नाः**

१).द्रवत्वं नाम किम् ?

२).नैमित्तिकं कुत्र कुत्र उपलभ्यते ?

**४.२.३.१४.गुणाः > स्नेहः(Viscidity)**

(मूलम्) चूर्णादिपिण्डीभावहेतुः गुणः स्नेहः। जलमात्रवृत्ति।

(विवरणम्) इमानि वाक्यानि स्नेहस्य स्वभावम्, स्नेहस्य स्थितिम्उसिद्धिम् (Existence) च निरूपयन्ति।

स्नेहस्य लक्षणम्; चूर्णम् आदिः यस्य सः (समुदायः) चूरणादिः, चूर्णादेः पिण्डीभावः चूर्णादिपिण्डीभावः, चूर्णादिपिण्डीभावस्य हेतुः चूर्णादिपिण्डीभावहेतुः इति स्नेहलक्षणपरवाक्यस्य विग्रहः। चूर्णं नाम विक्षिप्ततया स्थितं कणजालम् (powder)। पिण्डीभावः नाम समीकरणम् (Paste)। तथा च विक्षिप्ततया पृथक् पृथक् विद्यमानानां कणजालानां पिण्डत्वेन समीकरणाय हेतुभूतः द्रव्य(जल)निष्ठः गुणः एव स्नेहः इति कथ्यते।विक्षिप्ततया स्थितानां कणानां समीकरणायउ आकृष्य एकत्र स्थापनाय समर्थः, द्रव्य(जल)निष्ठः गुणविशेषः स्नेहः। यत्र चूर्णं, पिण्डीभावम् आपद्यते, तत्र पिण्डीभावसम्पादने यः हेतुः भवति सः एव स्नेहाख्यः गुणः भवति। अयं जलमात्रवृत्तिः;

केवलं जले एव वर्तते। स्नेहः जलस्य विशेषगुणः भवति।

**४.२.३.१५.गुणाः > शब्दः (Sound)**

(मूलम्) श्रोत्रग्राह्यो गुणः शब्दः। सः द्विविधः,ध्वन्यात्मकः वर्णात्मकश्च इति। ध्वन्यात्मकः भेर्यादौ। वर्णात्मकः संस्कृतभाषादिरूपः।

(विवरणम्) इमानि वाक्यानि शब्दस्य स्वभावम्,शब्दस्य स्थितिम्उसिद्धिम् (Existence) ,शब्दस्य प्रभेदान् च निरूपयन्ति।

शब्दस्य लक्षणम्;श्रोत्रेण ग्राह्यः श्रोत्रग्राह्यः। श्रोत्रं च अत्र इन्द्रियम्। श्रोत्रेन्द्रियं नाम कर्णेन्द्रियम्। श्रोत्रशब्दो- त्तरवर्तितृतीया जन्यत्वरूपम् अर्थ बोधयति।ग्राह्यः इत्यत्र ग्रह् धातोः प्रत्यक्षम् अर्थः। तदुत्तरवर्तिकृत्प्रत्ययस्य विषयत्वम् अर्थः। तथा च श्रवणेन्द्रियेण जायमानं यत् प्रत्यक्षज्ञानम्,तादृशे ज्ञाने यः विषयः भवति,सः, शब्दः भवति।

शब्दस्य प्रभेदाः; शब्दस्य द्वैविध्यम् ;सः द्विविधः, ध्वन्यात्मकः वर्णात्मकश्च इति। ध्वन्यात्मकः अव्यक्तः भेर्यादौ पशु-पक्ष्यादीनां रुतेषु। वर्णात्मकः व्यक्तः संस्कृत-तेलुगु-तमिल् -कन्नडादि-भाषारूपः।

शब्दस्य पुनः त्रैविध्यम्; शब्दः १).संयोगजः २).विभागजः ३).शब्दजश्च इति पुनः अपि त्रिविधः भवति। तत्र भेरीदण्डसंयोगजन्यः शब्दः संयोगजः भवति। वंशे उत्पाट्यमाने दलद्वयविभागजन्यः पटपटाशब्दः विभागजः भवति। भेर्यादिदेशम् आरभ्य श्रोत्रपर्यन्तं द्वितीयादिशब्दाःउ शब्दतरङ्गाः शब्दजाः भवन्ति। अयं शब्दः आकाश- मात्रवर्ती विशेषः गुणः।

**४.२.३.१६.गुणाः >बुद्धिः(Understanding)**

(मूलम्) सर्वव्यवहारहेतुः ज्ञानं बुद्धिः । सा द्विविधा, स्मृतिरनुभवश्चेति।

(विवरणम्) इमानि वाक्यानि बुद्धेः स्वरूपम्, बुद्धेः स्थितिम् (Existence), बुद्धेः प्रभेदान् च निरूपयन्ति।

बुद्धेः लक्षणम् ; सर्वश्च असौ व्यवहारः च, सर्वव्यवहारः, सर्वव्यवहारस्य हेतुः सर्वव्यवहारहेतुः इति बुद्धिलक्षणपर- वाक्यस्य विग्रहः। सर्वव्यवहारहेतुः इति ज्ञानस्य विशेषणम्। अन्ततः ज्ञानं बुद्धिः इति फलति। अत्र लक्षणवाक्ये सर्वपदस्य पदैः बोध्यं विश्वगतम् अर्थ (वस्तु) जातम् , अर्थः भवति। व्यवहारः नाम शब्दप्रयोगः, भाषणादिः। यस्य कस्यापि अर्थस्य सिद्धिः= वस्तुनः अवगतिः, प्रतीत्या नाम प्रसिद्ध्या वा, व्यवहारेण भाषणादिना वा इति द्वाभ्यां प्रकाराभ्यां भवति। असाधारणकारणं नाम यत् विना व्यवहारः न उपपद्यते तत्। तदेव हेतुः इति नाम्ना वा,शास्त्र- रीत्या करणम् इति नाम्ना वा कथ्यते। लोके अयं वृक्षः , इयं नदी, अयं सूर्यः, अयं वायुः, इदम् आकाशम् , अयम् उत्तरायणपुण्यकालः, अयं वसन्तर्तुः, अयं वैशाखमासः अयं रक्तः, अयं मधुरः, इमानि पुष्पाणि सुगन्धीनि, इत्यादयः समस्ताः व्यवहारिकाः प्रयोगाः सन्ति। एतादृशानां व्यवहाराणां हेतुभूतं वस्तु किञ्चित् वर्तते । तदेव ज्ञानम् इति अभिधीयते। तादृशं सर्वव्यवहारहेतुभूतं ज्ञानम् एव प्रकृते बुद्धिः इति कथ्यते। सर्वार्थप्रकाशिका बुद्धिः इति वचनस्यापि

अयमेव अभिप्रायः। तथा हि- इयं बुद्धिः अर्थान् प्रकाशयति। अर्थानाम्उ पदार्थानाम् = द्रव्य-गुण-कर्म-सामान्य- विशेष-समवाय-अभावानाम्,प्रकाशः= उपलब्धिःउग्रहणम्उज्ञानम्, यया भवति सा बुद्धिः इति उच्यते। बुद्धेः, उपलब्धिः, ज्ञानम्, प्रत्ययः, इत्यादीनि नामान्तराणि सन्ति। बुद्धिः विशेषगुणः। आत्मानम् आश्रित्य तिष्ठति।

बुद्धेः प्रभेदाः ; बुद्धिः इयं स्थूलतः नित्या अनित्या च द्विधा। ईश्वरीया बुद्धिः नित्या,अन्यदीया अनित्या। पुनः इयं बुद्धिः १). स्मृतिः २). अनुभवश्च इति द्वेधा विद्यते। तत्र च ज्ञातः = अनुभूतः विषयः संस्कारं जनयति। तद्विषयकं = संस्कारजन्यं ज्ञानं स्मृतिः भवति। तद्व्यतिरिक्तम्, स्मृतेः भिन्नम् =अनुभूतिजनकं ज्ञानम् अनुभवः। अथवा प्रथमं जायमानं ज्ञानम् अनुभवः भवति, द्वितीयादिकं तु स्मृतिः भवति। यथा-सर्वप्रथमं दृष्टिगतं घटम् अनुभूतिरूपेण बुदध्या गृह्णाति।तस्यैव पूर्वघटस्य पश्चात् स्मरणरूपं द्वितीयादिज्ञानं तु स्मृतिः भवति।

### **१६.१.गुणाः >बुद्धिः > स्मृतिज्ञानम्**

(मूलम्) संस्कारमात्रजन्यं ज्ञानं स्मृतिः।

(विवरणम्) इमानि वाक्यानि स्मृतेः स्वरूपं निरूपयन्ति।

स्मृतेः लक्षणम्; संस्कार एव संस्कारमात्रम्, संस्कारमात्रात् जन्यं संस्कारमात्रजन्यम्,इति स्मृतिलक्षणपरवाक्यस्य विग्रहः। यस्य कस्यापि बुद्धौ, यत्किञ्चित्वस्तु संदर्शनात् किञ्चित् ज्ञानं जायते। प्रथमं जायमानं तत् अनुभवज्ञानम् इति उच्यते। तच्च अनुभवज्ञानम्, द्रष्टुः मनसि वस्तुसन्दर्शनजं यत्किञ्चित् भावं (Impression) निक्षिपति। तम् अनुभवात् संजातम् भावम् (Impression) एव संस्कार इति कथयामः। एतादृशात् संस्कारगुणात् जायमानं ज्ञानम् एव स्मृतिः कथ्यते। तथा च अनुभवात् जातः यः संस्कारः, तादृशसंस्कारात् उद्बुद्धं यत् ज्ञानं, तदेव स्मृतिः भवति। अनुभवः > संस्कारः > स्मृतिः इति स्मृतेः क्रमः । अयं च बुद्धेः अन्यतरः प्रकारः।

### **१६.२.गुणाः > बुद्धिः > अनुभवज्ञानम्**

(मूलम्) तद्भिन्नं ज्ञानम् अनुभवः, स द्विविधः, १).यथार्थः २).अयथार्थश्च इति ।

(विवरणम्) इमानि वाक्यानि अनुभवस्य स्वरूपम्, अनुभवस्य प्रभेदान् च निरूपयन्ति।

अनुभवस्य लक्षणम् ; तस्मात् भिन्नम्, तद्भिन्नम्। अत्र तत् शब्दः पूर्वम् उक्तं स्मृतिज्ञानं परामृशति। भिन्नशब्दः इतरार्थकः। तथा च स्मृतेःउ स्मृतिज्ञानात्, भिन्नम् = इतरम् (ज्ञानम्),अनुभवज्ञानं भवति । तस्य अयम् अभिप्रायः; बुद्धेः इतः पूर्वं स्मृतिः अनुभवश्च इति द्वौ प्रकारौ प्रदर्शितौ। तयोः संस्कारजन्यं ज्ञानं स्मृतिः

भवति। संस्कार- जन्यात् स्मृतिज्ञानात् भिन्नं ज्ञानं तु अनुभवज्ञानं भवति। अनुभवस्य प्रभेदाः ; तच्च अनुभवज्ञानं १).यथार्थ-अनुभवज्ञानम् २).अयथार्थ–अनुभवज्ञानम् इति द्वेधा विभागम् अर्हति। यत् वस्तु येन प्रकारेण अवस्थितं भवति, तेनैव प्रकारेण तत् वस्तु (अनुभूतिजनकं) बुद्धिगोचरं भवति तदा यथातथानुभूतिजनकं तत् ज्ञानं यथार्थ-अनुभवज्ञानं भवति। यत् वस्तु येन प्रकारेण विद्यते , तं प्रकारम् अपहाय तद्भिन्नप्रकारेण तत् वस्तु (अनुभूतिजनकं) बुद्धिगोचरं भवति तदा यथातथानुभूतिम् अजनयत् तत् ज्ञानं अयथार्थ-अनुभवज्ञानं भवति।

१६.२.१.गुणाः >बुद्धिः > अनुभवज्ञानम् >यथार्थानुभवज्ञानम्

(मूलम्) तद्वति तत्प्रकारकानुभवः यथार्थः। सैव प्रमा इत्युच्यते। यथा, रजते इदं रजतमिति।

(विवरणम्)इमानि वाक्यानि यथार्थानुभवज्ञानस्य स्वरूपं सोदाहरणं निरूपयन्ति। यथार्थानुभवस्य लक्षणम्;अर्थम् अनतिक्रम्य यथार्थम्, यथार्थम् अनुभवम् यस्य तत् (ज्ञानम्)यथार्थानुभवं ज्ञानम्। अत्र अर्थशब्देन अवस्थाम् आप्तः,विशेषणविशिष्टः पदार्थः गृह्यते। सर्वः पदार्थः सर्वदा काञ्चित् अवस्थाम् = स्थितिम्, प्राप्य एव विद्यते। प्राप्ता सा अवस्था एव प्रकारशब्देन व्यवहृतः भवति। एवं सर्वः अपि पदार्थः यत्

किञ्चित्प्रकारकः एव भवति। यः पदार्थः यम् प्रकारम् आप्तः सन् विद्यते,सः पदार्थः तम् प्रकारम् अनतिक्रम्य, तेनैव प्रकारेण, साधारणतः जनैः अवगतः भवति – तत् प्रकारविशिष्टं तम् अर्थम् अनतिक्रम्य जायमानं अनुभवज्ञानम् यथार्थ-अनुभवज्ञानं भवति। उदाहरणम्–रजते इदं रजतम् इति। अत्र रजतम् पदार्थः= वस्तु। रजतत्वं रजतस्य धर्मः। प्रकृते रजतं रजतत्वधर्माक्रान्तम् अस्ति। एवं रजतं रजतत्वविशिष्टं जातम्। रजतत्वं च प्रकारः। अत्र रजतत्व- प्रकारकं रजतं तेनैव प्रकारेण अवगतं भवति,ज्ञातं च भवति इति रजते इदं रजतम् इति ज्ञानं यथार्थ-अनुभव ज्ञानाय उदाहरणं भवति। अस्यैव यथार्थानुभवज्ञानस्य प्रमा इति व्यवहारः अस्ति।

**१६.२.२.गुणाः >बुद्धिः >अनुभवज्ञानम् >अयथार्थानुभवज्ञानम्**

(मूलम्) तदभाववति तत्प्रकारकानुभवः अयथार्थः,स एव भ्रम इत्युच्यते, यथा,शुक्तौ इदं रजतम् इति।

(विवरणम्) इमानि वाक्यानि अयथार्थानुभवस्य स्वरूपं सोदाहरणं निरूपयन्ति। अयथार्थानुभवस्य लक्षणम्;अर्थम् अनतिक्रम्य यथार्थम्, यथार्थम् अनुभवम् यस्य

तत् (ज्ञानम्) यथार्थानुभवम् न यथार्थानुभवम् (ज्ञानम्), अयथार्थानुभवम्। अत्र अर्थशब्देन अवस्थाम् आप्तः, विशेषणविशिष्टः पदार्थः गृह्यते। सर्वः पदार्थः काञ्चित् अवस्थाम्उस्थितिम्, प्राप्य एव विद्यते। प्राप्ता सा अवस्था एव प्रकारशब्देन व्यवहृतः भवति। एवं सर्वः अपि पदार्थः यत्किञ्चित् प्रकारक एव भवति। यः पदार्थः यम् प्रकारम् आप्तः सन् विद्यते ,सः पदार्थः तम् प्रकारम् अतिक्रम्य अन्येन प्रकारेणापि भ्रमात् प्रमादाद्वा कदाचित् , तदा तदा अवगतः= ज्ञातः, भवति – एवम् अन्यप्रकारविशिष्टं तम् अर्थम् अनुसृत्य जायमानं अनुभवज्ञानं अयथार्थानुभवज्ञानं भवति। उदाहरणम्–शुक्तौ इदं रजतम् इति।इदं वाक्यं शुक्तिं दृष्ट्वा रजतम् इति भ्रान्तस्य जातं ज्ञानं वर्णयति । अत्र शुक्तिः पदार्थः = वस्तु। अत्र शुक्तेः शुक्तित्वं धर्मः। शुक्तिः शुक्तित्वविशिष्टः भवति । शुक्तौ शुक्तित्वं च प्रकारः। परम् अत्र वस्तुतः शुक्तौ रजतत्वधर्मः नास्ति। शुक्तिः रजतत्वविशिष्टः न भवति । शुक्तौ रजतत्वं च न प्रकारः। एवं रजतत्वाभाववतीं शुक्तिं इदं रजतं इति रजतत्वप्रकारेण अवगच्छति इति शुक्तौ इदं रजतम् इति ज्ञानं अयथार्थानुभवज्ञानाय उदाहरणं भवति। अस्यैव अयथार्थानुभवस्य भ्रमः इति व्यवहारः।

१६.२.४.गुणाः >बुद्धिः >अनुभवज्ञानम् >यथार्थानुभवज्ञानस्य भेदाः (चातुर्विध्यम्)

(मूलम्) यथार्थानुभवः चतुर्विधः – १).प्रत्यक्ष २).अनुमिति ३).उपमिति ४).शाब्दभेदात्

(विवरणम्) इमानि वाक्यानि यथार्थानुभवज्ञानस्य भेदान् बोधयन्ति।

यथार्थानुभवस्य भेदाः ; यः पदार्थः यम् प्रकारम् आप्तः सन् विद्यते,सः पदार्थः तम् प्रकारम् अनतिक्रम्य, तेनैव प्रकारेण, साधारणतः जनैः अवगतः भवति – तत् प्रकारविशिष्टं तम् अर्थम् अनतिक्रम्य जायमानं अनुभवज्ञानम् यथार्थ-अनुभवज्ञानं भवति। उदाहरणम्–रजते इदं रजतम् इति। इदं यथार्थ-अनुभवज्ञानं १).प्रत्यक्षज्ञानम् २).अनुमितिज्ञानम् ३).उपमितिज्ञानम् ४).शाब्दज्ञानम् इति भेदेन चतुर्विधं विद्यते। इन्द्रिय-अर्थसन्निकर्षात् प्रत्यक्षज्ञानं भवति। परामर्शात् अनुमितिज्ञानं जायते। संज्ञा-संज्ञिसम्बन्धतः उपमितिज्ञानं भवति। शब्देभ्यः शाब्दज्ञानं जायते।

१६.२.५.गुणाः >बुद्धिः >अनुभवज्ञानम् >अयथार्थानुभवज्ञानस्य भेदाः (त्रैविध्यम्)

(मूलम्) अयथार्थानुभवः त्रिविधः – १).संशय २).विपर्यय ३).तर्कभेदात्

(विवरणम्) इमानि वाक्यानि अयथार्थानुभवज्ञानस्य भेदान् बोधयन्ति।

अयथार्थानुभवस्य भेदाः ; यः पदार्थः यम् प्रकारम् आप्तः सन् विद्यते ,सः पदार्थः तम् प्रकारम् अतिक्रम्य अन्येन प्रकारेणापि भ्रमात् प्रमादाद्वा कदाचित् , तदा तदा अवगतः= ज्ञातः, भवति – एवम् अन्यप्रकारविशिष्टं तम् अर्थम् अनुसृत्य

जायमानं अनुभवज्ञानं अयथार्थानुभवज्ञानं भवति। उदाहरणम्–शुक्तौ इदं रजतम् इति। इदं वाक्यं  शुक्तिं दृष्ट्वा रजतम् इति भ्रान्तस्य जातं ज्ञानं वर्णयति । अत्र शुक्तिः पदार्थः = वस्तु।शुक्तिः सदा शुक्तित्वविशिष्टः भवति । अतः अत्र शुक्तेः शुक्तित्वं धर्मः। शुक्तौ शुक्तित्वं च प्रकारः। परम् अत्र वस्तुतः शुक्तौ रजतत्वधर्मः नास्ति। शुक्तिः रजतत्वविशिष्टः न भवति । शुक्तौ रजतत्वं च न प्रकारः। एवं रजतत्वाभाववर्ती शुक्तिं इदं रजतं इति रजतत्वप्रकारेण अवगच्छति इति शुक्तौ इदं रजतम् इति ज्ञानं अयथार्थानुभवज्ञानस्य उदाहरणं भवति। एतादृशम् अयथार्थज्ञानं १).संशय २).विपर्यय ३).तर्कभेदात् त्रिविधं विद्यते।

१६.२.५.१.गुणाः >बुद्धिः >अनुभवज्ञानम् >अयथार्थानुभवज्ञानस्य भेदाः- ऊसंशयः

(मूलम्) एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहिज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति।

(विवरणम्) इमानि वाक्यानि अयथार्थानुभवज्ञानभेदेषु अन्यतमस्य संशयस्य स्वरूपं निरूपयन्ति।

संशयस्य स्वरूपम् ; यस्मिन् कस्मिन् अपि वा काले भवतु , सर्वम् अपि = वस्तु यत्किञ्चित् धर्मविशिष्टम् एव भवति। धर्मः अस्मिन् अस्तीति कारणतः , वस्तुनः वा , व्यक्तेः वा धर्मी इति व्यवहारः अस्ति। तथा धर्मी इति व्यवहारम् आप्ते वस्तुनि, (व्यक्तौ वा) विद्यमानधर्मात् भिन्नान् उविरुद्धान् अनेकान् धर्मान् आश्रित्य, भ्रमात् प्रमादात् वा भिन्नभिन्न वस्तु विषयकज्ञानं जायते । वस्तुनि एवं वस्तुगततया विद्यमानधर्मात् भिन्नान् = विरुद्धान् अनेकान् धर्मान् आश्रित्य जातं भिन्नभिन्नवस्तु विषयकज्ञानम् एव संशयः इति उच्यते।

उदाहरणम्; स्थाणुः वा पुरुषो वा इति। पाषाणं दृष्ट्वा स्थाणुत्वेन , पुरुषत्वेन च संशयमापन्नस्य उक्तिः इयम्।

दूरतः षट्पादपरिमितोन्नतम् एकं पाषाणाकृतिं पश्यति। वस्तुतः सः पाषाणः। पाषाणे तस्मिन् औन्नत्येन स्थाणुधर्माः, आकारेण पुरुषधर्माः च अवभासन्ते। एवम् पाषाणम् एकं दृष्ट्वा औन्नत्येन स्थाणुं शङ्कते। आकारेण च पुरुषं शङ्कते। दूरस्थतया तं पाषाणम् अयं स्थाणुः वा पुरुषो वा इति मनुते। एवं एकस्मिन् पाषाणे, विरुद्ध स्थाणु-पुरुष-उभयविषयकसंशयज्ञानम् अत्र अस्य जातम् इति कृत्वा इयम् उक्तिः संशयज्ञानस्य उदाहरणं भवति।

१६.२.५.२.बुद्धिः >अनुभवज्ञानम् >अयथार्थानुभवज्ञानस्य भेदाः- >विपर्ययः

(मूलम्) मिथ्याज्ञानं विपर्ययः। यथा शुक्तौ 'रजतम्' इति।

(विवरणम्) इमानि वाक्यानि अयथार्थानुभवज्ञानभेदेषु अन्यतमस्य विपर्ययस्य स्वरूपं निरूपयन्ति।

विपर्ययस्य स्वरूपम् ; मिथ्या च तत् ज्ञानं च मिथ्याज्ञानम्। मिथ्या नाम तदभाववति तत्प्रकारकत्वनिश्चयः। सर्वः पदार्थः काञ्चित् अवस्थाम्उस्थितिम्, प्राप्य एव विद्यते। प्राप्ता सा अवस्था एव प्रकारशब्देन व्यवहृतः भवति।

एवं सर्वः अपि पदार्थः यत्किञ्चित् प्रकारक एव भवति। यत् वस्तु यम् प्रकारम् आप्तं सत् विद्यते ,तत् वस्तु तम् प्रकारम् अतिक्रम्य अन्येन प्रकारेणापि भ्रमात् प्रमादाद्वा कदाचित् , तदा तदा बुद्ध्या अवगतम् = ज्ञातं भवति। एवम् अतत्प्रकारके जायमानं तत्प्रकारकनिश्चयज्ञानम् एव विपर्ययः इति उच्यते। उदाहरणम्; शुक्तौ इदं रजतम् इति। इदं वाक्यं शुक्तिं दृष्ट्वा रजतम् इति भ्रान्तस्य जातं ज्ञानं वर्णयति। अत्र शुक्तिः पदार्थः= वस्तु। शुक्तिः सदा शुक्तित्वविशिष्टा भवति। अतः अत्र शुक्तेः शुक्तित्वं धर्मः। शुक्तौ शुक्तित्वं च प्रकारः। परम् अत्र वस्तुतः शुक्तौ रजतत्वधर्मः नास्ति। शुक्तिः रजतत्वविशिष्टा न भवति। शुक्तौ रजतत्वं च न प्रकारः। एवं रजतत्वाभाववतीं शुक्तिं इदं रजतम् इति रजतत्वप्रकारेण अवगच्छति इति शुक्तौ इदं रजतम् इति ज्ञानं विपर्ययस्य उदाहरणं भवति।

१६.२.५.३.गुणाः >बुद्धिः >अनुभवज्ञानम् >अयथार्थानुभवज्ञानस्य भेदाः >तर्कः

(मूलम्) व्याप्यारोपेण व्यपकारोपः तर्कः। यथा यदि वह्निः न स्यात् तर्हि धूमः अपि न स्यात् इति।

(विवरणम्) इमानि वाक्यानि अयथार्थानुभवज्ञानभेदेषु अन्यतमस्य तर्कस्य स्वरूपं निरूपयन्ति।

तर्कस्य स्वरूपम् ; व्याप्यस्य आरोपः व्याप्यारोपः, व्यपकस्य आरोपः व्यपकारोपः। न्यूनदेशवृत्तिः व्याप्यः। अधिक- देशवृत्तिः व्यापकः। अभावकथनम् आरोपः। 'यत्र व्याप्यं वर्तते तत्र अवश्यं व्यापकम् अपि वर्तते' इति नियमः। यत्र तदुभयं नास्तीति प्रथमम् एव ज्ञातं, अथापि 'यदि व्याप्यं भवेत् तर्हि व्यापकम् अपि भवेत्' इति दुरभिमानेन वा, दुराग्रहेण वा कथयति सः आहार्यारोपः भवति। तादृशः आहार्यारोपः एव तर्कः इति उच्यते।एकेन सम्यक् न पठितम्, न वा परीक्षायाम् उत्तीर्णः। एवं ज्ञात्वा अपि, यदि सः वदेत् 'यदि मयापि सम्यक् पठितं भवेत् अहम् अपि परीक्षायाम् उत्तीर्णः भवेयम्' इति। सोऽयम् आरोपः तर्कः भवति। उदाहरणम्

- पर्वतो वह्निमान् धूमात् इत्यत्र धूमरूपेण हेतुना वह्निं साधयन्ति। तत्र कश्चित् पर्वते वह्नेः साधनाय धूमम् हेतुत्वेन अस्वीकृत्य, पर्वते धूमः अस्तु, वह्निः मास्तु इति अप्रयोजक (False) शङ्कां करोति। तस्य समाधानतया, यदि वह्निः न स्यात् धूमः अपि न स्यात् , वह्निजन्यत्वात् धूमस्य, तत्र धूमस्तु दृश्यते, अतः वह्निः अपि अवश्यं वर्तते इति तर्केणैव निवारणं भवति । एवं पर्वते वह्निसत्ता निर्धारिता भवति। वस्तुतः पर्वते धूमः अस्ति, वह्निः अपि अस्ति, परम्,यदि वह्निः न स्यात् धूमः अपि न स्यात् , इति आहार्यारोपः क्रियते इति अयं तर्कः भवति।

**१६.२.५.३.गुणाः >बुद्धिः >स्मृतिज्ञानम् >भेदाः**

(मूलम्) स्मृतिरपि द्विविधा, यथार्थायथार्थाचेति। प्रमाजन्या यथार्था। अप्रमाजन्यायथार्था।

(विवरणम्) इमानि वाक्यानि स्मृतिज्ञानस्य भेदान् निरूपयन्ति।

स्मृतेः द्वैविध्यम् ; यथा अनुभवज्ञानं द्विविधं तथा स्मृतिज्ञानम् अपि १).यथार्थस्मृतिः २).अयथार्थस्मृतिः इति नाम्ना द्विविधं भवति। यथार्थानुभवजन्या स्मृतिः यथार्था स्मृतिः, अयथार्थानुभवजन्या स्मृतिः अयथार्था स्मृतिः च भवति। अनुभवः हि संस्कारद्वारा स्मृतिं जनयति। कारणभूतम् अनुभवम् अनुसृत्य कार्यभूता स्मृतिरपि यथार्था, अयथार्था वा भवतीति भावः।

**४.२.३.१७.गुणाः >सुखम्(Pleasure)**

(मूलम्) सर्वेषामनुकूलतया वेदनीयं सुखम् ।

(विवरणम्) इमानि वाक्यानि सुखस्य स्वरूपं निरूपयन्ति।

सुखस्य स्वरूपम् ; सर्वेषाम्, अनुकूलम् = सन्तोषदायकत्वेन सम्मतम् यत् विद्यते तस्मिन् च यत् विषयं भवति तत् सुखं भवति। तस्य अयम् अभिप्रायः। सर्वैः स्व-स्व-अनुकूलत्वेन अभिलष्यमाणं सुखम्। सुखकारणानि तत्तद्व्यक्तिस्वभावाद्यनुगुणं तत्तद्देशकालपरिस्थितिम् अनुसृत्य च भिन्नभिन्नान्येव भवन्ति। कस्यचित् सुखकारणम् अन्यस्य दुःखकारणं भवति। एकम् एव वस्तु कस्यचित्, कदाचित् सुखकारणं भवति,कदाचित् दुःखकारणम् अपि भवति। एवं सुखकारणानि विभिन्नान्येव अभिलषितानि भवन्तु नाम।सुखं तु सर्वैः सदा अभिलषणीयं भवति। अयं च आत्मगुणः। सुखम् आत्मनि समवायसम्बन्धेन विद्यते।

**स्वावलोकनप्रश्नाः**

१)सुखं कुत्र उपलभ्यते ?

२)सुखं कीदृशम् ?

**४.२.३.१८.गुणाः > दुःखम् (Pain)**

(मूलम्) सर्वेषां प्रतिकूलतया वेदनीयं दुःखम् ।

(विवरणम्) इमानि वाक्यानि दुःखस्य स्वरूपं निरूपयन्ति।

दुःखस्य स्वरूपम्;सर्वेषां प्रतिकूलतया वेदनीयं दुःखम्।सर्वेषाम्, प्रतिकूलम् = कष्ट/बाधदायकत्वेन अङ्गीकार- अयोग्यं यत् अनिष्टज्ञानम्,तस्मिन् च यत् विषयं भवति तत् दुःखं भवति। तस्य अयम् अभिप्रायः- सर्वैः प्रतिकूलत्वेन भाव्यमानं दुःखं भवति। दुःखकारणानि देश-काल-भेदेन पुरुषभेदेन च विभिन्नानि भवन्ति। इदानीं दुःखकारणं कालान्तरे सुखकारणम् अपि भविष्यति। कस्यचित् दुःखकारणम् एव अन्यस्य सुखकारणं भवति। एवं दुःखकारणानां विभेदे अपि कार्यं दुःखं सर्वेषां द्वेषविषयं भवति। द्वेषः द्विविधा भवति। दुःखं प्रति द्वेषः, दुःखसाधनं प्रति च द्वेषः। प्राणिनां प्रथमं दुःखं प्रति द्वेषः भवति। अनन्तरम् एव दुःखसाधनं प्रति द्वेषः समुदेति। एवं सति , प्रथमे दुःखं प्रति द्वेषे यत् विषयं भवति,तत् एव दुःखम् इति उच्यते। एतदेव इतरद्वेष-अनधीन- द्वेषविषयत्वं दुःखत्वम् इति दुःखस्य लक्षणं कथयन्ति। अयं च आत्मगुणः। दुःखम् आत्मनि समवायसम्बन्धेन विद्यते।

**स्वावलोकनप्रश्नाः**

१)दुःखं केन सम्बन्धेन, कुत्र उपलभ्यते ?

२)दुःखं कीदृशम् ?

**४.२.३.१८.गुणाः > इच्छा (Desire)**

(मूलम्) इच्छा कामः ।

(विवरणम्) इदं वाक्यं इच्छायाः स्वरूपं निरूपयति।

इच्छायाः स्वरूपम् ; कामः नाम अभिलाषा,यत्किञ्चित् आप्तुं मनसः ईहा। तस्य अयम् अभिप्रायः। यः कोऽपि वा पुरुषः प्रथमं यत्किञ्चित् जानाति। तदाप्तुम् अभिलषति। तदनन्तरं तत् साधनाय प्रयत्नम् अनुतिष्ठति। जानाति.ऊइच्छति >

यतते इति इयम् एव हि प्रयत्नप्रक्रिया। तत्र प्रथमं (सङ्कल्पात्मकम्) ज्ञानम्, अनन्तरम् प्राप्तिं प्रति इच्छा।

तदुपरि एव साधनैश्च उद्यमनम्। एवं क्रमे ज्ञानात् इच्छा जायते। इच्छा च पुरुषं यत्नाय चोदयति। एवम् इच्छायां ज्ञानजन्यत्वम्, प्रयत्नजनकत्वं च वर्तते इति ज्ञानजन्यत्वे सति, प्रयत्न जनकत्वम् इत्यपि इच्छायाः लक्षणं वदन्ति। इच्छा अहम् इच्छामि इत्याकारकप्रतीतिविषया भवति। इयं च आत्मनि (जीवे) समवायसम्बन्धेन वर्तते। इच्छा च नित्या अनित्या चेति द्विधा विद्यते। नित्या ईश्वरीया। अन्यदीया अनित्या।

**स्वावलोकनप्रश्नाः**

१).इच्छायाः लक्षणं किम् ?

२).इच्छा कतिविधा ?

**४.२.३.२०.गुणाः > द्वेषः (Aversion)**

(मूलम्) क्रोधो द्वेषः ।

(विवरणम्) इदं वाक्यं द्वेषस्य स्वरूपं निरूपयति।

द्वेषस्य स्वरूपम् ; क्रोधः एव द्वेषः। क्रोधनं नाम अनिच्छया आत्मनि जायमानं व्यतिरेकस्पन्दनम्। सा च मनसि असन्तृप्तिम्, अयिष्टताम्, असहनं कोपं च जनयति। शरीरे अवयवेषु च तापम् आविष्करोति। कक्ष्यां वर्धयति। प्रतीकारं कर्तुं चोदयति। असन्तृप्तिः, अयिष्टता, असहनम्, कोपः तापः, कक्ष्या, प्रतीकारः एते सर्वे अपि क्रोधात् एव समुत्थिताः भवन्ति। द्वेषः अयम् क्रुद्धः इत्याकारकप्रतीतिविषयः भवति । अयं च आत्मनि (जीवे) समवाय- सम्बन्धेन वर्तते।

**४.२.३.२१.गुणाः ऊ यत्नः (Effort)**

(मूलम्) कृतिः प्रयत्नः।

(विवरणम्) इदं वाक्यं यत्नस्य स्वरूपं निरूपयति।

द्वेषस्य स्वरूपम् ; अत्र यत्न-प्रयत्नशब्दौ समानार्थकौ। कृतिः एव प्रयत्नः। कृतिः कर्म न भवति। कर्म चेष्टारूपं शरीरवृत्ति। कृतिस्तु आत्मवृत्तिः, मनसा सम्पाद्या भवति। कृतिनिष्पाद्यं च कर्म। कर्मणः प्रारम्भात् पूर्वं, तत् कथं कर्तव्यम् ? तत्

साधनानि कथं सम्पाद्यानि ? इत्येवं रीत्या सम्यक् विचार्य तत्तत्कर्मकरणाय मानसिकी संसिद्धता कृतिः। मूकः वक्तुं प्रयतते, परं न पारयति। तत्र कृतिः अस्ति, परं कर्म नास्ति। यत्नः अहम् करोमि इत्याकारकप्रतीतिविषयः भवति। जानाति > इच्छति ऊयतते इति हि यत्नप्रक्रिया। तत्र प्रथमं (सङ्कल्पात्मकम्) ज्ञानम्, अनन्तरम् प्राप्तुम् इच्छा। तदुपरि एव साधनैश्च उद्यमनम्। एवं क्रमे इच्छाजन्यत्वम्, गुणत्वं च कृतौ वर्तते इति इच्छजन्यत्वे सति, गुणत्वम् इत्यपि यत्नस्य लक्षणं वदन्ति। अयं च आत्मगुणः। यत्नश्च समवाय- सम्बन्धेन आत्मनि (जीवे) वर्तते।

**स्वावलोकनप्रश्नाः**

१).यत्नस्य लक्षणं किम् ?

२).यत्नः कीदृशः ?

**४.२.३.२२.गुणाः > धर्मः (Merit)**

(मूलम्) विहितकर्मजन्यो धर्मः।

(विवरणम्) इदं वाक्यं धर्मस्य स्वरूपं निरूपयति।

धर्मस्य स्वरूपम् ; विहितानि च तानि कर्माणि, विहितकर्माणि। विहितकर्मभ्यः जन्यः, विहितकर्मजन्यः इति धर्मलक्षणपरवाक्यस्य विग्रहः। वेदादिभिः कर्तव्यतया विहितानां कर्मणाम् अनुष्ठानेन जायमानः पुण्य-अपरपर्यायः गुणविशेषः धर्मः भवति। वेदाश्च ‘ मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव ‘ इत्येवं स्नातकानां श्रेयस्साधकं जीवनविधानं कर्म आदिशन्ति। एवं वेदैः आदिष्ट (= विहित) एतत्कर्माचरणेन कश्चित् गुणः जायते। सः एव गुणः धर्मः इति उच्यते। अयम् आत्ममात्रगुणः, आत्मनि जीवे समवायसम्बन्धेन विद्यते।

**स्वावलोकनप्रश्नाः**

१).धर्मः नाम कः ?

२).सः कीदृशः गुणः ?

४.२.३.२३.गुणाः > अधर्मः (Demerit)

(मूलम्) निषिद्धकर्मजन्यः अधर्मः।

(विवरणम्) इदं वाक्यं अधर्मस्य स्वरूपं निरूपयति।

अधर्मस्य स्वरूपम् ;निषिद्धानि च तानि कर्माणि, निषिद्धकर्माणि। निषिद्धकर्मभ्यः जन्यः, निषिद्धकर्मजन्यः इति अधर्मलक्षलपरवाक्यस्य विग्रहः। वेदादिभिः न कर्तव्यम् इति निषिद्धानां कर्मणाम् आचरणेन जायमानः पाप-अपर पर्यायः गुणविशेषः अधर्मः भवति। वेदाश्च ' न परदारान् ग्च्छेत्, अन्नं न निन्द्यात्,स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्, न कलञ्जं भक्षयेत् ' इत्येवं स्नातकानां श्रेयस्साधकं जीवनम् उपदिशन् कानिचन कर्माणि मा करोतु इति बोधयन्ति। एवं, वेदैः निषिद्ध-एतत्कर्माचरणेन कश्चित् गुणः जायते। सः गुणः एव अधर्मः इति उच्यते । अयम् आत्ममात्रगुणः, आत्मनि जीवे समवायसम्बन्धेन विद्यते।

**स्वावलोकनप्रश्नाः**

१). अधर्मः नाम कः

२).अधर्मः कस्मिन् , केन सम्बन्धेन विद्यतेसम्बन्धेन विद्यते ?

**४.२.३.२४.गुणाः > संस्कारः (Faculty)**

(मूलम्) संस्कारः त्रिविधः, वेगः, भावना, स्थितिस्थापकः चेति।

(विवरणम्) इदं वाक्यं संस्कारस्य प्रभेदान् निरूपयति।

संस्कारस्य स्वरूपम् ; संस्कारस्य निर्वचनदानं न सुकरम् अस्ति। संस्कारस्य त्रयः भेदाः सन्ति। ते परस्परं भिन्नाः वर्तन्ते। तस्य त्रिषु भेदेषु अनुगमकं धर्मं सुलभतया प्राप्तुं न पारयामः। तथापि शास्त्रकाराः लक्षणम् एवं निर्दिशन्ति।

यत्-जातीयः समुत्पाद्यः तत्-जातीयस्य कारणम् ।
स्वयं यस्मात् विजातीयः, संस्कारः सगुणः भवेत् ।।

तस्य अयम् अभिप्रायः। यम्, यादृशगुणविशिष्टतया उत्पादयितुं चिन्तयामः,तम्, तादृशगुणविशिष्टतया उत्पादने यः कारणं भजते, सः गुणविशेषः संस्कारः भवति। सः संस्कारः भागस्वीकर्तृभ्यः साक्षात् भिन्नः (विजातीयः) भवति। नाम गुणः स्वगुणानुकूलं कार्यं जनयति। तथा कर्म अपि स्वक्रियानुकूलं कार्यं जनयति। एवं गुण-कर्मणोः स्व-स्व अनुकूलकार्यजनने सहकारकः कश्चन अंशः विद्यते। स

अंशः एव संस्कारः इति उच्यते। अयं बाह्यसहायं विना आन्तरिकशक्त्या कार्यजननाय सहकारी भवति।संस्कारस्य त्रैविध्यम्; अयं संस्कारः वेगः(Momentum),भावना (Imagination), स्थितिस्थापकः (Elasticity) चेति त्रिविधः अस्ति ।

**२४.१.गुणाः > संस्कारः > वेगः (Momentum)**

(मूलम्) वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः।

(विवरणम्) इदं वाक्यं संस्कारस्य प्रभेदेषु अन्यतमं वेगं निरूपयति।

वेगस्य स्वरूपम् ; वृक्षात् गलिते फले गुरुत्वेन आद्यपतनक्रिया जायते। तया च क्रियया फले वेगाख्यः संस्कारः जायते। तेन च वेगेन द्वितीया पतनक्रिया , तया च वेगः, इत्येवं क्रमेण भूपर्यन्तं वेगपतनक्रियाणां परम्परा जायते। एवं धानुष्केण धनुषि आरोपिते बाणे चोदनजनितक्रियया वेगः जायते। तेन च पुनः चोदनक्रियायाः वेग, इत्येवं लक्ष्यपर्यन्तं चोदनानां वेगक्रियापरम्परा जायते। एवम् एव जलादिद्रवद्रव्येषु आद्यस्यन्दनक्रियया वेगः जायते। एवं स्यन्दनक्रियायाः वेगपरम्परा तत्र गम्यस्थानपर्यन्तं जायते। अयं वेगः पृथिवी-जल-तेजो-वायुषु, मनसि च वर्तते।

**२४.२.गुणाः > संस्कारः > भावना (Imagination)**

(मूलम्) अनुभवजन्या स्मृतिहेतुः भावना, अत्ममात्रवृत्तिः।

(विवरणम्) इदं वाक्यं संस्कारस्य प्रभेदेषु अन्यतमां भावनां निरूपयति।

भावनायाः स्वरूपम् ; अनुभवात् जन्या अनुभवजन्या। स्मृतेः हेतुः स्मृतिहेतुः। भावनायाम् इमौ द्वौ अपि अंशौ स्तः। यः अनुभवात् जातः सन्, स्मृतिज्ञानस्य च कारणं भवति सः संस्कारः भावनाख्यः भवति। तस्य अयम् अभिप्रायः। इन्द्रिय-अर्थसन्निकर्षेण वस्तुसम्बन्धि प्रत्यक्षानुभवस्य ज्ञानं जायते। तस्मात् प्रत्यक्षानुभवात् कालान्तरे तत्तद्वस्तुविषयकं स्मरणं भवति। एवं स्थितौ यः (प्रत्यक्षादि) अनुभवात् जायते संस्काररूपेण आरूढः सन् स्मृतिकारकः च भवति, (= अनुभवः > संस्कारः > स्मृतिः) सः संस्कारः भवनाख्यः भवति। अर्थात् समाहितेन मनसा श्रद्धया च कृतं यत् दर्शनं पठनादिकं च, तेन जनितः निर्णयरूपः अनुभवः, आत्मनि मुद्रारूपेण संस्कारम् इमं जनयितुं समर्थः भवति। अनवहितेन मनसा अश्रद्धया च कृतेन दर्शनादिना जनितः अनुभवः संस्कारं जनयितुं न प्रभवति। अत एव सदृशवस्तुनः स्मरणं न सम्भवत्येव। पुनः पुनः तत्तद्वस्तुदर्शनादिना संस्कारः अयं दृढः दृढतरश्च भवति। तेन च झटिति तत्स्मरणं जायते। श्रद्धया, मनः निवेश्य च, पाठश्रवणं , पुनः पुनश्च पाठानाम् आवृत्तिः, चिन्तनादिकञ्च, तादृशसंस्कारदाढर्यायैव। यदा तु अनुभव एव न जातः, जातेऽपि वा अनुभवे

संस्कारः न दृढः, तदा स्मरणं न सम्भवति। एवं रोगादिना अपि संस्कारस्य नाशः जायते। तदापि स्मरणं न भवति। स च अयं भावनाख्यः संस्कारः आत्ममात्रगुणः, अतीन्द्रियश्च।

२४.३.गुणाः > संस्कारः > स्थितिस्थापकः (Elasticity)

(मूलम्) अन्यथा कृतस्य पुनः तदवस्थापादकः स्थितिस्थापकः।

(विवरणम्) इदं वाक्यं संस्कारस्य प्रभेदेषु अन्यतमं स्थितिस्थापकं निरूपयति। स्थितिस्थापकस्य स्वरूपम् ;वस्तुस्थितेः अन्यथाकरणे अपि पुनः पूर्वस्थितिसम्पादकः गुणः स्थितिस्थापकः। गुणः अयं कटादिषु पार्थिवद्रव्येषु एव वर्तते।वर्तुलाकारेण स्थितस्य कटस्य वारं वारं ऋजूकरणेऽपि पुनः पूर्वस्थितिः जायते। तत्र कारणं स्थितिस्थापकसंस्कारः एव। आकृष्य विसृष्टायाः वृक्षशाखायाः पुनः पूर्वस्थितिः अनेनैव संस्कारेण सम्पाद्यते। अयम् अपि अतीन्द्रियो गुणः। गुरुत्वम्, धर्म-अधर्मौ,भावनास्थितिस्थापकसंस्कारौ इति इमे अतीन्द्रियाः गुणाः।

**स्वावलोकनप्रश्नाः**

१).संस्कारः नाम कः ?

२).संस्कारः कतिविधः ?

## ४.३ .उपसंहारः

एवम्, अन्ये रूपादयः इन्द्रियग्राहकाः विशेषगुणाः गुणाः दर्शिताः। अनन्तरं संख्यादयः अष्ट , सामान्यगुणाः निरूपिताः। बुद्ध्यादि-भवनान्ताः आत्ममात्रगुणाश्च विचारिताः। गुण सामान्यलक्षणं सूचितम्। चतुर्विंशतिगुणानां प्रत्येकं लक्षणं च उक्तम्। स्थूलः विभागश्च प्रदर्शितः।

## ४.४.अभ्यासः

अ).रूपस्य लक्षणम् उक्त्वा तदीयान् भेदान् निरूपयत ?

इ).संस्कारं सप्रभेदं निरूपयत ?

* * *

# UNIT-V
# बुद्धिः

## संरचना

५.०. परिचयः
५.१. लक्ष्याणि
५.२. बुद्धिः
५.२.१. बुद्धिः - निर्वचनम्
५.२.२. बुद्धिः - भेदाः
५.२.३. बुद्धिः- स्मृति-अनुभवयोः लक्षणम्
५.२.४.बुद्धिः-यथार्थ-अयथार्थानुभवयोः लक्षणम्
५.२.५. यथार्थानुभवस्य चातुर्विध्यम्
५.२.५.१.प्रत्यक्षज्ञानम् > प्रत्यक्षप्रमाणम्
५.२.५.२.अनुमितिज्ञानम् > अनुमानप्रमाणम्
५.२.५.३.उपमितिज्ञानम् > उपमानप्रमाणम्
५.२.५.४.शाब्दज्ञानम् > शब्दप्रमाणम्
५.३. उपसंहारः
५.४. अभ्यासः

## ५.०. परिचयः

जगत् सर्वं भौतिकं वा भवति, बौद्धिकं वा भवति। आहार-निद्रा- भय-मैथुनादिकं पशूनां मानवस्य च समानम् एव। बुद्धिः एका एव पशुभ्यः मानवं पृथक् करोति। मानवश्च प्रथानतया बुद्धिजीवः। एतस्य साधक-बाधकानि सर्वाण्यपि स्वबुद्धिसम्पादितान्येव। उत्तमः पुरुषः बुद्ध्या विवेकसम्पन्नः सन् आत्मानम् उद्धरति। यः स्वीयं सर्वं कार्यं आलोच्य विवेकेन, बुद्धया करोति सः बुद्धिमान् इति उच्यते। बुद्धेः सामर्थ्यं, मानवम् असामान्यं, अद्वितीयं च करोति। एवं मानवजीवनकारकेषु,मानवीयसहजसम्पत्सु अन्यतमायाः बुद्धेः स्वरूपस्य परिचयः अत्र लभ्यते।

अत्र इदम् अवगच्छतु ; पदार्थाः सप्त। तत्र गुणाः चतुर्विंशतिः (२४)। चतुर्थपाठ्यांशस्य

(IV Unit) मध्ये गुणाः निरूपिताः। तत्र बुद्धिपर्यन्तं क्रमेणैव गुणनिरूपणं जातम्। परं ततः प्रभृति मूलग्रन्थे (Text) बुद्धेः भेदाः प्रपञ्चिताः। तत्रापि यथार्थानुभवस्य चातुर्विधानां ज्ञानानाम्, तत् (प्रमा) ज्ञानजनकानां प्रत्यक्ष-अनुमान- उपमान- शब्दाख्यानां प्रमाणानां च स्वरूपकथनं प्रवृत्तम् । मध्ये च प्रसङ्गवशात् करण-कारण-कार्याणां स्वरूपं प्रस्तुतम्। अन्ततः अवशिष्टाः सख-दुःखादयः निरूपिताः। एवम्, गुणविभागनिरूपणम् अन्तरितम् आसीत् । अन्तरितः अवान्तरभागः स्पष्टप्रतिपत्तये बुद्धिः इति नाम्ना ( V Unit) पञ्चमपाठ्यांशे निरूप्यते इति।

## ५.१. लक्ष्याणि

बुद्धिः कश्चन पदार्थः। इयं गुणेषु अन्तर्भवति। इयम् आत्मगुणः। बुद्धिः आत्मनि (जीवे) समवायसम्बन्धेन विद्यते। अस्मिन् पाठ्यांशे (छ्दत्द्य) बुद्धेः चर्चा प्रचलति। बुद्धिः नाम का ? तस्याः प्रकाराः के ? बुद्धि-ज्ञानयोः कः सम्बन्धः ? बुद्धेः स्थूलाः प्रकाराः के ? सूक्ष्माश्च प्रकाराः के ? वास्तविकबुद्धिः कीदृशी ? सा कतिधा भवति ? अवास्तविकबुद्धिः कीदृशी ? सा कतिधा भवति ? इत्येते विषयाः ज्ञातव्याः सन्ति। तदर्थम् उद्दिष्टः अयं पाठ्यांशः। एतत्पाठ्यांशस्य अध्ययनेन-

- बुद्धेः समान्यलक्षणम् अवगन्तुं पारयति।
- स्मृतेः -अनुभवस्य च स्वरूपं स्वभावं च पठितुं पारयति।
- अनुभवस्य प्रकारद्वयं लिखितुं समर्थः भवति।
- यथार्थानुभवस्य प्रकारान् अवगच्छति।
- चतुर्णां प्रमाणानां स्वरूपम् अवगच्छति।
- अयथार्थानुभवस्य प्रकारान् ज्ञातुम् अपि समर्थः भवति।

## ५.२. बुद्धिः

### ५.२.१. बुद्धिः - निर्वचनम्

सर्वव्यवहारहेतुः ज्ञानं बुद्धिः। सर्वस्य व्यवहारः सर्वव्यवहारः,तस्य हेतुः सर्वव्यवहारहेतुः। व्यवहारः नाम ज्ञानजनकःशब्दप्रयोगः। नाम,यत्किञ्चित् सम्बन्धिनः ज्ञानस्य जननाय=अवगाहनासम्पादनाय, कृतं शब्दोच्चारणा- त्मकं भाषणम्। अर्थं बुद्ध्वा शब्दरचना इति न्यायेन अर्थज्ञानस्य वा विषयस्य वा वस्तुनः वा अवगाहना-सम्पादनं प्रति शब्दप्रयोगस्य (भाषणस्य) हेतुत्वं साधितम् अस्ति। तथा च अवगाहनासम्पादकः यः शब्दप्रयोगः, उच्चारणम् अथवा भाषणम्, तत्र हेतुभूतं ज्ञानम् एव बुद्धिः भवति। इयं च बुद्धिः उपलब्धिः, ज्ञानम्, प्रत्ययः, इत्यादिभिः

शब्दैः अपि अभिधीयते। इयं च अर्थान् उद्रव्य-गुण- कर्म-सामान्य- विशेष-समवाय- अभावात्मकान् प्रकाशयति उबोधयति, अत एव अर्थप्रकाशः बुद्धिः इति कथनम् अपि समायातम्।

### ५.२.२. बुद्धिः - भेदाः

सा प्रथमतः १.स्मृतिः २.अनुभवश्च इति द्विविधा भवति। तत्र अनुभवः अपि १.यथार्थः २.अयथार्थश्च इति द्विविधः भवति। यथार्थानुभवः १.प्रत्यक्ष २.अनुमिति ३.उपमिति ४.शाब्द-भेदात् चतुर्विधः वर्तते। अयथार्थानुभवः अपि १.संशय २.विपर्यय ३.तर्कभेदात् त्रिविधः विद्यते। पुनः अन्येन निमित्तेन बुद्धिः, १.नित्या २.अनित्या चेति द्विविधा। ईश्वरीया बुद्धिः नित्या। अन्यविषयिणी बुद्धिः अनित्या।

### ५.२.३. बुद्धिः- स्मृति-अनुभवयोः लक्षणम्

संस्कारमात्रजन्यं स्मृतिः। प्रथमम् अनुभवः, ततः अनुभवात् मनसि आरूढः कश्चन संस्कारः गुणः।

तदनन्तरम् एतस्मात् संस्कारगुणात् स्मृतिः जायते इति स्मृतेः क्रमः (= अनुभवः > संस्कारः > स्मृतिः ) भवति। एवं स्थितौ अत्र क्रमे, द्वितीयस्थाने संस्कारः वर्तते खलु । तस्य एव भावना इति अपरं नाम। तस्मात् भावना नामकात् संस्कारात् जायमानं ज्ञानम् एव स्मृतिः भवति। पर्यवसानतः ज्ञातविषयकज्ञानम्, ज्ञातस्य =अनुभवम् आगतस्य, विषयस्य,वस्तुनः वा, ज्ञानम् उस्मरणरूपं ज्ञानम् एव स्मृतिः इति पर्यवश्यति।

**स्वावलोकनप्रश्नाः**

१)'संस्कारस्य अपरं नाम किम् ?

२).किं ज्ञानं ज्ञातविषयकज्ञानं भवति ?

तद्भिन्नं ज्ञानम् अनुभवः। तस्मात् भिन्नम् उतद्भिन्नम्। अत्र तद् शब्देन स्मृतिः गृह्यते। तथाच स्मृतेः भिन्नं प्रत्यक्ष-अनुमान-उपमान-शब्दप्रमाणैः जायमानम् अनुभूत्यात्मकं ज्ञानम् अनुभवः भवति। अनुभवः अपि यथार्थानुभवः-अयथार्थानुभवः इति द्विविधः।

## ५.२.४.बुद्धिः-यथार्थ-अयथार्थानुभवयोः लक्षणम्

यथार्थानुभवः;तद्वति तत्प्रकारकानुभवः यथार्थः। सैव प्रमा इति उच्यते। यथा–रजते इदं रजतम् इति। तस्य अयम् अभिप्रायः। अर्थम् अनतिक्रम्य यथार्थम्, यथार्थम् अनुभवम् यस्य तत् (ज्ञानम्) यथार्थानुभवं ज्ञानम् । अत्र अर्थशब्देन अवस्थाम्, दशाम् आप्तः, यत्किञ्चित् प्रकारकः, विशेषगुणान्वितः पदार्थः गृह्यते। सर्वः पदार्थः सर्वदा काञ्चित् अवस्थां प्राप्य एव विद्यते। प्राप्ता सा अवस्था प्रकारः इति व्यवहृतः भवति। एवं सर्वः अपि पदार्थः यत्किञ्चित् प्रकारक एव भवति। यः पदार्थः यम् प्रकारम् आप्तः ,सः पदार्थः तम् प्रकारम् अनतिक्रम्य, तेनैव प्रकारेण यदि अवगतः भवति – प्रकारविशिष्टम् तम् अर्थम् अनतिक्रम्य जायमानः सः अनुभवः यथार्थानुभवः भवति। उदाहरणम्–रजते इदं रजतम् इति। अत्र रजतम्, किञ्चित् वस्तु। तस्मिन् रजते रजतत्वं विद्यते। तत् रजतत्वं च धर्मः/प्रकारः। अतः रजतं प्रकृते रजतत्वविशिष्टं भवति। एवम् अत्र रजतत्वप्रकारकं रजतं तेनैव प्रकारेण अवगतं भवति इति रजते इदं रजतम् इति ज्ञा,नं यथार्थानुभवज्ञानाय उदाहरणं भवति। अस्य यथार्थानुभवज्ञानस्य एव प्रमा इति व्यवहारः अस्ति।

अयथार्थानुभवः;तदभाववति तत्प्रकारकानुभवः अयथार्थः, सः एव भ्रमः इत्युच्यते, यथा,शुक्तौ इदं रजतम् इति। तस्य अयम् अभिप्रायः। अर्थम् अनतिक्रम्य यथार्थम्, यथार्थम् अनुभवम् यस्य तत् (ज्ञानम्) यथार्थानुभवम्,न यथार्थानुभवम् (ज्ञानम्),अयथार्थानुभवम्। अत्र अर्थशब्देन अवस्थाम्,दशां वा आप्तः, यत्किञ्चित् प्रकारकः , विशेषगुणान्वितः पदार्थः गृह्यते। सर्वः पदार्थः सर्वदा काञ्चित् अवस्थाम् प्राप्य एव विद्यते। प्राप्ता सा अवस्था प्रकारः इति व्यवहृतः भवति। एवं सर्वः अपि पदार्थः यत्किञ्चित् प्रकारक एव भवति। यः पदार्थः यम् प्रकारम् आप्तः, सः पदार्थः तम् प्रकारम् अतिक्रम्य, अन्येन प्रकारेण यदि अवगतः भवति – अन्यप्रकार- विशिष्टत्वेन भावितं तम् , वस्तुतः स्थितम् अर्थम् अतिक्रम्यउअतथात्वेन, जायमानः सः अनुभवः अयथार्थानुभवः भवति। उदाहरणम्- -शुक्तौ इदं रजतम् इति। इदं वाक्यं शुक्तिं दृष्ट्वा रजतम् इति भ्रान्तस्य जातं ज्ञानं वर्णयति। अत्र शुक्तिः यत्किञ्चित् वस्तु। अत्र शुक्तेः शुक्तित्वं धर्मः/प्रकारः। शुक्तिः शुक्तित्वविशिष्टा भवति। शुक्तौ शुक्तित्वं च प्रकारः। परम् अत्र वस्तुतः शुक्तौ रजतत्वधर्मः नास्ति। शुक्तिः रजतत्वविशिष्टा न भवति। शुक्तौ रजतत्वं च न प्रकारः। एवं रजतत्वाभाववतीं शुक्तिं इदं रजतम् इति रजतत्वप्रकारेण अवगच्छति

इति शुक्तौ इदं रजतम् इति ज्ञानम् अयथार्थानुभवज्ञानाय उदाहरणं भवति। अस्यैव अयथार्थानुभवस्य भ्रमः इति व्यवहारः।

| **स्वावलोकनप्रश्नाः** |
|---|
| १)'रजते इदं रजतम्' इति कस्य अनुभवस्य उदाहरणं भवति ? |
| २).अयथार्थानुभवस्य अपरः व्यवहारः कः ? |

### ५.२.५. यथार्थानुभवस्य चातुर्विध्यम्

यथार्थानुभवः १.प्रत्यक्ष २.अनुमिति ३.उपमिति ४.शाब्द-भेदात् चतुर्विधः। एवं प्रत्यक्ष-अनुमिति- उपमिति- शाब्दज्ञानानां करणंउअसाधारणकारणं किञ्चित् विद्यते। तस्यैव प्रमाणम् इति व्यवहारः वर्तते। एवं प्रत्यक्ष- अनुमिति - उपमिति- शाब्दज्ञानानां जनकम् असाधारणकारणं प्रमाणम् अपि, प्रत्यक्ष-अनुमान-उपमान-शब्दभेदात् चतुर्विधं भवति इति अवधेयम्।

### ५.२.५.१.प्रत्यक्षज्ञानम् > प्रत्यक्षप्रमाणम्

इन्द्रिय-अर्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्। इन्द्रियस्य अर्थेनउवस्तुना, सह यः सम्बन्धः सः एव सन्निकर्षः इति उच्यते। इन्द्रिय-अर्थसन्निकर्षश्च १.संयोगः २.संयुक्तसमवायः ३.संयुक्तसमवेतसमवायः ४.समवायः ५.समवेतसम -वायः ६.विशेष्य-विशेषणभावश्च इति षड्विधः। तस्मात् सन्निकर्षात् जायमानं ज्ञानमेव प्रत्यक्षज्ञानं भवति। प्रत्यक्ष-ज्ञानस्य, करणम् =असाधारणकारणं (इन्द्रिय-अर्थ/वस्तु,सन्निकर्षः) यत्, तदेव प्रत्यक्षप्रमाणं भवति। एवं प्रत्यक्षं > प्रत्यक्षज्ञानं > प्रत्यक्षप्रमाणं च बोध्यम्।

### ५.२.५.२. अनुमितिज्ञानम् > अनुमानप्रमाणम्

अनुमितिकरणम् अनुमानम्। अनुमितेः करणम् अनुमितिकरणम्। अनुमितिः उनिश्चयज्ञानम्। तस्य असाधारणं कारणम् अनुमानप्रमाणं भवति। परामर्शात् जन्यं ज्ञानम् अनुमितिः। व्याप्तिविशिष्टायाः पक्षधर्मतायाः ज्ञानं परामर्शः, यथा,वह्निव्याप्यधूमवान् अयं पर्वतः इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानम् अनुमितिः। यत्र यत्र धूमः तत्र अग्निः इति साहचर्यनियमः व्याप्तिः। एवं व्याप्तिज्ञान > परामर्शज्ञान > अनुमितिज्ञान > अनुमान- प्रमाणानि ज्ञेयानि। अत्र

व्याप्ति-परामर्श-पक्षधर्मता-पक्ष-विपक्ष-सपक्षाः शास्त्रीयसाङ्केतिकपदानि। अनुमानप्रमाण- निरूपणावसरे एतेषां साङ्केतिकपदानां अर्थस्य विवरणं द्रष्टव्यम्।

**स्वावलोकनप्रश्नाः**

१). परामर्शस्य स्वरूपं किम् ?

२). व्याप्तिज्ञानं कीदृशम् ?

**५.२.५.३. उपमितिज्ञानम् > उपमानप्रमाणम्**

पदार्थतत्वज्ञानसाधनीभूतम् अन्यत् तृतीयं प्रमाणम् उपमानम्। ज्ञातस्य पदार्थस्य साम्यात् , अज्ञातस्य पदार्थान्तरस्य ज्ञानम् अनेन प्रमाणेन जायते।

(मूलम्) उपमितिकरणम् उपमानम्। सञ्ज्ञा-सञ्ज्ञिसम्बन्धज्ञानम् उपमितिः। तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणं व्यापारः। तथा हि - कश्चित् गवयपदार्थम् अजानन् कुतश्चित् आरण्यकपुरुषात् 'गोसदृशो गवयः 'इति श्रुत्वा, वनं गतः, वाक्यार्थं स्मरन् गोसदृशपिण्डं पश्यति। तदनन्तरं अयं गवयपदवाच्यः' इति उपमितिः उत्पद्यते।

(विवरणम्) इमानि च वाक्यानि, उपमितिज्ञानस्य उपमानप्रमाणस्य च स्वरूपं स्वभावं च वर्णयन्ति। उपमिति- नामकस्य यथार्थानुभवस्य करणम् उपमानम्। सञ्ज्ञाउनामवाचकं पदं, सञ्ज्ञिउतन्नामकं वस्तु, तयोः सम्बन्धज्ञानम्उ पद-पदार्थसम्बन्धस्य ज्ञानम् उपमितिः। तादृश्याः उपमितेः असाधारणकारणं, सादृश्यज्ञानं भवति। अतिदेशवाक्यार्थस्यउ'एतत् सदृशः सः' इति सादृश्यबोधकवाक्यार्थस्य स्मृतिः करणव्यापारः।

तत्कथम् इति चेत् उच्यते। येन गवयपदं वारं वारं श्रुतम्,परं तदर्थः मृगविशेषः कदाचिदपि न दृष्टः, सः कदाचित् अरण्यवासिनः पुरुषात् 'गोसदृशो गवयः' इति शृणोति। कस्मिंश्चित् समये अरण्यं गच्छति। तत्र आरण्यक-पुरुषोक्तस्य अतिदेशवाक्यार्थस्य अर्थं स्मरन् गोसदृशं मृगविशेषं पश्यति। ततः तस्य ' गवयपदार्थः मृगविशेषः ' इति ज्ञानम् आप्नोति(उजायते) । तदिदं ज्ञानम् एव उपमितिः। अत्र गवयपदं सञ्ज्ञा , गवयः सञ्ज्ञी। अनयोः सम्बन्धज्ञानम्उ गवयपदस्य गवयमृगः

अर्थः इति ज्ञानम् उपमितिः। आरण्यकपुरुषोदितं 'गोसदृशो गवयः 'इति अतिदेशवाक्यम्। अरण्ये गोसदृशमृगदर्शनेन जातं गवये गोसादृश्यज्ञानम् उपमितिकरणम् उपमानप्रमाणम् । तदा जातं अतिदेशवाक्यार्थस्मरणं व्यापारः। एवं सादृश्यज्ञानेन अतिदेशवाक्यार्थस्मरणद्वारा उपमिति जायते। तत् करणं सादृश्यज्ञानं उपमानप्रमाणं भवतीति भावः।

एवं सादृश्यज्ञानमिव १).असाधारणधर्मज्ञानं २).वैधर्म्यज्ञानं च उपमितिं जनयतः। यथा-१).'गजाकृतिः नासाग्रलसत्-शृङ्गः खड्गमृगः'इति वाक्यात् जायमानायाः उपमितेः नासाग्रभागस्थशृङ्गः अपि असाधारणः धर्मः करणं भवति। २).एवमेव 'अश्वादिविसदृशाकृतिः-निम्नोन्नतोष्ठः,चलदोष्ठः दीर्घग्रीवश्च उष्ट्रः' इति वाक्यात् जायमानायाः उपमितेः वैधर्म्यज्ञानं कारणं भवति।

| **स्वावलोकनप्रश्नाः** |
| --- |
| १). उपमितिः प्रमाणं वा ज्ञानं वा ? |
| २). ' यथा गौः तथा गवयः ' इति किम् ? |

**५.२.५.४. शाब्दज्ञानम् > शब्दप्रमाणम्**

आप्तवाक्यं शब्दः। आप्तस्य वाक्यम् आप्तवाक्यम्। आप्तश्च यथार्थवक्ता सत्यवादी विश्वसनीयः। वाक्यं तु पदसमूहः। शक्तं पदम्। शक्तम् इत्यस्य शक्तिविशिष्टम् इत्यर्थः। शक्तिश्च अर्थ (वस्तु) स्मृतेः अनुकूलः पद-पदार्थयोः सम्बन्धः। सः च अस्मात् शब्दात् अयम् अर्थः बोद्धव्यः इति ईश्वरेच्छासङ्केतरूपः। आप्तस्य वाक्यम् इत्यत्र षष्ठी उच्चरितत्वरूपम् अर्थं बोधयति। तथा च आप्तोच्चरितत्वे सति, वाक्यत्वं शब्दप्रमाणस्य लक्षणं भवति। पदज्ञानं करणम्। पदजन्यपदार्थोपस्थितिः व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः। तादृशशाब्दज्ञानस्य असाधारण- कारणम् एव शब्दप्रमाणम् भवति। एवं शब्दः > शब्दज्ञानम् > शब्दप्रमाणम् बोध्यं भवति।

| **स्वावलोकनप्रश्नाः** |
| --- |
| १) आप्तः कः ? |
| २) वाक्यं किम् ? |

३) शक्तिः कीदृशी ?

**५.३. उपसंहारः**

एवम् अत्र बुद्धेः लक्षणम् उक्तम्। बुद्धेः प्रकारद्वयं प्रदर्शितम्। स्मृतेः लक्षणं कथितम्। अनुभवस्य द्वैविध्यम् बोधितम्। यथार्थानुभवस्य अयथार्थानुभवस्य च लक्षणं प्रोक्तम्। यथार्थानुभवस्य प्रकारचतुष्टयम्, प्रत्यक्ष-अनुमिति- उपमिति-शाब्दज्ञानानि, प्रत्यक्ष-अनुमान -उपमान- शब्दप्रमाणानि च दर्शितानि।

**५.४. अभ्यासः**

अ).यथार्थानुभवस्य लक्षणम् उक्त्वा ,लक्ष्ये समन्वयः क्रियताम् ?

इ).बुद्धिभेदान् निरूपयत ?

* * *

# UNIT-VI;
# कारणत्रयम्

## संरचना

६.०. परिचयः

६.१. लक्ष्याणि

६.२. करणस्य लक्षणम्

६.३. कारणस्य लक्षणम्

६.४. कार्यस्य लक्षणम्

६.५. कारणस्य त्रैविध्यम्

६.५.१.कारणस्य त्रैविध्यम् > समवायिकारणम्- निर्वचनम् > उदाहरणम् > समन्वयः

६.५.२.१.कारणस्य त्रैविध्यम् > असमवायिकारणम्-(प्रथमम्) निर्वचनम् > उदाहरणम् > समन्वयः

६.५.२.२.कारणस्य त्रैविध्यम् > असमवायिकारणम्-(द्वितीयम्) निर्वचनम् > उदाहरणम् > समन्वयः

६.५.३.कारणस्य त्रैविध्यम् > निमित्तकारणम्- निर्वचनम् > उदाहरणम् > समन्वयः

६.६.करणस्वरूपस्य समापनम्

६.७. उपसंहारः

६.८. अभ्यासः

## ६.०. परिचयः;

सर्ववस्तुप्रकाशकः वा सर्वव्यवहारहेतुः वा बुद्धिः भवति। सा च स्मृतिः अनुभवश्च इति द्विविधा। संस्कारमात्र- जन्यं ज्ञानम् स्मृतिः। तद्भिन्नं ज्ञानम् अनुभवः। अनुभवः अपि यथार्थः अयथार्थश्च इति द्विविधः। यथार्थानुभवः अपि प्रत्यक्ष-अनुमिति-उपमिति-शाब्द-भेदात् चतुर्विधः। एवं यथार्थानुभवकरणम् अपि प्रत्यक्ष-अनुमान-उपमान -शब्द-भेदेन चतुर्विधम्। अत्र करणशब्दः प्रयुक्तः विद्यते। तस्य लक्षणं कथयन् प्रसङ्गवशात् करणलक्षणम्, कार्यलक्षणम्,कारणलक्षणम्,कारणत्रैविध्यं च विवरणीयम् आसीत्। तत् लक्ष्य-लक्षण-समन्वयादीनां परिचयः अत्र लभ्यते।

## ६.१. लक्ष्याणि

तर्कशास्त्रं पदार्थनिरूपकं शास्त्रम्। पदार्थानां स्वरूपम् अत्र निरूप्यते। पदार्थानां स्वभावश्च विचार्यते। किञ्च इदं पदार्थविश्लेषकं च शास्त्रम्।सुसूक्ष्मं पदार्थविश्लेषणं अत्र प्रचलति। विश्लेषणे च विभजनम्, विभक्तस्य निर्वचनम्, निरुक्तस्य दलकृत्यसाधनम्, परिष्कारप्रदर्शनम्, उपयोगकथनम्, च अन्तर्भवति। इदं च विश्लेषणं स्तरभेदेन पदार्थस्वभावविज्ञानाय उपकरोति। वस्तुतः विश्लेषणं विषयस्य शास्त्रीयतां पुष्णाति। विश्लेषणगता शास्त्रीयता कार्य-कारणभावम् अवलम्ब्य सूक्ष्मतरा वा सूक्ष्मतमा वा भवति। कार्य-कारणभाव पुरस्सरं विश्लेषितः विषयः प्रामाणिकः भवति। यतश्च इदं पदार्थविश्लेषकं,पदार्थनिरूपकं च शास्त्रं ततः पदार्थयोः व्यवस्थितः कार्य-कारणभावः अवश्यम् अवगन्तव्यः भवति। एवं स्थितौ कार्य-कारणभावः इत्यत्र कार्यं नाम किम् ? कारणं नाम किम् ? इति प्रश्नः उदेति। तत्र समाधानतया प्रवृत्तः अयं पाठ्यांशः। एतत्पाठ्यांशस्य अध्ययनेन —

- करणलक्षणम् अवगन्तुं पारयति।
- कारणसामान्यलक्षणं पठितुं पारयति।
- समवायिकारणलक्षणं लिखितुं समर्थः भवति।
- असमवायिकारणलक्षणं अवगच्छति।
- निमित्तकारणस्वभावं च ज्ञातुं समर्थो भवति।

## ६.२. करणस्य लक्षणम्

(मूलम् ) (व्यापारवत्) असाधारणं कारणं करणम् ।

(विवरणम्) इदं वाक्यं करणस्य स्वरूपं निरूपयति।

करणस्य स्वरूपम् ;व्यापारः अस्य अस्ति इति व्यापारवत् नाम यत्क्रियायाः (व्यापारस्य) अनन्तरं कार्यस्य उत्पत्तिः भवति, तत्।तत्र व्यापारस्य विद्यमानत्वेन, तत्(उकरणम्) अवश्यं व्यापारवत् भवति। अतः एव हेतोः तत् क्रियायां प्रकृष्टसाधनम् अपि भवति। साधारणं कारणं साधारणकारणम्, न साधारणकारणम्, असाधारणकारणम्। कारणानि साधारणानि, असाधारणानि द्विविधानि। एवञ्च व्यापारवत्त्वं च, असाधारणकारणत्वं च करणस्य लक्षणं भवति। तस्य अयम् अभिप्रायः। क्रियायां प्रकृष्टं साधनम्, असाधारणकारणं करणं भवति। मुख्यतया स्थित्वा यत् कार्यं निर्वर्तयतिउकार्यं साधयति, कार्यात्मना विपरिणमते, कार्यात्मताम् आप्नोति, तत् असाधारणकारणम् एव करणम् इति उच्यते। ईश्वर -अदृष्ट -देश-

कालात्मकानि साधारणकारणानि। एतानि कार्यस्य सामान्यकारणानि भवन्ति। ईश्वरेच्छायाः अभावे तृणम् अपि न चलति इति ईश्वरः कार्यस्य सामान्यं कारणं भवति। जीवकोटेः अदृष्टं, पापपुण्यात्मकम् अनुसृत्यैव, प्रपञ्चस्य सृष्टिः इति, जीवादृष्टम् अपि कार्यस्य सामान्यं कारणं भवति। एवं, यः कोऽपि पदार्थः यत्र वा क्वचित् उत्पद्यते। यदा कदा वा उत्पद्यते। तथा यत्र कुत्रापि वा उत्पत्तुम् , यदा कदापि वा उत्पत्तुम् अर्हत्वे अपि, सर्वः अपि पदार्थः तत्तत् नियते एव देशे, नियते एव काले उत्पद्यते ,न अन्यत्र, न वा अन्यदा । अतः हेतोः नियतः देशः , नियतः कालश्च इति द्वौ अपि कार्यस्य सामान्यं कारणं भवतः। अतः ईश्वर-अदृष्ट-देश-कालादयः कार्यसामान्यं प्रति उयस्य कस्यापि वा कार्यस्य कारणानि भवन्ति। तत्तत् कार्यविशेषं प्रति कारणानि असाधारणकारणानि। एवञ्च घटं प्रति ईश्वरादयः साधारणकारणानि, दण्ड-चक्र-कुलालादीनि असाधारणकारणानि भवन्ति। तादृशेषु असाधारणकारणेषु मुख्यव्यापारनिर्वर्तकं कारणम् एव करणं भवति।

## ६.३. कारणस्य लक्षणम्

(मूलम् ) कार्यनियतपूर्ववृत्ति कारणम्। यथा घटादिकं प्रति दण्डादि।

(विवरणम्) इदं वाक्यं कारणस्य स्वरूपं निरूपयति।

कारणस्य स्वरूपम् ;पूर्वस्मिन् वृत्ति पूर्ववृत्ति,नियतं पूर्ववृत्ति यस्य तत्, नियतपूर्ववृत्ति,कार्यस्य नियतपूर्ववृत्ति, कार्यनियतपूर्ववृत्ति इति कारणलक्षणपरवाक्यस्य विग्रहः। तस्य अयम् अभिप्रायः। तत्तत् कार्योत्पत्तेः पूर्वम् अवश्यं विद्यमानः तत्तत्कार्यस्य कारणं भवति। कार्यं प्रति नियतत्वे सति ,पूर्ववृत्तित्वं कारणस्य लक्षणम्। तदेव हि कारणं , यत् कार्योत्पत्तेः अव्यवहिततया वर्तते, पूर्वं वर्तते, अवश्यं वर्तते। यथा- घटं प्रति दण्डादिः कारणम्। स हि घटोत्पत्तेः अव्यवहिततया वर्तते, पूर्वं वर्तते, नियततया च वर्तते। एवम् एव कुलाल-चक्र-मृत्तिकादीनि घट (उत्पत्तिं ) कार्यं प्रति कारणानि।एवम् एव तन्तवः, तूरीवेमादिकं च पटस्य। तन्तूनां पटरूपकार्यात् पूर्वभावः नियतः, तूरीवेमादिकस्य अपि पटात् पूर्वभावः नियतः । अतः पटादिकार्यं प्रति तन्तवः ,तूरीवेमादिकं च कारणम् । तथैव मृत्पिण्डः , घटस्य च कारणम्। मृत्पिण्डस्य घटरूपकार्यात् पूर्वभावः नियतः, अतः घटादिकार्यं प्रति मृत्पिण्डः कारणम्। तथा च कारणस्वरूपम् एवं ज्ञातुं शक्यते।

१).कारणं कार्यस्य पूर्वभावि भवेत्।
२).कारणस्य पूर्वभावित्वं च नियतं भवेत्।
३).कारणं कार्यस्य अव्यवहितपूर्वक्षणपर्यन्तं भवेत् ।

## ६.४. कार्यस्य लक्षणम्

(मूलम् ) कार्यं प्रगभावप्रतियोगि ।

(विवरणम्) इदं वाक्यं कार्यस्य स्वरूपं निरूपयति। प्राक् (=उत्पत्तेः पूर्वं) अभावः, प्रागभावः। प्रागभावस्य प्रति- योगि, प्रागभावप्रतियोगि इति कार्यलक्षणपरवाक्यस्य विग्रहः। तस्य अयम् अभिप्रायः। वस्तूत्पत्तेः प्राक् उपूर्वं, विद्यमानः यः उत्पद्यमानवस्तुनः अभावः, सः प्रागभावः भवति। तस्य प्रतियोगि इत्युक्ते,सर्वदा,उत्पद्यमानं वस्तु एव भवति। यच्च तादृशप्रागभावस्य प्रतियोगि भवति =उत्पद्यते, तत् कार्यम् इति कार्यस्य लक्षणं फलति। सर्वः अपि अभावः सप्रतियोगी भवति। यस्य अभावः कथ्यते तस्य अभावे सः प्रतियोगी(प्रतियोगितया सम्बद्धः) भवति इति नियमद्वयम् अस्ति। तं नियमम् अनुसृत्य घटस्य अभावे घटः प्रतियोगी। पटस्य अभावे पटः प्रतियोगी। धनस्य अभावे धनं प्रतियोगी, गृहस्य अभावे गृहं प्रतियोगी। तथा च वस्तूत्पत्तेः पूर्वं विद्यमानः अभावः प्रागभावः इति कथ्यते। प्रागभावप्रतियोगि, उत्पद्यमानं वस्तु भवति। तदेव कार्यम् इति नाम्ना न्यायशास्त्रे प्रसिद्धम्।यथा घटकार्यम् । घटस्य उत्पत्तिः इत्यर्थः। घटस्य उत्पत्तेः पूर्वं विद्यमानः अभावः घटप्रागभावः भवति। 'यस्य अभावः सः प्रतियोगी'इति नियमान्सारेण च घटाभावे प्रतियोगी घटः भवति। सः घटः एव कार्यम् इति उच्यते। एवम् एव पटाभावे पटः प्रतियोगी भवति। सः पटः एव कार्यम् इति उच्यते।

## ६.५. कारणस्य त्रैविध्यम्

(मूलम् ) कारणं त्रिविधम्, समवायि-असमवायि-निमित्तभेदात् ।

(विवरणम्) इदं वाक्यं कारणानि त्रिप्रकारकाणि इत्यंशं निरूपयति। १.समवायिकारणम् २.असमवायिकारणम् ३.निमित्तकारणम् इति कारणं त्रिविधं भवति।

६.५.१.कारणस्य त्रैविध्यम् > समवायिकारणम्- निर्वचनम् > उदाहरणम् ऊसमन्वयः

(मूलम्) यत्समवेतं तत् समवायिकारणम्, यथा, तन्तवः पटस्य, पटश्च स्वगतरूपादेः।

(विवरणम्) इदं वाक्यं त्रिषु कारणेषु अन्यतमं समवायिकारणं निरूपयति।

समवायिकारणस्य निर्वचनम् ; धर्मः घटत्वादिः धर्मिणि घटादौ विशेषणतया वर्तते। एवम् एव वस्तूनि दण्डादीनि क्वचित् वस्त्वन्तरे पुरुषादौ अपि विशेषणतया वर्तन्ते च। तत्र घटत्वादिः धर्मः घटादौ वा,वस्तूनि च वस्त्वन्तरे वा, केनचित् सम्बन्धेनैव

वर्तन्ते। सः च सम्बन्धः १.संयोगः २.समवायः ३.स्वरूपम् इत्यादिः। तत्र यत् वर्तते तत् आधेयं भवति।यस्मिन् वर्तते तत् अधिकरणं भवति।

१.द्रव्यस्य अन्येन द्रव्येण सह संयोगः सम्बन्धः। यथा जले घटं वर्तते। उभयोः द्रव्यत्वात् तत्र संयोगः सम्बन्धः। २.रूपादयः गुणाः, चलनरूपाः क्रियाः, गोत्वादयः जातयः स्व-स्व-अधिकरणेषु समवायसम्बन्धेन वर्तन्ते। एवम् अवयविनः पटादयः स्व-अवयवेषु तन्तुप्रभृतिषु समवायसम्बन्धेनैव वर्तन्ते।

३.अभावादयः अधिकरणेषु स्वरूपसम्बन्धेन वर्तन्ते। विशेषण-विशेष्ययोः, आधार-आधेययोश्च एवम् एव सम्बन्धः ज्ञेयः। शास्त्रव्यवहारे अस्य सम्बन्धस्य अत्यधिकं प्राधान्यं विद्यते।

एवं स्थितौ, यत् समवेतं तत् समवायिकारणंभवति। नाम,यस्मिन् कारणे समवायसम्बन्धेन विद्यमानं सत् कार्यम् उत्पद्यते, तत् समवायिकारणं भवति इत्यर्थः। प्रथमम् उदाहरणम् ; यथा तन्तवः पटस्य। अत्र तन्तवः पटं प्रति समवायिकारणम्। तन्तवः अवयवाः। पटस्तु अवयवी। अवयव-अवयविनोः च सम्बन्धः समवायः इति अवयवेषु तन्तुषु अवयवी पटः समवायसम्बन्धेन विद्यमानं सत् उत्पद्यते इति पटं प्रति तन्तवः समवायिकारणम्। एवमेव मृत्पिण्डं घटस्य समवायिकारणम्, एवं मुकुट कुण्ड लादीनां स्वर्णपिण्डं समवायिकारणं भवति।

द्वितीयम् उदाहरणम् ; यथा, पटश्च स्वगतरूपादेः; रूपं हि गुणः। पटगतरूपस्य आश्रयभूतः पटः गुणवत्त्वेन गुणी। गुण-गुणिनोः च सम्बन्धः समवायः। अतः रूपं पटे समवायसम्बन्धेन विद्यमानं सत् उत्पद्यत इति पटरूपं प्रति पटः समवायिकारणं भवति। एवम् एव गुणानां क्रियाणां च आश्रयद्रव्याणि, अवयविनां च अवयवाः समवायि- कारणानि भवन्तीति ज्ञेयम्।

६.५.२.१.कारणस्य त्रैविध्यम् > असमवायिकारणम्- निर्वचनम् > उदाहरणम् > समन्वयः

(मूलम् ) कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतं सत् कारणं असमवायिकारणम्,यथा, तन्तुसंयोगः पटस्य, तन्तुरूपं पटगतरूपस्य च।

(विवरणम्)इमानि वाक्यानि त्रिषु कारणेषु असमवायिकारणं निरूपयति। कार्येण सह एकस्मिन्नर्थे समवेतं सत् कारणं असमवायिकारणम् इति, कारणेन सह एकस्मिन्नर्थे समवेतं सत् कारणं असमवायिकारणम् इति च असम- वायिकारणस्य लक्षणद्वयम् अस्ति।

प्रथम-असमवायिकारणस्य निर्वचनम्; तत्र कार्येण सह एकत्र समवायसम्बन्धेन

विद्यमानं सत्, कारणं प्रथमम् असमवायिकारणं भवति। कार्यं कारणं चेति द्वयम् अपि एकत्र समवायेन वर्तते इति भावः। उदाहरणम् ; यथा तन्तुसंयोगः पटं प्रति। पटं प्रति तन्तुसंयोगः असमवायिकारणं भवति। अत्र कार्यं पटः, स हि तन्तुषु अवयव- अवयविनोः इति समवायेन वर्तते। एवं कारणं तन्तुसंयोगोऽपि तन्तुषु गुण-गुणिनोः समवायः इति समवायेन वर्तते। एवं कार्येण पटेन सह, एकत्र उतन्तुषु समवायेन वर्तमानं सत् तन्तुसंयोगः कारणं इति, सः पटं प्रति असमवायि- कारणं भवति।

६.५.२.२.कारणस्य त्रैविध्यम् > द्वितीय- असमवायिकारणम्- निर्वचनम् > उदाहरणम् > समन्वयः

(विवरणम्)कारणेन सह एकस्मिन्नर्थे समवेतं सत् कारणं द्वितीयम् असमवायिकारणम्। तस्य अयं भावः। कारणेन उस्वकार्यसमवायिकारणेन सह, एकत्र समवायसम्बन्धेन विद्यमानं सत्, कारणं द्वितीयम् असमवायिकारणं भवति। कारणं, स्वकार्यसमवायिकारणं च इति द्वयम् अपि एकत्र समवायेन वर्तेते इति भावः।उदाहरणम्;यथा तन्तुरूपं पटरूपं प्रति असमवायिकारणम्। अत्र कार्यं पटरूपम्। तस्य समवायिकारणं पटः। तेन सह, कारणं तन्तुरूपं, एकत्र = तन्तुषु समवायेन वर्तते। अवयवी पटः, येषु अवयवेषु तन्तुषु समवायेन वर्तते, तत्रैव तन्तुरूपं गुणः अपि समवायेन वर्तते इति तन्तुरूपं, पटरूपं प्रति असमवायिकारणं भवति। इदं द्वितीयम् असमवायिकारणं भवति। एवं रीत्या द्रव्यसामान्यं प्रति,सर्वत्र,अवयवाः समवायिकारणं भवन्ति। अवयवसंयोगः प्रथमलक्षणम् अनुसृत्य असमवायिकारणं भवति। अवयवानां रूपम् अवयविनः रूपं प्रति द्वितीयलक्षणम् अनुसृत्य असमवायिकारणं भवति इति बोध्यम्।

६.५.३.कारणस्य त्रैविध्यम् > निमित्तकारणम्- निर्वचनम् > उदाहरणम् > समन्वयः

(मूलम् ) तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तूरी-वेमादिकं पटस्य।

(विवरणम्) इदं वाक्यं त्रिषु कारणेषु निमित्तकारणं निरूपयति।

निमित्तकारणस्य निर्वचनम्;तत् च अदः=भयं च,तदुभयम्। तदुभयात् भिन्नम्,तदुभयभिन्नम् इति निमित्तलक्षणपर- वाक्यस्य विग्रहः। सर्वस्यापि कार्यस्य कारणसामग्र्यां किञ्चित् समवायिकारणम्, किञ्चित् असमवायिकारणं च भवति। तदुभयभिन्नानि सर्वाण्यपि कारणानि निमित्तकारणानि भवन्तीति भावः। एवं समवायिकारणात्, असमवायि- कारणात् च भिन्नं कारणं निमित्तकारणं भवति।

समवायिकारणभिन्नत्वे सति असमवायिकारणभिन्नत्वे सति कारणत्वं निमित्तकारणस्य लक्षणम् इति फलति। उदाहरणम्; यथा तूरी-वेमादिकं पटस्य। पटं प्रति तन्तवः समवायि- कारणम्, पटं प्रति तन्तुसंयोगः असमवायिकारणम्, इतराणि तूरी-वेमादीनि निमित्तकारणानि भवन्ति। अत्र तूरी- वेमादिकं पटस्य समवायिकारणं वा असमवायिकारणं वा न भवति,तूरी-वेमादिषु समवायिकारणभिन्नत्वस्य, असम-वायिकारणभिन्नत्वस्य च सत्वात् पटं प्रति तूरी-वेमादिकम् निमित्तकारणं भवति।

## ६.६.करणस्वरूपस्य समापनम्

(मूलम्) तदेतत् त्रिविधकारणमध्ये यत् असाधारणकारणं तदेव करणम् ।

(विवरणम् ) इदं वाक्यं करणस्वरूपवर्णनस्य समापनं निरूपयति। एवं दर्शितेषु त्रिविधकारणेषु मध्ये यत् कार्य-उत्पत्ति-अनुकूलव्यापारजनकम् असाधारणकारणं तदेव करणं भवति। करणं हि यत्किञ्चित् द्वारा कार्यं जनयति। एवं द्वारा इति व्यवहारविषयः एव व्यापारः, तादृशव्यापारविशिष्टं यत् असाधारणकारणं तदेव करणं भवति। एवं, यत् उत्पद्यतेउप्रागभावप्रतियोगि,तत् कार्यम्,तदुत्पत्तये आवश्यकानि यानि कारणानि,तेषु च यानि असाधारणकारणानि, तत्रापि व्यापारवत् असाधारणकारणं तदेव करणम् इति सिद्धम्।

## ६.७. उपसंहारः

एवम् अत्र त्रिविधानां कारणानां समवायि- असमवायि-निमित्तानां लक्षणानि प्रदर्शितानि। एतेषु त्रिषु कारणेषु मध्ये समवायिकारणम् असाधारणकारणं भवति। तत् एव 'करणम्' ज्ञातव्यं भवति। एवम् अत्र कार्य-कारण- करणानां स्वरूप-स्वभावौ च अत्र निरूपितौ ।

## ६.८. अभ्यासः

अ) कारणस्य लक्षणम् उक्त्वा,तस्य भेदान् सोदाहरणं निरूपयत ?

इ) ' कार्यनियतपूर्ववृत्ति कारणम् ' - विवृणुत ?

* * *

**UNIT-VII**

**प्रत्यक्षप्रमाणम्**

## संरचना

७.०. परिचयः

७.१. लक्ष्याणि

७.२. प्रत्यक्षप्रमाणम्

७.२.१.प्रत्यक्षप्रमाणम्-प्रत्यक्षज्ञानम् - निर्वचनम्

७.२.२.प्रत्यक्षज्ञानस्य द्वैविध्यम्

७.२.३.इन्द्रियार्थसन्निकर्षः-निर्वचनम्

७.२.४.इन्द्रियार्थसन्निकर्षः-षड्विधः

७.२.४.१.इन्द्रियार्थसन्निकर्षः-संयोगः

७.२.४.२.इन्द्रियार्थसन्निकर्षः-संयुक्तसमवायः

७.२.४.३.इन्द्रियार्थसन्निकर्षः-संयुक्तसमवेतसमवायः

७.२.४.४.इन्द्रियार्थसन्निकर्षः-समवायः

७.२.४.५.इन्द्रियार्थसन्निकर्षः-समवेतसमवायः

७.२.४.६.इन्द्रियार्थसन्निकर्षः-विशेषण-विशेष्यभावः

७.३. उपसंहारः

७.४. अभ्यासः

### ७.०. परिचयः

मानवः बुद्धिजीवः। बुद्धिः मानवाय विश्वगतानां समस्तवस्तूनां समाचारं ददाति। अखिलार्थानां ज्ञानं जनयति। अतः बुद्धिं सर्ववस्तुप्रकाशिका इति वा, सर्वव्यवहारहेतुः इति वा कथयन्ति। एषा बुद्धिः स्मृतिज्ञानम् अनुभवज्ञानं च इति द्विविधं विद्यते। अनुभवजन्यं ज्ञानम् , स्मृतिः भवति। स्मृतेः भिन्नं ज्ञानम् अनुभवज्ञानं भवति। तत्र अनुभवज्ञानम् अपि यथार्थज्ञान-अयथार्थज्ञानभेदेन द्विविधं विद्यते। तत्र यथार्थानुभवज्ञानम् अपि १.प्रत्यक्षज्ञानम् २.अनुमितिज्ञानम् ३.उपमितिज्ञानम् ४.शाब्दज्ञानम् इति चतुर्विधम् अस्ति। यथार्थानुभवज्ञानस्यैव प्रमा इति व्यवहारः अस्ति। प्रमायाः करणं प्रमाणम् इति कथ्यते। प्रमायाः करणं नाम प्रमाजनकम् असाधारणकारणम् इत्यर्थः।

यतः यथार्थानुभवज्ञानं (प्रमा) १.प्रत्यक्षज्ञानम् २.अनुमितिज्ञानम् ३.उपमितिज्ञानम् ४.शाब्दज्ञानम् इति चतुर्विधम् अस्ति, तस्मादेव कारणात्

तादृशप्रमायाः (यथार्थानुभवज्ञानस्य) करणभूतं प्रमाणम् अपि १.प्रत्यक्षप्रमाणम् २.अनुमानप्रमाणम् ३.उपमानप्रमाणम् ४.शब्दप्रमाणम् इति चतुर्विधं विद्यते। एवं चतुर्विधेषु प्रमाणेषु अयं पाठ्यांशः प्रत्यक्षज्ञानम्- प्रत्यक्षप्रमाणं च अधिकृत्य प्रस्तौति।

## ७.१. लक्ष्याणि

७.२. प्रत्यक्षप्रमाणम्

७.२.१.प्रत्यक्षप्रमाणम्- प्रत्यक्षज्ञानम्-निर्वचनम्

(मूलम्) प्रत्यक्षज्ञानकरणं प्रत्यक्षम् (प्रमाणम्)। इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्।
(विवरणम्) इमिनि वाक्यानि प्रत्यक्षप्रमाणस्य प्रत्यक्षज्ञानस्य च स्वरूपं निरूपयन्ति। यथार्थानुभवज्ञानं प्रत्यक्ष- अनुमिति-उपमिति-शाब्दम् इति चतुर्विधं विद्यते। चतुर्विधात्मकस्य यथार्थानुभवज्ञानस्यैव प्रमा इति अपरं नाम वर्तते। तादृशप्रमायाः,करण्म् (=असाधारणकारणम्)एव प्रमाणं भवति। एवं चतुर्षु प्रमाणेषु, यत् प्रत्यक्षज्ञानस्य= प्रत्यक्षप्रमायाः, करणं विद्यते,तत् प्रत्यक्षप्रमाणं भवति। तस्य अयम् अभिप्रायः। १.घ्राणम् २.जिह्वा ३.चक्षुः ४.त्वक् ५.श्रोत्रम् एतानि पञ्च, ६.मनः इति एतानि षट् ज्ञानेन्द्रियाणि। क्रमेण १.गन्धः २.रसः ३.रूपम् ४.स्पर्शः ५.शब्दः ६.सुखादिः इति एतानि ज्ञानेन्द्रियाणां विषयाः भवन्ति। इन्द्रियाणाम् अर्थानां विषयाणां च सम्बन्धेन यत् ज्ञानम् उपजायते,तत् प्रत्यक्षज्ञानं भवति ।

| इन्द्रियाणि | इन्द्रियाणाम् अर्थाः | इन्द्रियाणाम् अर्थेषु स्थिताः विषयाः(गुणाः) |
|---|---|---|
| १.घ्राणेन्द्रियम् | पृथिवी | गन्धः |
| २.रसनेन्द्रियम् | जलम् | रसः |
| ३.चक्षुरिन्द्रियम् | तेजः | रूपम् |
| ४.त्वगिन्द्रियम् | वायुः | स्पर्शः |
| ५.श्रोत्रेन्द्रियम् | आकाशम् | शब्दः |
| ६.मानसेन्द्रियम् | स्वतन्त्रद्रव्यम् | सुखादिः |

एवम् इन्द्रियाणां विषयाणां च सन्निकर्षेण प्रत्यक्षज्ञानं जायते। चक्षुरिन्द्रियम्,त्वगिन्द्रियम्,मानसेन्द्रियम् इति इमानि इन्द्रियाणि द्रव्यप्रत्यक्षम् अपि जनयन्ति।चक्षुरिन्द्रियं हि तादृशस्यैव द्रव्यस्य प्रत्यक्षं जनयति, यस्मिन् द्रव्ये रूपम्, महत्त्वम्,आलोकसंयोगश्च वर्तते। अपि च इदं चक्षुः इन्द्रियं तादृशद्रव्ये एव विद्यमानानां संख्या-परिमाण- पृथक्त्व-संयोग-विभाग-परत्व-अपरत्व-द्रवत्व-स्नेह-गुणानां,क्रियाणां च प्रत्यक्षं जनयति।

रूपाभावेन वाय्वादीनाम्,आलोकसम्बन्धाभावेन अन्धकारे विद्यमानानाम्, महत्त्वाभावेन परमाणुप्रभृतीनां च प्रत्यक्षं जनयितुं चक्षुः न प्रभवति। त्वगिन्द्रियम् अपि,रूपम् एकं वर्जयित्वा, चक्षुरिन्द्रियग्रहणयोग्यं सर्वम् अपि गृह्णाति। एवं प्रधानतया त्वगिन्द्रियं स्पर्शं, स्पर्शवद्-महत्त्वविशिष्टं द्रव्यं गृह्णाति =प्रत्यक्षविषयं करोति। एवम्, इन्द्रियेषु चक्षुरिन्द्रियं तेजस्सम्बन्धीति नेत्रोन्मीलनक्षणे एव, तत्प्रकाशः, सुदूरवर्तिनम् अपि पदार्थं प्राप्नोति। तत्प्रत्यक्षं च जनयति।

इतराणि तु इन्द्रियाणि समीपागतैः एव गन्धादिविषयैः सम्मिलन्ति। तथाहि - घ्राणं हि वायूपनीतस्य समीपागतस्य एव सुरभिभागस्य सौरभं गृह्णाति =प्रत्यक्षविषयं करोति। जिह्वाउरसनेन्द्रियं उपरि पतितस्यैव भक्ष्यादेः रसं गृह्णाति =प्रत्यक्षविषयं करोति। चर्मणा संयुक्तस्यैव च स्पर्शं त्वक् गृह्णाति = प्रत्यक्षविषयं करोति। श्रवणेन्द्रियं स्व(शब्द)स्य उत्पत्तिदेशम् आरभ्य शब्दात् शब्दः इति क्रमेण तरङ्गरूपेण उत्पद्य उत्पद्य तथा श्रवणकुहरे उत्पन्नं शब्दम् एव गृह्णाति = प्रत्यक्षविषयं करोति। मानसेन्द्रियं च आत्मनि जातं सुखादिकम् एव प्रत्यक्षविषयं करोति। एवम् इमानि इन्द्रियाणि स्वोपगतान् गृह्णन्ति। एवं यथाकथञ्चित् सन्निकृष्टान् विषयान् एव इन्द्रियाणि गृह्णन्ति, न असन्निकृष्टानि।

**७.२.२.प्रत्यक्षज्ञानस्य द्वैविध्यम्**

(मूलम्)तत् द्विविधम्; निर्निकल्पकम्, सविकल्पकञ्चेति। तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्, यत्किञ्चित् इदम् इति वस्तुमात्रावगाहि। सप्रकारकं ज्ञानं सविकल्पकम्। यथा डित्थोऽयम्, ब्राह्मणोऽयम्, श्यामोऽयम्, पाचकोऽयम् इति।

(विवरणम्) इमानि वाक्यानि प्रत्यक्षज्ञानस्य द्वैविध्यं ज्ञापयन्ति। निर्विकल्पक-सविकल्पकज्ञानयोः स्वरूपं ख्याप- यन्ति। निर्विकल्पकम् सविकल्पकम् इति प्रत्यक्षज्ञानं द्विविधम्। सर्वतः प्रथमं पदार्थदर्शने किम् इदम् ? कुत्र वर्तते ? इत्येवमादि न स्पष्टतया ज्ञायते। यत्किञ्चित् इदम् इति विशेषण-विशेष्यभावम् अनवगाहमानम्

एव प्रत्यक्षं भवति। तदिदं निर्विकल्पकं प्रत्यक्षम्।

अनन्तरंच अयं घटः। घटोऽयं भूतले वर्तते ? इत्येवं विशेषण-विशेष्यभावम्अवगाहमानं ज्ञानं जायते। तथा विशेषण-विशेष्यसम्बन्धागाहिज्ञानम् एव सविकल्पकम्। यथा अयं डित्थः,डित्थनामवान् इति,अयं ब्राह्मणः, ब्राह्मणत्वजातिमान् इति, अयं श्यामः, श्यामरूपवान् इति,अयं पाचकः, पाकक्रियावान् इति च ज्ञानं क्रमेण संज्ञा- जाति-गुण-क्रिया-विशिष्टं प्रत्यक्षं सविकल्पकं भवति। अत्र च डित्थत्वादयः प्रकारतया,तद्विशिष्टाश्च विशेष्यतया प्रत्यक्षविषयाः भवन्ति।

**स्वावलोकनप्रश्नाः**

१) संज्ञा- जाति-गुण-क्रिया-विशिष्टं प्रत्यक्षं सविकल्पकं भवति वा निर्विकल्पकं भवति वा ?

२) विशेषण-विशेष्यभावम् अनवगाहमानं ज्ञानं किं भवति ?

३) विशेषण-विशेष्यभावम् अवगाहमानं ज्ञानं किं भवति ?

### ७.२.३. इन्द्रियार्थसन्निकर्षः-निर्वचनम्

आत्मा मनसा संयुज्यते। मनः इन्द्रियेण। इन्द्रियम् अर्थेन। ततः प्रत्यक्षम् इति प्रत्यक्षप्रक्रियाविधानम्। सर्वेषां ज्ञानानां केन्द्रस्थानम् आत्मा।चतुर्भिः अपि प्रमाणैः, आत्मनि एव हि ज्ञानं जायते। सर्वप्रथमम् आत्मा मनसा संयुज्यते। तादृशं मनः तत्तत् इन्द्रियेण , तादृशं च इन्द्रियं स्व स्व अर्थेन, यदि संयुज्यते, Switch नोदनेन एद्बथ्ड इव ,तत्क्षणम् आत्मनि ज्ञानप्रकाशः भवति। तस्मिन् क्रमे यत्र क्वचिदपि यः कश्चन अपि अवरोधः भवेत्, Switch देशम् आरभ्य एद्बथ्ड गोलपर्यन्तं विद्युत्-तन्त्र्यादौ संश्लेषविच्छेदे तत्प्रकाशः इव, आत्मनि ज्ञानप्रकाशः अपि न सम्भवत्येव। तदा हि कश्चित् पश्यन् अपि न पश्यति। शृण्वन्न् अपि न शृणोति। न तस्य प्रत्यक्षं भवति इति भावः। अस्मिन् क्रमे इन्द्रियाणाम् अर्थेन सह यः सम्बन्धः विद्यते सः एव इन्द्रियार्थसन्निकर्षः इति उच्यते।

आत्मा मनः इन्द्रियम् अर्थः

विषयः(गुणः)

१.आत्मा > मनः > घ्राणेन्द्रियम् > पृथिवी(पृथिव्याः उत्पन्नम् पुष्पादिकम्)>गन्धः

२.आत्मा > मनः > रसनेन्द्रियम् > पृथिवी(पृथिव्याः उत्पन्नम् फलादिकम्)> रसः

३.आत्मा > मनः > चक्षुरिन्द्रियम् > पृथिवी(तत्र उत्पन्नानि वर्णात्मकानि वस्तूनि)>रूपम्
४.आत्मा > मनः > त्वगिन्द्रियम् > पृथिवी (तत्र शीतोष्णानि वस्तूनि)> स्पर्शः
५.आत्मा > मनः > श्रवणेन्द्रियम् > आकाशम् > शब्दः
इति इदं बाह्यं प्रत्यक्षम्।
६.आत्मा > मनः > बुद्धिसुखादि > बुद्धिसुखादिप्रत्यक्षम् >अहं जानामि, अहं सुखी इत्यादिप्रत्यक्षं मानसम् आन्तरं प्रत्यक्षम्। मनः हि स्वतन्त्रं द्रव्यम् इन्द्रियं च। तत् इतरेन्द्रियैः सहयोगेन बाह्यप्रत्यक्षम्, स्वतन्त्ररूपेण च मानसप्रत्यक्षं जनयति।

**स्वावलोकनप्रश्नाः**

१) इन्द्रिय-अर्थसन्निकर्षः कः ?

२) 'इन्द्रियाणि कति ? तानि च कानि ?

### ७.२.४. इन्द्रियार्थसन्निकर्षः - षड्विधः।

(मूलम्)प्रत्यक्षहेतुः इन्द्रियार्थसन्निकर्षः षड्विधः। संयोगः, संयुक्तसमवा, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषण-विशेष्यभावश्च इति।
(विवरणम् ) इमानि च वाक्यानि इन्द्रियार्थसन्निकर्षस्य षाड्विध्यं निरूपयन्ति। इन्द्रियैः अर्थस्य (वस्तुनः) वा विषयस्य वा प्रत्यक्षम् इत्युक्ते, न केवलं भौतिकतया वस्तुनः एव प्रत्यक्षम्, अपि तु ततः अपि अधिकतया वस्तु-गतरूपस्य,तद्रूपगतजातेश्चापि प्रत्यक्षम् इत्यर्थः।स्थूलदृशाम्,नाम विश्लेषणं (Ana-lyze) कर्तुम् असमर्थानाम्, वस्तुना सहैव वस्तुनः रूपस्य, वस्तुरूपगतजातेश्च प्रत्यक्षं जायते इव अवभासते। परं सूक्ष्मदृशां तु न तथा। विश्लेषणं (Analyze) कर्तुम् ये समर्थाः,ते सूक्ष्मदृशः शास्त्रीयपद्धत्या वस्तुनः,वस्तुगतरूपस्य ,वस्तुरूपगत-जातेश्च प्रत्यक्षतां शास्त्ररीत्या साधयन्ति। इन्द्रियैः वस्तुनः प्रत्यक्षे कश्चन सम्बन्धः भवति। वस्तुनः रूपस्य प्रत्यक्षे अपरः सम्बन्धः। रूपगतजातेः, नाम रूपत्वस्य, प्रत्यक्षे अपरः सम्बन्धः। एवम् एव इन्द्रियैः विषयस्य प्रत्यक्षे अन्यः सम्बन्धः भवति। विषयगतजातेः प्रत्यक्षे अन्यः कश्चन सम्बन्धः। वस्तुनः अभावस्य प्रत्यक्षे एतैः भिन्नः अपरः नूतनः कश्चन सम्बन्धः। एवं वस्तुनः प्रत्यक्षम् इत्युक्ते

वस्तुनः, वस्तुगतरूपस्य वस्तुरूपगतजातेः, वस्तुनः अभावस्य च प्रत्यक्षम् इति अर्थः। तादृशः सम्बन्धः किं संयोगः अथवा समवायः, अथवा एताभ्यां भिन्नः अन्यः कोऽपि सम्बन्धः ? कुत्र समवायः ? कुत्र संयोगः ? एताभ्यां भिन्नः कुत्र ? इति च एते प्रश्नाः समुद्भवन्ति। एतादृशानां प्रश्नानां समाधानम् अत्र उपलभ्यते। एवम् इन्द्रियाणाम् अर्थेन सह यः सम्बन्धः विद्यते सः एव इन्द्रियार्थसन्निकर्षः इति उच्यते सः च इन्द्रिय-अर्थसन्निकर्षः षड् विधः–१).संयोगः २).संयुक्त- समवायः ३).संयुक्त समवेतसमवायः ४).समवायः ५).समवेतसमवायः६).विशेषण-विशेष्यभावश्च इति षड्विधः।

७.२.४.१.इन्द्रियार्थसन्निकर्षः -संयोगः

(मूलम्) चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः।

(विवरणम्) इदं वाक्यं द्रव्यप्रत्यक्षे इन्द्रियार्थसन्निकर्षं संयोगं सोदाहरणं निरूपयति। द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्षः। सर्वाणि इन्द्रियाणि पृथिव्यादिद्रव्यरूपाण्येव भवन्ति। यदि इन्द्रियैः प्रत्यक्षीकरणीयाण्यपि द्रव्यरूपाणि एव भवन्ति तर्हि तयोः इन्द्रिय-अर्थयोः (नाम द्वयोः द्रव्ययोः) सन्निकर्षः संयोगः भवति। उदाहरणम्; चक्षुषा घटस्य प्रत्यक्षम्। चक्षुषा हि, घटः, तत्र विद्यमानं रूपम्, रूपे विद्यमानं रूपत्वं च प्रत्यक्षाणि भवन्ति। तत्र चक्षुरिन्द्रियेण घटप्रत्यक्षे जननीये इन्द्रिय-अर्थसन्निकर्षः संयोगः भवति। चक्षुरिन्द्रियं हि तेजोद्रव्यम्, घटश्च पार्थिवम्। द्रव्ययोश्च तयोः संयोगः सम्बन्धः। तथा च चक्षुरिन्द्रियं (तेजोद्रव्यम्) संयोगसम्बन्धेन घटं (पार्थिवद्रव्यम्) प्रत्यक्षं करोति इति भावः।

**स्वावलोकनप्रश्नाः**

१) इन्द्रिय-अर्थसन्निकर्षः कतिविधः ?

२) 'द्रव्यप्रत्यक्षे सन्निकर्षः कः ?

**७.२.४.२.इन्द्रियार्थसन्निकर्षः -संयुक्तसमवायः**

(मूलम्) (चक्षुषा) घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः।

(विवरणम्)इदं वाक्यं संयुक्तसमवायम् इन्द्रियार्थसन्निकर्षं सोदाहरणं निरूपयति।द्रव्यगतरूपस्य प्रत्यक्षे सर्वत्र संसुक्तसमवायः सन्निकर्षः। संयोगम् आप्तः संयुक्तः, इन्द्रियेण संयोगम् आप्तं द्रव्यम् अत्र संयुक्तपदेन बोध्यते। समवायसम्बन्धेन विद्यमानः (गुणः-क्रिया वा) समवायपदस्य अर्थः। इन्द्रियैः अर्थस्य प्रत्यक्षे

संयोगः सन्निकर्षः। इन्द्रियेण संयोगम् आप्ते अर्थे उद्रव्ये उवस्तुनि समवायसम्बन्धेन विद्यमानानां गुणानां क्रियाणां च इन्द्रियैः प्रत्७े जननीये, सन्निकर्षः, संयुक्तसमवायः। गुणाः, क्रियाश्च द्रव्ये समवायेन विद्यन्ते। गुण-गुणिनोः, क्रिया-क्रियावतोश्च समवायात्। उदाहरणम्;चक्षुषा घटरूपस्य प्रत्यक्षम्। इन्द्रिय-अर्थयोः चक्षुष्-घटयोः संयोगः सन्निकर्षः। चक्षुषा घटगतायाः नीलिमायाः प्रत्यक्षे संयुक्तसमवायः सन्निकर्षः। चक्षुषा (इन्द्रियेण), संयुक्ते घटे समवेतस्य उसमवाय- सम्बन्धेन विद्यमानस्य नीलरूपस्य,(द्रव्यगतगुणस्य) प्रत्यक्षे जननीये इन्द्रिय-अर्थसन्निकर्षः संयुक्तसमवायः भवति। तत्र चक्षुषा संयोगम् आप्तः घटः,घटे च रूपं गुणः समवायेन वर्तते। तथा च चक्षुषः घटरूपस्य च सम्बन्धः संयुक्तसमवायः भवति।

**स्वावलोकनप्रश्नाः**

१)द्रव्यगतगुणस्य प्रत्यक्षजनने इन्द्रिय-अर्थसन्निकर्षः कः ?

२) घटस्य नीलिमायाः प्रत्यक्षे सन्निकर्षः कः ?

**७.२.४.३.इन्द्रियार्थसन्निकर्षः -संयुक्तसमवेतसमवायः**

(मूलम्) रूपत्वसामान्यप्रत्यक्षे संयुक्त-समवेत-समवायः सन्निकर्षः। चक्षुस्संयुक्ते घटे रूपं समवेतम्। तत्र रूपत्वस्य समवायात्।

(विवरणम्)इदं वाक्यं संयुक्तसमवेतसमवायम् इन्द्रियार्थसन्निकर्षं सोदाहरणं निरूपयति। संयुक्ते यः समवेतः,तत्र समवायः । संयुक्ते (उसंयोगम् आप्ते द्रव्ये) समवेतः (यःउगुणः/या क्रिया वा समवायसम्बन्धेन विद्यते) तत्र (तस्मिन् गुणे, तस्यां क्रियायां वा) समवायः (समवायसम्बन्धेन विद्यमानः जात्यादिः संयुक्त-समवेत-समवायपदस्य अर्थः)। इन्द्रियेण द्रव्यं संयोगम् आप्नोति। इन्द्रियेण संयोगम् आप्तं द्रव्यं अत्र संयुक्तपदेन बोध्यते। तत्र द्रव्ये समवायसम्बन्धेन विद्यमानः गुणः रूपादिः भवति अथवा क्रिया वा भवति। तस्मिन् गुणे समवायसम्बन्धेन विद्यमानः रूपत्वादिः वा अथवा तस्यां क्रियायां समवायसम्बन्धेन विद्यमानः क्रियात्वादिः वा संयुक्तसमवेतसमवायः भवति।गुणाः, क्रियाश्च द्रव्ये समवायसम्बन्धेन विद्यन्ते। गुण-गुणिनोः, क्रिया-क्रियावतोश्च समवायात्।गुणेषु गुणत्वं ,कर्मसु कर्मत्वं च समवायसम्बन्धेन विद्यते। जाति-जातिमतोः समवायात्। एवं द्रव्ये समवेतः गुणः वा, कर्म वा ,भवति।तस्मिन् गुणे कर्मणि वा समवायेन विद्यमानः गुणत्वादिजातिः

वा कर्मत्वादिजातिः वा भवति। तेषां गुणत्व-कर्मत्वादीनां जातीनां ग्रहणंउप्रत्यक्षं तु संयुक्त-समवेत-समवायसम्बन्धेन भवति। उदाहरणम्; चक्षुषा घटनीलत्वस्य प्रत्यक्षे संयुक्तसमनेतसमवायः सन्निकर्षः। तथा हि- चक्षुषा (इन्द्रियेण) घटः संयुक्तः। तत्र घटे नीलगुणः समवायसम्बन्धेन अस्ति, गुण-गुणिनोः, समवायात्। तत्र समवायसम्बन्धेन विद्यमानस्य (द्रव्यगुणगत- जातेः) नीलत्वस्य प्रत्यक्षे जननीये इन्द्रिय-अर्थसन्निकर्षः संयुक्तसमवेतसमवायः भवति।

**७.२.४.४.इन्द्रियार्थसन्निकर्षः -समवायः**

(मूलम्) श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः। कर्णविवरवृत्ति-आकाशस्य श्रोत्रत्वात्, शब्दस्य आकाशगुणत्वात्।

(विवरणम्)इदं वाक्यं समवायम् इन्द्रियार्थसन्निकर्षं सोदाहरणं निरूपयति।इन्द्रियेण गुणस्य प्रत्यक्षजनने इन्द्रिय-अर्थसन्निकर्षः तु समवायः। श्रवणम् इन्द्रियम्। शब्दः गुणः । श्रोत्रेण (इन्द्रियेण) शब्दस्य (गुणस्य) प्रत्यक्ष- जनने समवायः सन्निकर्षः। गुण-गुणिनोः समवायात्। अत्र शब्दः गुणः, श्रोत्रकुहरम् आकाशम् गुणी(द्रव्यम्)। शब्दगुणकम् आकाशं खलु।

**७.२.४.५.इन्द्रियार्थसन्निकर्षः -समवेतसमवायः**

(मूलम्) शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः। श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्।

(विवरणम्) इदं वाक्यं समवेतसमवायम् इन्द्रियार्थसन्निकर्षं सोदाहरणं निरूपयति। इन्द्रियेण गुणगतजात्यादीनां प्रत्यक्षजनने इन्द्रिय-अर्थसन्निकर्षः तु समवेतसमवायः।जाति-जातिमतोः समवायात्। उदाहरणम्; श्रोत्रेण शब्दत्वस्य प्रत्यक्षजनने समवेतसमवायः। श्रोत्रेण (इन्द्रियेण) शब्दत्वस्य (शब्दगुणगतजात्यादेः) प्रत्यक्षजनने समवेतसमवायः सन्निकर्षः। जाति-जातिमतोः समवायात्। अत्र शब्दत्वं जातिः। शब्दः जातिमत्। एवं शब्दे समवेतायाः शब्दत्वजातेः श्रोत्रेण सह, समवेतसमवायः सन्निकर्षः इति ज्ञेयम्।

**स्वावलोकनप्रश्नाः**

१).शब्दस्य प्रत्यक्षजनने इन्द्रिय-अर्थसन्निकर्षः कः ?

२).समवेतसमवायः कस्य प्रत्यक्षे सन्निकर्षः कः ?

**७.२.४.६.इन्द्रियार्थसन्निकर्षः -विशेषण-विशेष्यभावः**

(मूलम्) अभावप्रत्यक्षजनने विशेषणविशेष्यभावः सन्निकर्षः। 'भूतलं घटाभाववत्' इत्यत्र चक्षुस्संयक्ते भूतले घटा- भावस्य विशेषणत्वात्।

(विवरणम्)इदं वाक्यं विशेषण-विशेष्यभावम् इन्द्रियार्थसन्निकर्षं सोदाहरणं निरूपयति। अभावप्रत्यक्षे विशेषण- विशेष्यभावः सन्निकर्षः। घटाभाववत् भूतलम् इति उदाहरणम्। अत्र भूतलं विशेष्यम्। घटाभावः विशेषणम्। अत्र चक्षुस्संयुक्ते भूतले घटाभावस्य विशेषणत्वात्। घटाद्यभावानां चक्षुषा 'घटाभाववत् भूतलम्' इत्येवं प्रत्यक्षं भवति। तत्र चक्षुः हि भूतलेन संयुक्तम्, तत्र च घटाभावः विशेषणम् इति संयुक्तविशेषणता, चक्षुरिन्द्रिय-अभावयोः

सन्निकर्षः। विशेषण-विशेष्यभावः नाम विशेषणभावःउविशेषणता, विशेष्यभावःउविशेष्यता च। क्वचित् अभावः ,भूतले घटाभावः,इत्यादौ विशेष्यम् अपि भवतीति तत्र विशेषण-विशेष्यभावः सन्निकर्षः।

**७.३. उपसंहारः**

एवं सन्निकर्षजन्यं ज्ञानं प्रत्यक्षम्, तत्करणम् इन्द्रियम्। इन्द्रियं प्रत्यक्षप्रमाणम् इति सिद्धम्। एवं प्रकारेण षड्विधः लौकिकः इन्द्रिय-अर्थसन्निकर्षः निरूपितः।

**७.४. अभ्यासः**

अ).इन्द्रियार्थसन्निकर्षशब्दस्य अर्थः कः ?

इ).इन्द्रियार्थसन्निकर्षान् निरूपयत ?

* * *

# UNIT-VIII
# अनुमानप्रमाणम्

## संरचना

८.०. परिचयः

८.१. लक्ष्याणि

८.२.अनुमानप्रमाणम् > अनुमितिज्ञानम् > निर्वचनम्

  ८.२.१.अनुमितिसामग्री > अनुमितिज्ञानम् > परामर्शज्ञानम् > निर्वचनम्

  ८.२.२.अनुमितिसामग्री > व्याप्तिज्ञानम् > पक्षधर्मताज्ञानम् > निर्वचनम्

८.३..अनुमानस्य द्वैविध्यम्

  ८.३.१.अनुमानस्य द्वैविध्यम् > स्वार्थानुमानम्

  ८.३.२.अनुमानस्य द्वैविध्यम् > परार्थानुमानम् > पञ्चावयववाक्यम्

  ८.३.३.अनुमास्य द्वैविध्यम् > परार्थानुमानम् > पञ्च अवयवाः

८.४.अनुमानम् > लिङ्गपरामर्शः

  ८.४.१.लिङ्गस्य (हेतोः) त्रैविध्यम्

    ८.४.१.१.लिङ्गस्य त्रैविध्यम् > अन्वयव्यतिरेकि लिङ्गम्

    ८.४.१.२.लिङ्गस्य त्रैविध्यम् > केवलान्वयि लिङ्गम्

    ८.४.१.३.लिङ्गस्य त्रैविध्यम् > केवलव्यतिरेकि लिङ्गम्

८.५.पक्ष-सपक्ष-विपक्षाणां निरूपणम्

  ८.५.१.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > पक्षः

  ८.५.२.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > सपक्षः

  ८.५.३.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > विपक्षः

८.६. उपसंहारः

८.७. अभ्यासः

## ८.०. परिचयः

घ्राणेन गन्धम् आघ्राय,जिह्वया रसम् आस्वाद्य, चक्षुषा रूपं, रूपाश्रयं च द्रव्यं दृष्ट्वा, त्वचा स्पर्शं तदाश्रयं च द्रव्यं
संस्पृश्य, श्रवणेन शब्दं श्रुत्वा, मनसा सुखादिकं तदाश्रयम् आत्मानं च अधिकृत्य

यत् सम्पाद्यते ज्ञानं, तत् एतत् सर्वमपि प्रत्यक्षरूपं, विज्ञेयस्य जिज्ञासितस्य च प्रपञ्चस्य ज्ञानराशौ पादभागमात्रम् एव। तथा अनुभूतैः गन्ध- रस-रूप-स्पर्श-शब्दैः सुखादिभिश्च तत्सम्बन्धानाम् अन्येषां बहूनां विनिश्चयः अनुभवसिद्धः। शकटादि-ध्वनिं, वाचो वा समुपश्रुत्य द्वारदेशम् अनुप्राप्तानां शकटादीनाम्; बैसिकिल्, स्कूटर्, कार् प्रभृतीनाम्, बन्धुजनानां च विनिश्चयः भवति। विलक्षणैः कूजितादिभिः शब्दैः, वासनादिभिश्च दूरस्थानामपि पशु-पक्षि-मृगादीनां फल- पुष्पादीनां च विनिर्णयः अनुभवसिद्धः। एवं प्रत्यक्षैः रूपादिभिः अप्रत्यक्षाणां देशान्तर-कालान्तरविषयाणां सुबहूनां विज्ञानम् इदं ज्ञानराशौ प्रभूतं प्रचुरञ्च वर्तते।तादृशस्य महत्त्वपूर्णस्य विनिश्चयस्य साधनम् एव अनुमान- प्रमाणम्। प्रमाणेषु च इदं द्वितीयम्। प्रत्यक्षयोग्यानां वह्निप्रभृतीनाम् इव,प्रत्यक्षायोग्यानामपि परमात्मादीनां विनिश्चयः (=अनुमानम्) आवश्यकः अस्ति। तदेतत्-आवश्यकतापूर्त्यै न्यायशास्त्रम्, द्वितीयस्य अस्य अनुमान-प्रमाणस्य साङ्गोपाङ्गतया निरूपणाय प्रवृत्तम्। अनुमितिः,तत्सामग्री, व्याप्तिः,पक्षधर्मता, परामर्शः, पक्ष-सपक्ष- विपक्षाः, एवम् अनुमिति प्रतिबन्धकाः हेत्वाभासाश्च अस्मिन् पाठ्यांशे प्रतिपाद्यन्ते। एवम् अनुमानप्रमाणस्य परिचयः अत्र लभ्यते।

## ८.१. लक्ष्याणि

मानवः बुद्धिजीवः। सर्वदा सर्वत्र इन्द्रियप्रत्यक्षस्यैव एकस्य विषयस्य स्वीकरणं न पर्याप्तं भवति। बुद्ध्या पर्यालोच्य निश्चितस्य अपि विषयस्य ,स्वीकरणीयता समापतति। तस्मिन् सन्दर्भे बुद्ध्या पर्यालोचनं कथं कार्यम् ? कथं निश्चयः कार्यः ? निश्चयावगमनाय अनुसृता पर्यालोचना रीतिः कीदृशी ? तस्य च सामग्री का ? इत्येवमंशाः ज्ञातव्याः भवन्ति। तदर्थम् उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन—

- अनुमानप्रमाणस्य स्वरूपम् पठितुं समर्थः भवति।
- पक्षधर्मता-व्याप्ति-परामर्श-अनुमिति-इत्यादिअनुमानसामग्रीं लिखितुं समर्थः भवति।
- अनुमानस्य द्वैविध्यम् अवगन्तुं समर्थः भवति।
- अनुमान स्वभावावगमनाय आवश्यकं पञ्चावयववाक्यं ज्ञातुं प्रभवति।
- त्रिविधं लिङ्गम् अवगच्छति।
- हेत्वाभासानां स्वरूपं स्वभावं च जानाति।

### ८.२.अनुमानप्रमाणम् > अनुमितिज्ञानम् > निर्वचनम्

(मूलम्) अनुमितिकरणम् अनुमानम् । परामर्शजन्यं ज्ञानम् अनुमितिः ।

(विवरणम्) इमानि वाक्यानि अनुमितिज्ञानस्य, अनुमानप्रमाणस्य च स्वरूपं स्वभावं च निरूपयन्ति। अनुमितिः इतियथार्थानुभवप्रभेदः यः दर्शितः,तस्य करणम् अनुमानप्रमाणं भवति। परामर्शेन यत् ज्ञानं जायते, तदेव अनुमिति ज्ञानं भवति।

८.२.१.अनुमितिसामग्री > परामर्शः > निर्वचनम्

(मूलम्)व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः,यथा-वह्निव्याप्यधूमवान् अयं पर्वतः इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानम् अनुमितिः ।

(विवरणम्) इमानि वाक्यानि परामर्शज्ञानस्य स्वरूपं स्वभावं च निरूपयन्ति। प्रत्यक्षादिना विज्ञातेन , तत् सम्बद्धस्य अन्यस्य अविज्ञातस्य निर्णयः एव अनुमितिः। यस्य निश्चयः भवति, सः साध्यम्। येन निश्चयः भवति, सः हेतुः। यत्र च तादृशः निश्चयः भवति, सः पक्षः इति शास्त्रसङ्केतः अस्ति। तत्र च हेतोः साध्येन सह अविनाभावसम्बन्धं विना तादृशनिश्चयः नोपपद्यते।

हेतोः साध्येन सह अविनाभावसम्बन्धः एव व्याप्तिः। व्याप्तिविशिष्टः हेतुः व्याप्यः। व्याप्यश्च तादृशः हेतुः पक्षे वर्तते इति ज्ञानं परामर्शः इति कथ्यते। अनेन च 'साध्य-अविनाभूतः हेतुः पक्षे वर्तते ' इति ज्ञानेन ,पक्षे साध्यमपि अवश्यं वर्तते इति ज्ञानम् उत्पद्यते। तदिदं ज्ञानम् एव अनुमितिः इति कथ्यते। उदाहरणम्; वह्निना अविनाभूतः धूमः पर्वते वर्तते इति ज्ञानं परामर्शः। तेन च पर्वतो वह्निमान् इति यत् ज्ञानं जायते तदेव अनुमितिः।

### ८.२.२.अनुमितिसामग्री > व्याप्तिः > पक्षधर्मता > निर्वचनम्

(मूलम्)यत्र यत्र धूमः तत्र अग्निः इति साहचर्यनियमः व्याप्तिः। व्याप्तस्य पर्वतादिवृत्तित्वं पक्षधर्मता।

(विवरणम्)इमानि वाक्यानि व्याप्तिज्ञानस्य,पक्षधर्मताज्ञानस्य च स्वरूपं स्वभावं सोदाहरणं निरूपयन्ति।'येषु प्रदेशेषु धूमः वर्तते तेषु सर्वेषु एव वह्निः अवश्यं वर्तते 'इत्येवंरीत्या हेतोः धूमादेः,साध्येन वह्न्यादिना सह विद्यमानः यः साहचर्यनियमः=अविनाभावसम्बन्धः,सः एव व्याप्तिपदार्थः। पक्षधर्मता नाम हेतोः पक्षवृत्तित्वम्।

अत्र इदम् अवधरन्तु; साध्येन सह व्याप्तिविशिष्टः हेतुः साध्यव्याप्यः भवति। साध्यं च तस्य व्यापकं भवति। तयोश्च हेतु-साध्ययोः व्याप्य-व्यापकभावः सम्बन्धः।

१).व्याप्यं नाम व्यापकं यत्र न वर्तते, तत्र अविद्यमानम्, व्यापकं यत्र वर्तते तत्रैव विद्यमानम् तदवि- नाभूतम्। व्यापकं नाम व्याप्यं यत्र वर्तते तत्र अवश्यं विद्यमानम्। व्याप्याभाववति देशेव्यापकस्य विद्यमानत्वे अपि, व्याप्यवति देशे अवश्यं व्यापकेन भाव्यम् इति नियमः। यत् व्यापकस्थले एव वर्तते,नान्यत्र, तत् व्याप्यम्। यत् व्याप्यस्थले अवश्यं वर्तते, तत् व्यापकम्।

२).व्याप्यं  व्यापकापेक्षया अल्पदेशवृत्ति भवति। व्यापकं व्याप्यापेक्षया अधिकदेशवृत्त्यपि भवति।

३).एवं'यत्र यत्र'इति रीत्या व्याप्तिप्रदर्शनेप्रथमं व्याप्यस्य वचनम्,ततः परं व्यापकस्य वचनम् इति नियमः।

एवञ्च-

१).साध्येन सह हेतोः अविनाभावसम्बन्धः व्याप्तिः। तथा तयोः सम्बन्धः वर्तते इति ज्ञानम् = 'वह्निव्याप्यः धूमः ' इत्यादिकं व्याप्तिज्ञानम्।

२).हेतोः पक्षे विद्यमानत्वं पक्षधर्मता। तथा हेतुः पक्षे वर्तते इति ज्ञानम्= 'धूमवान् पर्वतः' इत्यादिकं  पक्षधर्मताज्ञानम्।

३).व्याप्ति-पक्षधर्मतयोः विशिष्टज्ञानम् = ' साध्येन अविनाभूतः हेतुः पक्षे वर्तते- वह्निना सहैव विद्यमानः   धूमः पर्वते वर्तते' इत्याकारकं ज्ञानं परामर्शः।

४.).तथा सति पक्षे साध्यम् अपि वर्तते इति यत् ज्ञानं जायते,  'पर्वतो वह्निमान्' इत्यादि, तदेव  अनुमितिः। साध्येन अविनाभूतः हेतुः पक्षे वर्तते इति ज्ञानेन,पक्षे साध्यमपि अवश्यं वर्तते इति निश्चयः  जायते। एतस्याः अनुमितेः करणम् एव अनुमानप्रमाणम् इति एतत् प्रघट्टकार्थः।

### ८.३..अनुमानस्य  द्वैविध्यम्

(मूलम्)अनुमानं द्विविधम्, स्वार्थं परार्थञ्चेति।

(विवरणम्)स्वार्थानुमानम् इति, परार्थानुमानम् इति च, अनुमानं द्विविधं वर्तते।

८.३.१.अनुमानस्य द्वैविध्यम् > स्वार्थानुमानम्

(मूलम्)स्वार्थं स्वानुमितिहेतुः। तथा हि -स्वयमेव भूयो भूयो दर्शनेन यत्र धूमः तत्र अग्निः इति महानसादौ धूमे वह्निव्याप्तिं गृहीत्वा,पर्वतसमीपं गत्वा,तद्गते च अग्नौ सन्दिहानः पर्वते धूमं पश्यन्, व्याप्तिं स्मरति - 'यत्र धूमः तत्र अग्निः' इति। तदनन्तरं 'वह्निव्याप्य धूमवान् अयं पर्वतः 'इति ज्ञानम् उत्पद्यते। अयम् एव 'लिङ्गपरामर्शः' इति उच्यते।तस्मात् 'पर्वतो वह्निमान्'इति अनुमितिः उत्पद्यते। तत् एतत् स्वार्थानुमानम्।

(विवरणम्)इमानि उपरि वाक्यनि स्वार्थानुमानस्य स्वरूपं बोधयन्ति।स्वार्थानुमानम् इति, परार्थानुमानम् इति च, अनुमानं द्विविधं वर्तते।स्वस्य या अनुमितिः स्वव्याप्त्यादिज्ञानसहायेन जायते, तस्याः करणीभूतम् अनुमानं स्वार्थानुमानम्।

तत् कथम् इति चेत् उच्यते। कश्चन पुरुषः,यत्र च वह्निसहायेन कर्म प्रचलति- होमशाला- पाकशाला-स्नानशाला,इत्येवमादिषु बहुषु स्थानेषु -वारं वारं धूमस्य वह्निना साहचर्यं दृष्ट्वा,व्याप्तिं निश्चिनोति। सः कदाचित् पर्वतसमीपात् गच्छन्,तत्र वह्निः अस्ति वा न वा इति सन्देहेन पर्वताग्रे दृष्टिं सारयति। तत्र च अविच्छन्नमूलां धूमरेखां पश्यति। तस्मिंश्च धूमे, पूर्वं महानसादौ ज्ञातां वह्निव्याप्तिं स्मरति। तदा तस्य वह्निना व्याप्यः- अविनाभूतः - धूमः अत्र वर्तते इति विशिष्टज्ञानं जायते। तदेव विशिष्टज्ञानं परामर्शः। तेन च परामर्शेन
'पर्वतो वह्निमान्' इति अनुमितिः तस्य जायते। तदिदम् अनुमानं स्वार्थानुमानम्।

**८.३.२.अनुमानस्य द्वैविध्यम् > परार्थानुमानम् > पञ्चावयववाक्यम्**

(मूलम्) यः तु स्वयम् एव धूमात् अग्निम् अनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुङ्क्ते तत् परार्थानुमानम्। यथा–पर्वतो वह्निमान्, धूमवत्वात्, यः यः धूमवान् सः सः अग्निमान्, यथा महानसः, तथाचायम्, तस्मात् तथा इति । अनेन वाक्येन प्रतिपादितात् लिङ्गात् परः अपि अग्निं प्रतिपद्यते।

(विवरणम्)इमानि उपरि वाक्यनि परार्थानुमानस्य स्वरूपं बोधयन्ति।स्वार्थानुमानप्रक्रियायाम् उक्तरीत्या सः स्वस्य अनुभवसिद्धां व्याप्तिं स्मृत्वा परामर्शद्वारा पर्वते अग्निम् निश्चित्य, पर्वते धूमं वा, तत्र च वह्निसाहचर्यादिकं वा स्वयम् अजानतः स्वानुचरस्यापि , तादृशं निश्चयं जनयितुं पञ्चावयवसमुदायरूपं महावाक्यं प्रयुङ्कते। सः लघूनि इमानि पञ्च वाक्यानि श्रोतुःउपरस्य,सम्भाविताम् आशङ्कां निराचिकीर्षुः क्रमशः प्रयुङ्क्ते। तस्य च इमानि पञ्च लघुवाक्यानि अवयवाः इति उच्यन्ते। यथा-

१).पर्वतः अयम् वह्निमान् (अत्र कुतः इति श्रोतुः आशङ्कां सम्भाव्य तद्वारणाय हेतुवचनम्)।

२).धूमवत्वात्उयतः अत्र धूमः वर्तते इति अर्थः(अत्र धूमस्य वह्नेश्च कः सम्बन्धः इति शङ्कावारणाय उदाहरणम्)।

३).यः यः धूमवान्,सः सः वह्निमान्, यथा महानसम्; यत्र धूमः वर्तते तत्र सर्वत्रापि, महानसादौ इव वह्निरपि वर्तते।(अत्र महानसेन पर्वतस्य किं साम्यम् इति शङ्कावारणाय उपनयः)।

४).तथा चायम्;महानसम् इव पर्वतः अपि वह्निव्याप्यधूमवान्-इति (अत्र ततः किम् इति शङ्कावारणाय निगमनवाक्यम्)।

५).तस्मात् तथा;वह्निव्याप्यधूमवत्वात् पर्वतः अपि अवश्यम् अबाधित-असत्प्रतिपक्षितवह्निमान् इति।

अस्माच्च वाक्यपञ्चकसमुदायरूपात् महावाक्यात् पार्श्वस्थः अपि परामर्शद्वारा पर्वते वह्निं निश्चिनोति।

### ८.३.३.अनुमानस्य द्वैविध्यम् > परार्थानुमानम् > पञ्च अवयवाः

(मूलम्) प्रतिज्ञा-हेतु-उदाहरण-उपनय-निगमनानि पञ्चावयवाः। पर्वतो वह्निमान् इति प्रतिज्ञा,धूमवत्वात् इति हेतुः। यो यो वह्निमान् स सोग्निमान्,यथा महानसः इत्युदाहरणम्। तथा च अयं इत्युपनयः। तस्मात्तथा इति निगमनम् ।

(विवरणम्) इमानि वाक्यानि परस्य अनुमानजनने उपकारकान् पञ्च अवयवान् निरूपयन्ति।

१).प्रतिज्ञा २).हेतुः ३).उदाहरणम् ४).उपनयः ५).निगमनम् , इति पञ्चावयवानां क्रमेण सञ्ज्ञाः।

१.प्रतिज्ञा ; साध्यवत्तया पक्षवचनं प्रतिज्ञा। पर्वतो वह्निमान् इति प्रतिज्ञावाक्यम्।

२.हेतुः; पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः। धूमवत्वात् इति हेतुवाक्यम्।

३.उदाहरणम्;व्याप्तिप्रतिपादकं वचनम् उदाहरणम्।यो यो वह्निमान् स सोग्निमान् यथा महानसः इत्युदाहरणम्।

४.उपनयम्;व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनम् उपनयः। तथा(वह्निव्याप्य धूमवान्)च अयं (पर्वतः)इत्युपनयः।

५.निगमनम्;हेतु-साध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम्। तस्मात्तथा (वह्निव्यप्यधूमवत्वात् पर्वतः अपि वह्निमान् इति निगमनवाक्यम् )।

### ८.४.अनुमानम् > लिङ्गपरामर्शः

(मूलम्) स्वार्थानुमिति-परार्थानुमित्योः लिङ्गपरामर्शः एव करणम्, तस्मात् लिङ्गपरामर्शः अनुमानम्।

(विवरणम्)इदं वाक्यं अनुमानस्य लिङ्गपरामर्शस्य च अभेदं वर्णयति। स्वार्थानुमितिं प्रति वा,परार्थानुमितिं प्रति वा परामर्शः एव करणम्।एवञ्च अनुमितिं प्रति असाधारणकारणेषु,व्याप्तिज्ञान-पक्षधर्मताज्ञान-परामर्शेषु परामर्शः एव अनुमानप्रमाणं भवति। परामर्शरूपव्यापारद्वारा व्याप्तिज्ञानम् एव -स्मरणात्मकम्-अनुमितिकरणं

भवतीति,तदेव अनुमानप्रमाणम् इति प्राचीनसम्प्रदायः।

**८.४.१.लिङ्गस्य (हेतोः) त्रैविध्यम्**

(मूलम्)लिङ्गं त्रिविधम्,अन्वयव्यतिरेकि,केवलान्वयि,केवलव्यतिरेकि चेति।

(विवरणम्)इदं वाक्यं लिङ्गस्य त्रैविध्यं बोधयति। १).अन्वयव्यतिरेकी (हेतुःउलिङ्गम्) २).केवलान्वयी(हेतुः= लिङ्गम्) ३).केवलव्यतिरेकी (हेतुःउलिङ्गम्) चेति हेतुः(उलिङ्गम्) त्रिविधः।

८.४.१.१.लिङ्गस्य त्रैविध्यम् > अन्वयव्यतिरेकि लिङ्गम्

(मूलम्) अन्वयेन व्यतिरेकेण व्याप्तिमत् अन्वयव्यतिरेकि। यथा-वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमः तत्र अग्निः यथा महानस इत्यन्वयव्यप्तिः, यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः इति व्यतिरेकव्याप्तिः।

(विवरणम्) इमानि वाक्यानि सोदाहरणं अन्वयव्यतिरेकि लिङ्गं निरूपयन्ति। अन्वयः नाम भावः,तत् सत्वे -तत्सत्वम् इत्येवंरूपः। व्यतिरेकः नाम अभावः, तत् अभावे-तत् अभावः इतेवंरूपः। एवं भावात्मिका व्याप्तिः, अभावात्मिका च व्याप्तिः यस्मिन् लिङ्गे वर्तते तत् अन्वयव्यतिरेकि लिङ्गं भवति। तथा च

भावमुखेन साहचर्यम् अन्वयव्याप्तिः।

अभावमुखेन साहचर्यम् व्यतिरेकव्याप्तिः।

यस्य च हेतोः उभयविधं साहचर्यं वर्तते सः हेतुः अन्वयव्यतिरेकी भवति।

उदाहरणम्; 'पर्वतो वह्निमान्' इति अनुमानस्थले धूमवत्वं उधूमहेतुः अन्वयव्यतिरेकी भवति। तत्र च- यत्र धूमः तत्र महानसादाविव वह्निः अपि वर्तते इति धूमस्य भावमुखेन वह्निसाहचर्यम् अस्ति। एवं यत्र वह्निः नास्ति तत्र जलाशयादाविव धूमः अपि नास्तीति अभावमुखेन तस्य वह्निसाहचर्यं वर्तते इति 'पर्वतो वह्निमान्' इति अनुमानस्थले धूमहेतुः अन्वयव्यतिरेकी भवति।

अत्र इदम् अवधेयम्; ' यत्र अयं तत्र सः वर्तते ' इति अन्वयसाहचर्यं = अन्वयव्याप्तिः। ' यत्र सः नास्ति तत्र अयम् अपि न वर्तते ' इति अभावसाहचर्यं = व्यतिरेकव्याप्तिः। ' अस्ति ' इत्युक्ते यः अर्थः, सः एव ' नास्ति इति न ' इत्युक्ते अपि प्रतीयते। परम् ' अस्त्येव ' इति सम्भाव्यनिषेधनिवर्तनं प्रतिषेधद्वयेन क्रियते। तद्वत् अत्रापि व्यतिरेकेण साध्यसाहचर्येव हेतुः भवतीति निश्चितसाहचर्यं हेतोः प्रतिपादितं भवतीति भावः।

**८.४.१.२.लिङ्गस्य त्रैविध्यम् > केवलान्वयि लिङ्गम्**

(मूलम्)अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा-घटः अभिधेयः प्रमेयत्वात्, पटवत् इत्यत्र प्रमेयत्व-अभिधेयत्वयोः व्यतिरेकव्याप्तिः नास्ति,सर्वस्यापि प्रमेयत्वात् अभिधेयत्वाच्च ।

(विवरणम्)इमानि वाक्यानि सोदाहरणं केवलान्वयिलिङ्गं निरूपयन्ति। अन्वयः नाम भावः,तत् सत्वे -तत्सत्वम् इतेवंरूपः। यस्मिन् लिङ्गे केवलं भावात्मिका व्याप्तिः एव भवति, अभावात्मिका च व्याप्तिः तु न सम्भवति तत् लिङ्गं केवलान्वयि भवति। अर्थात् यस्य च हेतोः अन्वयव्याप्तिः एव वर्तते, व्यतिरेकव्याप्तिः न वर्तते, सः केवलान्वयी हेतुः भवति।यत्र हेतोः साध्यस्य वा, उभयोः वा अभावः एव नास्ति, अर्थात् हेतुः, साध्यम्, उभयं वा सर्वत्र वर्तते , तत्र अभावयोः साहचर्यम् अपि न वर्तते इति,हेतु-साध्ययोः केवलम् अन्वयसाहचर्यम् एव इति च, तत्र हेतुः केवलान्वयी भवति।

उदाहरणम्; 'घटः अभिधेयः प्रमेयत्वात् 'इत्यादिन्यायप्रयोगेण प्रमेयत्वहेतुना घटे अभिधेयत्वं साध्यते। प्रमेयत्वम् उ ज्ञानविषयत्वम्उ ईश्वरज्ञानविषयत्वं वा। अभिधेयत्वं च उ पदार्थत्वम् उ सर्वपदवाच्यत्वं वा। तयोः अभावः अप्रसिद्धः इति, तत्र ' यत्र प्रमेयत्वं तत्र अभिधेयत्वम् ' इति रीत्या हेतोः अन्वयव्याप्तिः एव इति, प्रमेयत्वहेतुः केवलान्वयी भवति। अतः घटे अभिधेयत्वे साध्ये प्रमेयत्वं केवलान्वयिलिङ्गं भवति।

**८.४.१.३.लिङ्गस्य त्रैविध्यम् > केवलव्यतिरेकि लिङ्गम्**

(मूलम्)व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा, पृथिवी इतरभ्यः भिद्यते गन्धवत्वात्।यत् इतरेभ्यः न भिद्यते न तत् गन्धवत्, यथा जलम्। न चेयं तथा। तस्मात् न तथेति। अत्र यत् गन्धवत् तदितरभिन्नम् इत्यन्वयदृष्टान्तो नास्ति। पृथिवीमात्रस्य पक्षत्वात्।

(विवरणम्)इमानि वाक्यानि सोदाहरणं केवलव्यतिरेकिलिङ्गं निरूपयन्ति। व्यतिरेकः नाम अभावः,तत् अभावे -तत् अभावः इतेवंरूपः। यस्मिन् लिङ्गे केवलं अभावात्मिका व्याप्तिः एव भवति, भावात्मिका च व्याप्तिः तु न सम्भवति तत् लिङ्गं केवलव्यतिरेकि भवति। नाम यस्य हेतोः व्यतिरेकव्याप्तिः एव वर्तते, अन्वयव्याप्तिः न वर्तते, सः केवलव्यतिरेकी हेतुः भवति। उदाहरणम् ; पृथिवी स्वस्मात् इतरेभ्यः जलादिभ्यः भिन्ना गन्धवत्वात् इति अनुमानेन पृथिव्यां गन्धहेतुना इतरभेदः साध्यते। अत्र ' यत्र गन्धः तत्र इतरभेदः ' इत्यन्वयव्याप्तिः दर्शयितुं न शक्यते, उदाहरणाभावात्। अत्र

पृथिवी सर्वा पक्षभूता। सन्दिग्धसाध्यवती सा व्याप्तेः उदाहरणं न भवितुम् अर्हति।तदितरत्र जलादौ तु गन्धहेतुः एव न वर्तते। उदाहरणशून्या च व्याप्तिः न अनुमानाङ्गभूता। अतः यत्र इतरभेदाभावः तत्र गन्धाभावः, यथा जलम् इति साध्याभाव-हेत्वभावयोः व्यतिरेकव्याप्तिरेव वर्तते इति अयं हेतुः केवलव्यतिरेकी भवति।

## ८.५.पक्ष-सपक्ष-विपक्षाणां निरूपणम्

(विवरणम्)अनुमानप्रक्रियायां, निश्चयस्य अधिगमने,परितः आलोचनाय पक्ष-सपक्ष-विपक्षाणां ज्ञानम् आवश्यकं भवति । अतः अत्र तेषां पक्ष-सपक्ष-विपक्षाणां स्वरूपं स्वभावं च निरूप्यते।

८.५.१.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > पक्षः

(मूलम्)सन्दिग्धसाध्यवान् पक्षः यथा, धूमवत्त्वे हेतौ पर्वतः ।

(विवरणम्) वाक्यमिदं पक्षं सोदाहरणं निरूपयति। यत्र 'साध्यम् अस्ति वा न वा' इति संशयः जातः सः पक्षः। यथा 'पर्वतो वह्निमान्' इत्यत्र अनुमाने पर्वतः पक्षः। तत्र अनुमितेः पूर्वं 'पर्वतो वह्निमान् वा न वा 'इति सन्देहः जायते।'तद्गते चाग्नौ सन्दिहानः 'इति हि अयमर्थः पूर्वं दर्शितः। अतः साध्यसन्देहविषयः पर्वतः अत्र पक्षः भवति। तथा च साध्यसन्देहविषयः पक्षः। अतः एव तत्र हेतुना साध्यस्य अनुमानम्।

### ८.५.२.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > सपक्षः

(मूलम्)निश्चितसाध्यवान् सपक्षः । यथा, अत्रैव महानसः ।

(विवरणम्) वाक्यमिदं सपक्षं सोदाहरणं निरूपयति। यत्र 'साध्यम् अवश्यं वर्तते ' इति निश्चयः प्रथमम् एव वर्तते सः सपक्षः। यथा धूमेन पर्वते वह्निसाधने महानसं सपक्षः। तत्र हि धूमस्य वह्निसाहचर्यं पुनः पुनः प्रत्यक्षी- कृतम् इति वह्निरूपसाध्यनिश्चयः वर्तते। तथा च साध्यनिश्चयविषयः सपक्षः। सः हि अन्वयव्याप्तेः उदाहरणम्।

### ८.५.३.पक्ष-सपक्ष-विपक्षाणां निरूपणम् > विपक्षः

(मूलम्)निश्चितसाध्याभाववान् विपक्षः। यथा, अत्रैव महाह्रदः ।

(विवरणम्) वाक्यमिदं विपक्षं सोदाहरणं निरूपयति। यत्र 'साध्यम् नास्ति' इति निश्चयः प्रथमम् एव वर्तते, सः विपक्षः। यथा पूर्वानुमाने महाह्रदः विपक्षः। जलाशये तत्र साध्यभूतः वह्निः न वर्तते इति निश्चयः वर्तते। तथा च साध्याभावनिश्चयविषयः विपक्षः। सः हि व्यतिरेकव्याप्तेः उदाहरणम्। एवं साध्यभेदेन पक्ष-सपक्ष-विपक्षाः भिद्यन्ते।

**स्वावलोकनप्रश्नाः**

१) प्रतिज्ञा नाम का ?

२) पक्षः नाम कः ?

३) अनुमानं कतिविधम् ?

४) अन्वयः नाम कः ?

५) व्यतिरेकः नाम कः ?

## ८.६. उपसंहारः

एवम् अत्र अनुमानस्य लक्षणं कथितम्।स्वार्थानुमान- परार्थानुमानयोः स्वरूपं प्रदर्शितम्। प्रतिज्ञा, हेतुः उदाहरणम् ,उपनयम् निगमनानि दर्शितानि। अन्वयव्यतिरेकि- केवलान्वयि- केवलव्यतिरेकि- लिङ्गानां स्वरूपं बोधितम्।

## ८.७. अभ्यासः

अ).परार्थानुमानस्य स्वरूपं निरूपयत ?

इ).अन्वयव्यतिरेकिणः लिङ्गस्य स्वरूपं सोदाहरणं निरूपयत ?

**UNIT-IX**

**हेत्वाभासाः**

## संरचना

९.०.हेत्वाभासाः > परिचयः
९.१. लक्ष्याणि
९.२.हेत्वाभासाः-निर्वचनम्
९.३.हेत्वाभासाः > पञ्च प्रकाराः
९.३.१.हेत्वाभासाः> सव्यभिचारः
९.३.१.१.हेत्वाभासाः > सव्यभिचारः > साधारणः
९.३.१.२.हेत्वाभासाः > सव्यभिचारः > असाधारणः
९.३.१.३.हेत्वाभासाः > सव्यभिचारः > अनुपसंहारी
९.३.२.हेत्वाभासाः > विरुद्धः;
९.३.३.हेत्वाभासाः > सत्प्रतिपक्षः;
९.३.४.हेत्वाभासाः > असिद्धः
९.३.४.१.हेत्वाभासाः > असिद्धः > आश्रयासिद्धः
९.३.४.२.हेत्वाभासाः > असिद्धः > स्वरूपासिद्धः
९.३.४.३.हेत्वाभासाः > असिद्धः > व्याप्यत्वासिद्धः
९.३.४.३.१.हेत्वाभासाः > असिद्धः > व्याप्यत्वासिद्धः > उदाहरणम्
९.३.५.हेत्वाभासाः > बाधितः
९.४. उपसंहारः
९.५. अभ्यासः

### ९.०.हेत्वाभासाः > परिचयः ;

एतावत् पर्यन्तम् अनुमितिसामग्री निरूपिता। अस्यां च अनुमानप्रक्रियायां हेतुः सर्वमहान्। साध्येन सह अविनाभाव- सम्बन्धविशिष्टः,दोषरहितश्चसद्धेतुः (सत्-हेतुः)भवति। १).पक्षसत्वम् २).सपक्षसत्वम् ३).विपक्षासत्वम् ४).असत्प्रति - पक्षितत्वम् ५).अबाधितत्वं च सत्-हेतुरूपाणि। एषु अन्यतमस्यापि अपाये हेतोः आभासता आविशति। केवला- न्वयिहेतोः विपक्षः न वर्तते इति तस्य विपक्षासत्वम्, केवलव्यतिरेकिणश्च सपक्षो न वर्तते इति तस्य सपक्षसत्वं दुर्वचम्। अतः तयोः

चत्वार्येव रूपाणि पर्याप्तानि।

१).पक्षसत्वम् = साध्यसन्देहवति पक्षे विद्यमानत्वम्.

२).सपक्षसत्वम्= निश्चितसाध्यवति सपक्षे विद्यमानत्वम्.

३).विपक्षासत्वम् = साध्याभावनिश्चयवति विपक्षे अविद्यमानता.

४).असत्प्रतिपक्षितत्वम् = प्रतिपक्षहेतुराहित्यम्। हेतोः प्रतिपक्षो नाम,तत्साध्याभावसाधकः अन्यः हेतुः । तादृशप्रातिहेतुराहित्यम् एव असत्प्रतिपक्षिततत्वम् ।

५).अबाधितत्वम्उबाधदोषराहित्यम्। पक्षे साध्यशून्यता बाधदोषः। तादृशदोषराहित्यम् उपक्षे साध्यसत्ता, अबाधिततत्वं नाम हेतुस्वरूपम्। इमानि पञ्च सद्धेतु(सत्-हेतु)लक्षणानि।

उदाहरणम्; पर्वते वह्निसाधने धूमः सद्धेतुः(सत्-हेतुः)। तथा हि-१).धूमः अयं पर्वते वर्तते। २).सपक्षे महानसादौ विद्यते। ३).विपक्षे ह्रदादौ न वर्तते। ४).तस्य च यत्साध्यंउ वह्निः, तदभावसाधकं हेत्वन्तरं पर्वते नास्ति। ५).एवं तत्साध्यम् उवह्निः पक्षे पर्वते वर्तते च इति बाधदोषः अपि नास्ति। अतश्च वह्निसाधकः अयं धूमहेतुः सद्धेतुः (सत्-हेतुः) भवति।

## ९.१. लक्ष्याणि

कञ्चन पक्षीकृत्य हेतुना खलु यत्किञ्चित् साध्यते । अतः हेतुः सर्वत्र साध्यसाधकः भवति। साध्यसाधकः हेतुः सद्धेतुः भवति। सः निर्बाधम् अनुमितिज्ञानं जनयति। यः साध्यं न साधयति, यश्च साध्याभावम् अपि साधयति, सः साध्यबाधकः हेतुः सन् दुष्टः भवति। दुष्टः हेतुः असद्धेतुः इति उच्यते । सः च बहुविधः भवति। ते असद्धेतवः प्रधानतः अनुमितिज्ञानं प्रतिबध्नन्ति। एतेषु च केचित् साक्षात् अनुमितिं प्रतिबध्नन्ति। केचित् परामर्शज्ञानं प्रति बध्नन्ति। अन्ये च केचित् व्याप्तिज्ञानं च प्रतिबध्नन्ति। एवम् अनुमितिज्ञानप्रतिबन्धकेषु हेतुषु दुष्टता कीदृशी ? साध्यस्य पक्षाभावरूपः वा ? पक्षे हेत्वभावरूपः वा ? हेतुः साध्यसाधनाय अपर्याप्ततारूपः वा ? साध्यातिरिक्तस्य अपि साधकतारूपः वा ? इत्येवं दुष्टता बहुधा भिन्ना वर्तते। एवं बहुधा भिन्नायाः हेतुगतदुष्टतायाः स्वरूपस्य स्वभावस्य च निरूपणाय उद्दिष्टः अयं पाठ्यांशः। एतत् पाठ्यांशस्य अध्ययनेन —

- हेत्वाभासपदस्य अर्थम् अवगन्तुं प्रभवति।
- हेत्वाभासानां वैविध्यं ज्ञातुं समर्थः भवति।

- सप्रभेदम् अनैकान्तिकं पठितुं पारयति।
- असिद्धस्य प्रभेदान् लिखितुं प्रभवति।
- सत्प्रतिपक्षस्य स्वभावं च लिखितुं समर्थः भवति।
- विरुद्धस्य स्वरूपम् अवगन्तुं प्रभवति।
- बाधितस्य दुष्टतां ज्ञातुं  पारयति।

## ९.२.हेत्वाभासाः-निर्वचनम्

हेतोः आभासाः हेत्वाभासाः इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतवः इत्यर्थः।एते च अनुमिति प्रतिबन्धकाः भवन्ति।ये तु हेतवःवस्तुतः न सन्तःउदुष्टहेतवः, परं हेतुवत् प्रतीयन्ते, ते हेत्वाभासाः इति कथ्यन्ते। एते अनुमिति- ज्ञानप्रतिबन्धकाः भवन्ति।

## ९.३.हेत्वाभासाः > पञ्च प्रकाराः

(मूलम्)सव्यभिचार- विरुद्ध-सत्-प्रतिपक्ष-असिद्ध-बाधिताः इति पञ्च हेत्वाभासाः।

(विवरणम्)इदं च वाक्यं, पञ्च हेत्वाभासान् नामतः निर्दिशति।

१).सव्यभिचारः २).विरुद्धः ३).सत्-प्रतिपक्षः ४).असिद्धः ५).बाधितः इति हेत्वाभासाःउदुष्टहेतवः पञ्चविधाः।

१).व्यभिचारः २).विरेधः ३).सत्-प्रतिपक्षः ४).असिद्धिः ५).बाधः इति हेतुदोषाः।

१).व्यभिचारदोषविशिष्टः सव्यभिचारः हेत्वाभासः।

२).विरेधदोषसहितः हेतुः विरुद्धः।

३).सत्-प्रतिपक्षदोषवान् हेतुः सत्प्रतिपक्षः।

४).असिद्धिदोषसहितः हेतुः असिद्धः।

५).बाधदोषविशिष्टः  हेतुः बाधितः।

व्यभिचारादिदोषेषु अन्यतमः अपि हेतौ वर्तते, इति ज्ञानेन अनुमितिः, तत्कारणानि, व्याप्ति- पक्षधर्मता- ज्ञानादीनि वा प्रतिबध्यन्ते। यथाकथमपि तत्र अनुमितिः न जायते इति भावः।

### ९.३.१.हेत्वाभासाः> सव्यभिचारः

(मूलम्)सव्यभिचारः अनैकान्तिकः। सः त्रिविधः, साधारण-असाधारण-अनुपसंहारिभेदात्।

(विवरणम्)इदं वाक्यं सप्रभेदं सव्यभिचारहेत्वाभासं निरूपयति। यः सदा एकस्यैव

अन्तिके वर्तते,तेनैव सहचरितः भवति, सः एकान्तिकः। तादृशः , न भवति यः, सः अनैकान्तिकः। अनेकैः (साध्येन,साध्याभावेन च) सह चरति इति सः सव्यभिचारी हेत्वाभासः। एकान्ते ऽसाध्यवति एव,वर्तते इति ऐकान्तिकः। न ऐकान्तिकः अनैकान्तिकः इति विग्रहे सव्यभिचारपदसमानार्थकत्वं समायाति। अथवा एकान्तःऽनियमः, अव्यभिचारः इति यावत् ,सः अस्य अस्ति इति ऐकान्तिकः=अव्यभिचारी इत्यर्थः सः न भवति इति सव्यभिचारः अनैकान्तिकः। एवम् अनैकान्तिक- सव्यभिचारपदयोः अर्थः ग्राह्यः भवति। सः १).साधारणः २).असाधारणः ३).अनुपसंहारी इति त्रिविधः।

**९.३.१.१.हेत्वाभासाः > सव्यभिचारः > साधारणः;**

(मूलम्) साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वात् इति, प्रमेयत्वस्य वह्न्यभाववतिह्रदे विद्यमानत्वात् ।

(विवरणम्)इदं वाक्यं सव्यभिचारप्रभेदेषु प्रथमं साधारणाख्यं हेत्वाभासं निरूपयति। तेषु सव्यभिचारप्रभेदेषु,साध्य- शून्ये अपि यः हेतुः वर्तते,सः साधारणः नाम अनैकान्तिकः। उदाहरणम्;पर्वतो वह्निमान् प्रमेयत्वात्। पर्वते वह्नि- साधनाय प्रयुक्तः प्रमेयत्वहेतुः साधारणः। तथाहि - अत्र पर्वतः पक्षः, वह्निमत्वं साध्यम्। प्रमेयत्वं हेतुः। प्रमेयत्व- हेतुः केवलान्वयीऽसर्वत्र विद्यमानः, वह्निरूपसाध्यशून्ये जलाशये अपि वर्तते। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे अपि विद्यमानत्वात् प्रमेयत्वरूपः हेतुः साधारणः अनैकान्तिकः भवति।

एवम्, मूकं दृष्ट्वा 'अयं मौनी महायोगी स्यात्' इति अभ्यूहे, प्रेक्षकरहितं धनादायशून्यं च चित्रं -सिनिमां -उपलक्ष्य 'नूनम् इदम् अत्युत्तमचित्रं स्यात्' इति अभ्यूहे च, हेतुः सव्यभिचारी।

**९.३.१.२.हेत्वाभासाः > सव्यभिचारः > असाधारणः;**

(मूलम्)सर्वसपक्ष-विपक्ष-व्यावृत्तः हेतुः असाधारणः। यथा–शब्दः नित्यः शब्दत्वात् इति। अत्र शब्दत्वं सर्वेभ्यः नित्येभ्यः अनित्येभ्यः च व्यावृत्तं शब्दमात्रवृत्ति।

(विवरणम्)इदं वाक्यं सव्यभिचारप्रभेदेषु द्वितीयम् असाधारणाख्यं हेत्वाभासं निरूपयति। हेतुः सर्वत्र पक्ष-सपक्ष- विपक्षाणां साधारणः भवेत्। परं यत्र निश्चितसाध्यवत्सु वा निश्चितसाध्याभाववत्सु वा अलभमानः, एकस्मिन् पक्षे एव लभ्यत्वेन वर्ण्यते सः असाधारणः अनैकान्तिकहेतुः भवति। उदाहरणम्; शब्दः नित्यः शब्दत्वात् इति। अत्र पक्षः शब्दः, नित्यत्वं साध्यम्। शब्दत्वं हेतुः। शब्दत्वहेतुना शब्दे नित्यत्वे

साध्ये , शब्दत्वहेतुः असाधारणः भवति। अत्र नित्यत्वनिश्चयवन्तः आकाशादयः सपक्षाः। नित्यत्वाभावनिश्चयवन्तः अनित्याः घटादयः विपक्षाः। शब्दत्वं हि न आकाशादिषु, न वा घटादिषु वर्तते, केवलं शब्दे पक्षे एव वर्तते। पक्षेभ्यः विपक्षेभ्यश्च व्यावृत्तः सन् , केवलं शब्दे पक्षे एव वर्तते इति, अत्र शब्दत्वहेतुः असाधारणोऽनैकान्तिकः भवति।

**९.३.१.३.हेत्वाभासाः > सव्यभिचारः > अनुपसंहारी ;**

(मूलम्) अन्वय-व्यतिरेक-दृष्टान्तरहितः अनुपसंहारी। अत्र सर्वस्यापि पक्षत्वात् दृष्टान्तः नास्ति।

(विवरणम्) इदं वाक्यं सव्यभिचारप्रभेदेषु तृतीयम् अनुपसंहारिनामकं हेत्वाभासं निरूपयति। यस्य हेतोः अन्वय- दृष्टान्तः न भवति, व्यतिरेकदृष्टान्तः वा न वर्तते, सः अनुपसंहारी नामा सव्यभिचारः भवति। अन्वय-व्यतिरेक- दृष्टान्ताभ्याम् उपसंहृतः अपि अयं हेतुः, साध्यसाधनाय अनुपसंहारी सन् साध्यसाधनाय विफलयत्नं आचरति। उदाहरणम्; सर्वम् अनित्यं प्रमेयत्वात्। अत्र सर्वं पक्षः, अनित्यत्वं साध्यम्। प्रमेयत्वं हेतुः। अत्र सर्वस्यापि पक्षत्वेन,तदतिरिक्तस्य अप्रसिद्धतया हेतोः अन्वय-व्यतिरेकदृष्टान्तौ न भवतः। अतः सर्वं पक्षीकृत्य अनित्यत्व- साधने प्रमेयत्वहेतुः अनुपसंहारी भवति।

९.३.१.३.अनुपसंहारी

**स्वावलोकनप्रश्नाः**

१).अनैकान्तिकः इत्यस्य अर्थः कः ?

२).अनैकान्तिकः कति प्रकारः ?

३).साधारणानैकान्तिकस्य लक्षणं किम् ?

४).सर्वसपक्ष-विपक्ष-व्यावृत्तः हेतुः कः ?

५).सर्वम् अनित्यं प्रमेयत्वात्। अत्र प्रमेयत्वाहेतौ दुष्टता कीदृशी ?

**९.३.२.हेत्वाभासाः > विरुद्धः;**

(मूलम्)साध्याभावव्याप्तो हेतुः विरूद्धः। यथा, शब्दो नित्यः कार्यत्वात्, घटवत् इति। अत्र कार्यत्वं नित्यत्वाभावेन अनित्यत्वेन व्याप्तम्।

(विवरणम्)इदं वाक्यं हेत्वाभासप्रकारेषु द्वितीयं विरुद्धं निरूपयति। सर्वत्र हेतुः साध्यसाधनाय उपात्तः भवति। परम्,अत्र साध्यसाधनाय असमर्थः सन्, प्रत्युत साध्यविरुद्धंउसाध्याभावं साधयति। एवं साध्यविरोधस्य साधकत्वात् अस्य हेतोः विरुद्धः इति नाम जातम्। यस्य साध्याभावेन सह साहचर्यम्उव्याप्तिः,वर्तते, न साध्येन, सः विरुद्धः हेतुः भवति। सद्धेतुः साध्येन व्याप्ति (उसाहचर्य)विशिष्टः सन्, पक्षे साध्यं साधयितुं प्रभवति। साध्याभावेन व्याप्तत्वात् विरुद्धः अयं हेतुः साध्याभावम् एव साधयितुं प्रभवति, न साध्यम्। उदाहरणम्;यथा शब्दो नित्यः कार्यत्वात्। अत्र शब्दः पक्षः, नित्यत्वं साध्यम्, कार्यत्वात् हेतुः। शब्दे-पक्षे-नित्यत्वसाधनाय प्रयुक्तः कार्यत्वहेतुः विरुद्धः। कार्यत्वं हि नित्यत्वरूपसाध्यशून्ये उत्पत्तिविनाशशालिनि घटादौ एव वर्तते, न तु नित्यत्ववति = नित्ये आकाशादौ। अतः नित्यत्वाभावेनउ अनित्यत्वेन, व्याप्तिविशिष्टः कार्यत्वहेतुः नित्यत्वाभावम् एव साधयति, न नित्यत्वम् इति, कार्यत्वहेतुः विरुद्धः भवति।

**९.३.३.हेत्वाभासाः > सत्प्रतिपक्षः;**

(मूलम्) यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते सः सत्-प्रतिपक्षः। यथा, शब्दः नित्यः श्रावणत्वात् ,शब्दत्ववत् > शब्दः अनित्यः कार्यत्वात् घटवत् इति ।

(विवरणम्)इदं वाक्यं हेत्वाभासप्रकारेषु तृतीयं सत्-प्रतिपक्षं निरूपयति। सन्उविद्यमानः, प्रतिपक्षःउप्रकृत- साध्यस्य अभावसाधनीभूतः अन्यः हेतुः यस्य सः उसत्प्रतिपक्षः। हेतोः प्रतिपक्षः बलवान् वर्तते इति, विद्यमान-प्रतिपक्षत्वेन, स सत्प्रतिपक्ष इत्युच्यते।यस्य साध्याभावसाधनाय कश्चन हेतुः प्रयुक्तः,तत्र यदि तादृशसाध्यस्यैव अभावं साधयितुं अन्यः हेतुः प्रयुक्तः भवेत्, तदा प्रथमः हेतुः सत्-प्रतिपक्षः भवति। उदाहरणम्; शब्दो नित्यः श्रावणत्वात् शब्दत्ववत् ऊशब्दः अनित्यः कार्यत्वात् घटवत् (प्रतिपक्षः)। अत्र प्रथमे- शब्दः पक्षः,नित्यत्वं साध्यम्,द्वितीये- शब्दः पक्षः, अनित्यत्वं साध्यम् कार्यत्वं हेतुः । शब्दस्य नित्यत्वसाधनाय श्रावणत्वम् =श्रवणेन्द्रियजन्यप्रत्यक्षविषयत्वम्,हेतुतया प्रथमं प्रयुक्तम्। अन्येन तत्र नित्यत्वरूपसाध्यस्य अभावम्=अनित्यत्वं साधयितुं कार्यत्वहेतुः प्रयुक्तः। उत्पादविनाशशाली शब्दः कार्यः भवतीति कार्यत्वहेतुना सः अनित्यः एव भवति।

तथा च नित्यत्वसाधनाय प्रथमं प्रयुक्तः श्रावणत्वहेतुः सत्-प्रतिपक्षः भवति।

अत्र इदम् अवधेयम्; वादप्रतिवादाः एवम् एव प्रारब्धाः भवन्ति। एकः केनचित् हेतुना किञ्चित् अस्ति इति वदति। अन्यः हेत्वन्तरेण तत् नास्ति इति प्रतिवादं करोति। तत्र हेतुद्वयमध्ये एकः एव सद्धेतुः भवति। अन्यः तु, सः प्रथमः वा भवतु, द्वितीयः वा भवतु ,सत्-प्रतिपक्षः भवति। शब्दः अयं ब्रह्मरूपः विश्वम् अभिव्याप्य वसति। अरणिः निर्मथनदारुसंयोगात् तत्र पूर्वं विद्यमानः एव अग्निः यथा अभिव्यक्तः भवति, न उत्पद्यते, यथा विद्यमानः एव पवनः व्यजनादिना प्रस्फुटः भवति, न उत्पद्यते,तद्वत् भेरीदण्डादीनां दन्तताल्वादीनां वा अभिघातसंयोगेन शब्दः अभिव्यज्यते इति वैयाकरणानां सिद्धान्तः।

शब्दः, शब्दत्वजातिश्च श्रवणेन्द्रियेणैव ज्ञायेते। श्रवणगोचरं शब्दत्वं यथा नित्यं, तद्वत् श्रवणगोचरः शब्दः अपि नित्यः एव इति तेषां पूर्वानुमानम्। श्वासनादादिभेदभिन्नः आनुपूर्व्यादिविशिष्टश्च वर्णात्मकः तारत्वादि- विशिष्टः ध्वन्यात्मकः वा शब्दः विनूत्नः एव बाह्य-आभ्यन्तरप्रयत्नसमुत्पाद्यः इति शब्दः अनित्यः एव इति तार्कि- काणां द्वितीयम् अनुमानम्।

## ९.३.४.हेत्वाभासाः> असिद्धः

(मूलम्) असिद्धः त्रिविधः आश्रयासिद्धः,स्वरूपासिद्धः,व्याप्यत्वासिद्धश्चेति।

(विवरणम्)इदं वाक्यं हेत्वाभासप्रकारेषु चतुर्थम् असिद्धम् - तस्य भेदान् च बोधयति। न सिद्धिः असिद्धिः= अविद्यमानता, साध्यव्याप्यहेतोः पक्षे असिद्धिः=अविद्यमानता, इत्यर्थः। 'साध्य-अविनाभूतः हेतुः पक्षे वर्तते' इति ज्ञानं परामर्शः भवति खलु।एवम् अयम् असिद्धः परामर्शं प्रतिबध्नाति इति फलति। परामर्शज्ञाने व्याप्ति, पक्षता, पक्षधर्मताः चेति त्रयः अंशाः सन्ति। कदाचित् पक्षे दोषः भवेत् , कदाचित् हेतौ दोषः भवेत् १). कदाचित् च व्याप्तौ दोषः भवेत्। परामर्शांशगतदुष्टताम् आधारीकृत्य,१).आश्रयासिद्धः २).स्वरूपासिद्धः ३).व्याप्यत्वासिद्धः चेति असिद्धः त्रिविधः भवति।

### ९.३.४.१.हेत्वाभासाः > असिद्धः > आश्रयासिद्धः;

(मूलम्) आश्रयासिद्धः यथा गगनारविन्दं सुरभि, अरविन्दत्वात् ,सरोजारविन्दवत्, अत्र गगनारविन्दम् आश्रयः, सः च नास्त्येव।

(विवरणम्)आश्रयासिद्धः, स्वरूपासिद्धः,व्याप्यत्वासिद्धः चेति असिद्धः त्रिविधः। अत्र इदं वाक्यं असिद्धप्रकारेषु प्रथमम् आश्रयासिद्धं सोदाहरणं निरूपयति। आश्रयः

= पक्षः,असिद्धः यस्य हेतोः सः आश्रयासिद्धः। आश्रयः नाम साध्यस्य आश्रयः पक्षः। यदि सः नास्ति , तदा हेतुः आश्रयासिद्धः भवति।अत्र हेतोः पक्षः एव न सम्भवति। उदाहरणम्; गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत्। अत्र गगनारविन्दं पक्षः। सुरभित्वं साध्यम्। अरविन्दत्वं हेतुः। गगनारविन्दं सुरभि इत्यादिना आकाशकमले अरविन्दत्वहेतुना यदि सौरभं साध्यते,तत्र कमले आकाशीत्वं नास्ति इति हेतोः, आकाशकमलरूपः पक्षः एव ,अप्रसिद्धः इति अरविन्दत्वहेतुः आश्रयासिद्धः भवति।

अस्यां च अनुमानप्रक्रियायां हेतुः प्रधानः इति वस्तुतः पक्ष-सपक्षसाध्यादिगताः दोषाः सर्वे अपि यथाक- थञ्चित्, परम्परासम्बन्धेन वा हेतुदोषतया विभाव्यन्ते। प्रकृते आश्रयासिद्धे गगनीयत्वाभावः पक्षस्य अरविन्दस्य दोषः। तादृशे पक्षे साध्यसाधनाय प्रयुक्तः इति अरविन्दत्वहेतुः आश्रयासिद्धः जातः।

**९.३.४.२.हेत्वाभासाः > असिद्धः > स्वरूपासिद्धः**

(मूलम्) स्वरूपासिद्धः यथा - शब्दः गुणः चाक्षुषत्वात् रूपवत् । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात्

(विवरणम्)आश्रयासिद्धः,स्वरूपासिद्धः,व्याप्यत्वासिद्धः चेति असिद्धः त्रिविधः। अत्र इदं वाक्यं असिद्धप्रकारेषु द्वितीयम् स्वरूपासिद्धं सोदाहरणं निरूपयति। पक्षे विद्यमानत्वं हि हेतोः स्वरूपम्। तादृशस्वरूपरहितः=पक्षे अविद्यमानः , हेतुः स्वरूपासिद्धः इति एवं तत् नाम आगतम्। स्वरूपम्= हेतुः, तच्च पक्षे असिद्धम्, यत्र हेतौ. सः स्वरूपासिद्धः। पक्षे हेत्वभावो वा , हेत्वभाववान् पक्षः वा स्वरूपासिद्धः भवति। अत्र पक्षे हेतुः सुतरां न सम्भवति।उदाहरणम्; शब्दः गुणः चाक्षुषत्वात् रूपवत्।अत्र शब्दः पक्षः, गुणः साध्यम् , चाक्षुषत्वं हेतुः। चाक्षुषत्वहेतुना शब्दे गुणत्वसाधने हेतुः स्वरूपासिद्धः भवति। चाक्षुषत्वं हि चक्षुरिन्द्रियग्राह्यत्वं , शब्दे पक्षे न वर्तते। शब्दः हि श्रवणेन्द्रियग्राह्यः इति तत्र श्रावणत्वम् एव वर्तते। अतः शब्दं पक्षीकृत्य गुणत्वे साध्ये चाक्षुषत्व- रूपहेतुः स्वरूपेण असिद्धः।

**९.३.४.३.हेत्वाभासाः> असिद्धः > व्याप्यत्वासिद्धः**

(मूलम्)सोपाधिकः हेतुः व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वं उपाधिः। साध्यसमानाधिकरण- अत्यन्ताभाव- अप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठ-अत्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्।

(विवरणम्)इमानि वाक्यानि असिद्धप्रकारेषु तृतीयम् व्याप्यत्वासिद्धं निरूपयन्ति। उपाधिविशिष्टः हेतुः व्याप्यत्वासिद्धः। व्याप्यो नाम व्याप्तिविशिष्टः, व्याप्यत्वं च

व्याप्तिरेव। उपाधिवशात् व्याप्तिशून्यः इति ज्ञातः हेतुः व्याप्यत्वासिद्धः भवति। उपाधिः साध्यस्य व्यापकः, साधनस्य अव्यापकश्च। साध्याधिकरणे अवश्यं विद्यमानः साध्यापेक्षया अधिकदेशवृत्तिश्च,साध्यव्यापकः। साधनाधिकरणे तथा अविद्यमानः, ततः अपि न्यूनदेशवृत्ति साधनाव्यापकः भवति। तादृश-उपाधिना सहितः व्याप्यत्वासिद्धः हेत्वाभासः।

साध्यं हि, साधनात् (हेतोः) अधिकदेशवृत्तिउव्यापकं, भवति। तादृशसाध्यस्यापि यत् व्यापकंउसाध्यात् अधिकदेशवृत्ति, तत् अवश्यं साधनस्य अपि व्यापकम्उ अधिकदेशवृत्ति एव भवति। एतत् सत्यम्। प्रकृते साध्यव्यापकः उपाधिः साधनस्य अव्यापकः दृष्टः। तेन च प्रकृतसाध्यं साधनस्य व्यापकं भवितुं नार्हति। तेन च अव्यापकेन साध्यतया उपात्तेन साधनस्य व्याप्तिः असङ्गतैवेति,प्रकृतं साधनं व्याप्यत्वासिद्धं दुष्टं भवति। एवं रीत्या उपाधिः, साध्यम् अव्यापकम् इति, हेतुश्च व्याप्तिशून्यः इति च गमयति।

हेत्वाभासाः> असिद्धः > व्याप्यत्वासिद्धः > उदाहरणम्;

(मूलम्)यथा'पर्वतो वह्निमान् वह्नेः'इत्यत्र आर्द्रेन्धनसंयोगः उपाधिः। तथा हि- 'यत्र धूमः तत्र आर्द्रेन्धनसंयोगः' इति साध्यव्यापकता। 'यत्र वह्निः तत्र आर्द्रेन्धनसंयोगः नास्ति,अयोगोलके आर्द्रेन्धनसंयोगाभावात् ' इति साधना- व्यापकता। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वात् आर्द्रेन्धनसंयोगःउपाधिः। सोपाधिकत्वात् वह्निमत्वं व्याप्यत्वासिद्धम्।

(विवरणम्)इमानि वाक्यानि असिद्धप्रकारेषु तृतीयस्य व्याप्यत्वासिद्धस्य उदाहरणं प्रदर्शयन्ति। पर्वतः धूमवान् वह्निमत्वात् महानसवत्। अत्र पर्वतः पक्षः। धूमवत्वं साध्यम्। वह्निमत्वात् इति हेतुः। पर्वते वह्निहेतुना धूमसाधने,आर्द्रेन्धनसंयोगः(वह्नेः आर्द्रेन्धनस्य च संयोगः),उपाधिः। अत्र धूमाधिकरणे सर्वत्र आर्द्रेन्धनसंयोगः अवश्यं वर्तते इति हेतोः,साध्यस्य धूमस्य आर्द्रेन्धनसंयोगः व्यापकः भवति। एवं वह्नेः अधिकरणे, तप्त-अयोगोलकादौ आर्द्रेन्धनसंयोगः नास्ति इति हेतोः,वह्निसाधनस्य आर्द्रेन्धनसंयोगः अव्यापकः भवति। एवम् उपाधिसहितः वह्निमत्वउवह्नि,हेतुः,व्याप्यत्वासिद्धः भवति।

अत्र इदम् अवधरन्तु; चैत्र-मैत्रयोः कः ज्येष्ठः ? इति सन्देहे कश्चित् आह- 'चैत्रः ज्येष्ठः, मैत्रस्तु कनीयान्' इति।तदा ततः अपि वृद्धः कश्चित् आगत्य अब्रवीत् - 'वस्तुतः चैत्रात् ज्येष्ठः विष्णुमित्रः,सः तु मैत्रात् कनीयानेव वर्तते। यदि मैत्रात् चैत्रः भवेत्, तदा तस्मादपि ज्येष्ठः विष्णुमित्रः अपि मैत्रात् ज्येष्ठः एव भवेत्। वस्तुतः

सः तस्मात् कनीयान् एव इति । एतेन चैत्रः न ज्येष्ठः इति खलु सिध्यति। तद्वत् यदि साधनीभूतस्य वह्नेः धूमः व्यापकः नाम अधिकदेशवर्ती, तर्हि तस्य व्यापकः आर्द्रेन्धनसंयोगः अपि वह्नेः अवश्यं व्यापकः एव भवेत्। वस्तुस्थितिः न तथा इति, न धूमः वह्निव्यापकः, न वा वह्निः धूमव्याप्यः इति निश्चीयते। एवम् अत्र वह्निः व्याप्यत्वासिद्धः भवतीति भावः।

**१.३.५.हेत्वाभासाः> बाधितः**

(मूलम्)यस्य साध्याभावः प्रमाणान्तरेण निश्चितः सः बाधितः। यथा–वह्निः अनुष्णः पदार्थत्वात् जलवत्। अत्र अनुष्णत्वं साध्यं,तदभावः उष्णत्वं त्वाचप्रत्यक्षेण गृह्यते इति।

(विवरणम्) इदं वाक्यं हेत्वाभासप्रकारेषु पञ्चमं बाधितं निरूपयति।यस्यउ यस्य हेतोः, साध्याभावः= साध्यबाधः प्रमाणान्तरेण= प्रत्यक्षप्रमाणेन, निश्चितः= पक्षे निर्णीतः, सः बाधितः इत्यर्थः। यस्य हेतोः साध्यं पक्षे न वर्तते इति प्रमाणान्तरेण निश्चितम् अस्ति, सः बाधितः हेत्वाभासः। साध्याभाववत्पक्षकत्वं बाधितत्वम् इति फलति। उदाहरणम्; वह्निः अनुष्णः पदार्थत्वात् जलवत्। अत्र वह्निः पक्षः , अनुष्णत्वं साध्यम् , पदार्थत्वं हेतुः। पदार्थत्व- हेतुना उष्णत्वाभावः यदि साध्यते, तदा पदार्थत्वहेतुः बाधितः भवति।वह्नौ उष्णत्वाभावरूपं साध्यं नास्ति= उष्णत्वमेव वर्तते इति त्वगिन्द्रियेण निश्चितम्।

वस्तुतः पक्षे साध्यं नास्ति इत्ययं न हेतुदोषः, पक्षस्य वा साध्यस्य वा दोषः सः। अथापि साध्यशून्ये पक्षे साध्यसाधनाय प्रयुक्तत्वात् हेतोः आभासता स्वीकृता।

**स्वावलोकनप्रश्नाः**

१).असिद्धः कति प्रकारः ?

२).आश्रयासिद्धः इत्यस्य अर्थः कः ?

३).विरुद्धस्य लक्षणं किम् ?

४).पक्षे हेत्वभावः कः ?

५).वह्निः अनुष्णः पदार्थत्वात्। अत्र पदार्थत्वरूपहेतौ दुष्टता कीदृशी ?

## ९.४. उपसंहारः

एवम् अत्र हेत्वाभासानां सामान्यं लक्षणं, हेत्वाभासानां नामतः निर्देशनम्,तेषां स्वरूपस्य स्वभावस्य च निरूपणम्, भेदानां च विवरणं च प्रदर्शितम् ।

## ९.५. अभ्यासः

अ).असिद्धस्य स्वरूपं निरूप्य,तस्य भेदान् सोदाहरणं प्रदर्शयत ?

इ).अनैकान्तिकस्य स्वरूपं निरूप्य,तस्य भेदान् सोदाहरणं प्रदर्शयत ?

* * *

**UNIT-X**

**शब्दप्रमाणम्**

## संरचना

१०.०. परिचयः

१०.१. लक्ष्याणि

१०.२. शब्दप्रमाणम्

  १०.२.१. शब्दः-निर्वचनम्

१०.३. वाक्यार्थज्ञानहेतवः

  १०.३.१. वाक्यार्थज्ञानहेतवः > आकाङ्क्षा

  १०.३.२. वाक्यार्थज्ञानहेतवः > योग्यता

  १०.३.३. वाक्यार्थज्ञानहेतवः > सन्निधिः

१०.४. वाक्यस्य प्रकाराः

१०.५. शाब्दज्ञानम्

१०.६. उपसंहारः

१०.७. अभ्यासः

### १०.०. परिचयः

प्राणिषु मानवः श्रेष्ठः। तस्य भगवद्दत्ता व्यक्ता वाक् विद्यते। सः च तया स्वाशयं परेषां नागरिकया पद्धत्या आविष्करोति। इतरे प्राणिनः तु न तथा। प्रतिदिनं लोकव्यवहारेषु श्रवणगोचराः शब्दाः, वृद्धानां वचनानि, उपाध्यायानां पाठप्रवचनानि, एवं पुस्तकानि, वार्तापत्रिकाः, रेडियो, टि.वी., एवमादिदृश्यश्रव्यसाधनैः बहुविधाः शब्दाः अवगम्यन्ते। भगवता दत्तायाः एव व्यक्तायाः वाचः 'भाषा' इति प्रसिद्धं नाम। तत्र च भाषा कथं प्रमाणिकी भवति ? सा च कथम् अर्थबोधं जनयति ? भाषा पुरुषं कथं कर्मसु प्रवर्तयति ? किमर्थं प्रवर्तयति ? कदाचित् भाषा कञ्चन पुरुषं कर्मणः निवर्तयति - किमर्थम् ? केषाञ्चन भाषा कथं सुलभतया अवगच्छति ? तत्र कारणं किम् ? केषाञ्चन भाषा कथं न अवगच्छति ? तत्रापि च कारणं किम् ? पदं पदशक्तिः, वाक्यं, वाक्यार्थबोधः तत्साधनानि इत्येवम् एते विषयाः ज्ञातव्याः भवन्ति। अयं च पाठ्यांशः तद्विषयोपस्थापनाय प्रवृत्तः ।

## १०.१. लक्ष्याणि

स्वाशयाविष्करणाय साधनीभूतायाः भाषायाः कतिपयान् मौलिकान् अंशान् जानीयात्। भाषायां शब्दः ,अर्थश्च इति द्वौ अंशौ प्रमुखौ भवतः। तयोः सम्बन्धश्च प्रधानः एव। शब्दः ,अर्थः, तयोः सम्बन्धश्च इत्येते त्रयः अंशाःअविनाभावेन वर्तन्ते। तेषु अन्यतमस्य विचारणे प्रवृत्ते अनिवार्यतया अन्ययोः विचारणम् प्रवृत्तम् इत्येव अवग न्तव्यं भवति। परं प्रधनतया कदाचित् अन्यतमप्रधानके विचारणे प्रवृत्ते,अन्यद्वयं अप्रधानं भवति। तावदेव। अर्थं सम्बन्धं च परित्यज्य केवलं शब्दस्य विचारणं सुतरां न प्रवर्तते एव। भाषायाः मौलिकानाम् शब्द-अर्थ- सम्बन्ध- अंशानाम् एवं स्थितौ, शब्दः नाम कः ? अर्थः कः ? कीदृशः शब्दः प्रमाणभूतः ? पदेन पदार्थोपस्थापकता कथम् ? इत्यवमात्मकानि भाषायाः मौलिकानि अंशानि अत्र विचार्यन्ते।एतत् पाठ्यांशस्य अध्ययनेन—

- भाषायाः मौलिकांशस्य शब्दस्य प्रामाणिकतां पठितुं प्रभवति।
- शब्दप्रमाणस्य स्वरूपं स्वभावं च ज्ञातुं समर्थो भवति।
- वाक्यस्य पदस्य च लक्षणानि लिखितुं प्रभवति।
- वाक्यार्थज्ञानहेतून् अवगन्तुं पारयति।

## १०.२. शब्दप्रमाणम्

परं प्रति हार्दिकभावप्रकटनार्थं साधनतया शब्दः, रङ्गं प्रविष्टः। सः प्राथमिकदशायां श्रोत्रमात्रग्राह्यः एव सन् ,श्रोतॄणां तत्क्षणकाले एव भावावगतये प्रभवति स्म। तत्सहायकतया यदा लिपिः समागता, तदा स्थैर्यम् उपगतः शब्दः दृश्य-श्रव्यकाव्यरूपाभ्यां देशकालपरिमितिम् अतिक्रम्य भावाभिव्यक्तये सर्वोत्तमं साधनं बभूव। सोऽयं शब्दः 'शब्दज्योतिरियं यदिलोके नावतरिष्यत् ,कृत्स्नमिदं जगत् त्रयं महान्धकारनिमग्नम् एव अभविष्यत्' इति प्रशंसापात्रं बभूव। अयम् एतादृशः शब्दः पदार्थतत्वज्ञानसाधनेषु चतुर्थं प्रमाणम्।

### १०.२.१. शब्दः-निर्वचनम्

(मूलम्)आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यन्तु पदसमूहः। शक्तं पदम्, अस्मात् शब्दात् अयम् अर्थः बोद्धव्यः इति ईश्वरसङ्केतः शक्तिः ।

(विवरणम्) इमानि वाक्यानि शब्दप्रमाणस्य, शब्दज्ञानस्य, आप्तस्य,वाक्यस्य,पदस्य, पदशक्तेः च स्वरूपं स्वभावं च निरूपयन्ति।आप्तस्य वाक्यम् आप्तवाक्यम्। आप्तस्य वाक्यम् इत्यत्र षष्ठी उच्चरितत्वरूपम् अर्थं बोधयति। आप्तश्च यथार्थवक्ता सत्यवादी विश्वासपात्रः। वस्तुस्थितिः यादृशी, तदनुगुणम् एव च यः ब्रवीति, सः

आप्तः। तादृशस्य आप्तस्य, वाक्यंउवचनम्,प्रमाणं भवति। वाक्यं तु पदसमूहः। अर्थबोधकानां 'गाम् आनय' इत्यादि पदानां समूहः एव, वाक्यम् इति उच्यते। 'शक्तं पदम्' इति नैयायिकानाम् अभिप्रायः। शक्तम् इत्यस्य शक्तिविशिष्टम् इत्यर्थः। तथा च अर्थबोधनसमर्थः वर्णः वर्णसमूहो वा पदं भवति। शक्तिश्च अर्थस्मृतेः अनुकूलः पद-पदार्थयोः सम्बन्धः। स च अस्मात् शब्दात् अयम् अर्थः बोद्धव्यः इति ईश्वरेच्छासङ्केतरूपः।'इदं पदम् एतदर्थबोधकं भवतु ,अयमर्थः एतत्पदबोध्यः भवतु'इति ईश्वरेच्छा एव पदशक्तिः। तादृशशक्तिसहितम् एव पदम् अर्थबोधाय कल्पते।

इदम् अत्र अवधेयम् ;सृष्टिकर्ता पदार्थान् सृष्ट्वा, तत्तदर्थबोधाय पदजालं तत्सङ्केतत्वेन कल्पयामास। तादृश-ईश्वसङ्केतः एव पदस्य अर्थस्य च सम्बन्धः। ईश्वरेच्छारूपः सः एव पदशक्तिः इति प्राचीनसम्प्रदायः। शिशूनां माता-पितृसम्मतानि नामानि, वैज्ञानिकैः नूत्नतया आविष्कृतानां रेडियो,रैल्, विमानम् एतदादि- सम्बद्धानां नाम्नां यथाकथञ्चित् परम्परासम्बन्धेन वा ईश्वरेच्छारूपा एका एव शक्तिरिति स्वीकारापेक्षया, माता-पित्रादीनां वैज्ञानिकानां च सङ्केतरूपा इच्छैव आधुनिकपदानां शक्तिरिति स्वीकारः समुचितः। तदनुसारञ्च इच्छैव पदशक्तिः - केषाञ्चित् पदानां ईश्वरेच्छा शक्तिः, अन्येषां च आधुनिकेच्छा - इति नवीनानाम् आशयः।

तथा च आप्तोच्चरितत्वे सति, वाक्यत्वं शब्दप्रमाणस्य लक्षणं भवति। पदज्ञानं करणम्। पदजन्य- पदार्थोपस्थितिः व्यापारः। वाक्यार्थज्ञानं शाब्दबोधः। तादृशशाब्दज्ञानसाधनस्य एव शब्दप्रमाणम् इति व्यवहारः। समन्वयः-दलसार्थक्यं च;'गाम् आनय' इत्यादिवाक्येषु आप्तोच्चरितत्वस्य, वाक्यत्वस्य च सत्वात् शब्दप्रमाणलक्षणस्य समन्वयः। वाक्यत्वमात्रोक्तौ अनाप्तोच्चरितवाक्ये अतिप्रसक्तिः। आप्तोच्चरितत्वमात्रोक्तौ 'ज-ब-ग-ड-द-श्'आदौ अतिप्रसक्तिः। अतः दलद्वयम् उपात्तम्।

## १०.३. वाक्यार्थज्ञानहेतवः

(मूलम्) 'आकांक्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः।

(विवरणम्)इदं वाक्यं वाक्यार्थज्ञानहेतून् नामतः निर्दिशति । यस्मात् कस्मात् अपि वाक्यात् अवश्यम् अर्थः ज्ञातव्यः भवति। स्पष्टतया, सुलभतया निर्बाधं वाक्यात् अर्थस्य ज्ञानजनने उपकारकाः केचन अंशाः सन्ति। तादृशाः उपकारक-अंशाः एव वाक्यार्थज्ञानहेतवः इति नाम्ना

शास्त्रकारैः विश्लेषिताः सन्ति। ते च आकाङ्क्षा- योग्यता - सन्निधिश्च भवन्ति। आकाङ्क्षा,योग्यता,सन्निधिः इति इमे वाक्ये तद्बोध्यानाम् अर्थानाम् अत्यावश्यकाः धर्माः। आकाङ्क्षादिविशिष्टानांपदानां समुदायः एव वाक्यं प्रमाणम्। ते च च समिष्ट्या वाक्यार्थज्ञाने हेतवः भवन्ति। आकाङ्क्षादीनां ज्ञानं शाब्दबोधे कारणं भवति। क्रमशः तेषां विवरणं च दीयते।

**१०.३.१. वाक्यार्थज्ञानहेतवः > आकाङ्क्षा**

(मूलम्) पदस्य पदान्तरव्यतिरेकप्रयुक्त- अन्वय-अननुभावकत्वम् आकाक्षा'

(विवरणम्)इदं वाक्यं वाक्यार्थज्ञानहेतुषु अन्यतमायाः आकाङ्क्षायाः स्वरूपं स्वभावं च निरूपयति। यत्र वाक्ये, यत् पदस्य अर्थः द्वितीयपदार्थबोधं विना अपूर्णः इव लक्ष्यते,तत्र वाक्ये तस्य पदस्य अपरपदं प्रति आकाङक्षा वर्तते इति अवगन्तव्यं भवति। येन द्वितीयेन पदेन विना , यस्य पदस्य बोधो न जायते, यस्य पदस्य अर्थः नैव अन्वितः अपि भवति, तं प्रति तस्य अपरपदस्य आकाङ्क्षा। अन्वेतुं अर्हस्य पदान्तरस्य अपेक्षा एव आकाङ्क्षा इति यावत्। तस्य अयम् अर्थः-- आकाङ्क्षा नाम किम्, केन, कुतः, इत्यादिजिज्ञासा। पदबोध्याः अर्थाः तादृश-आकङ्क्षापूरकाः भवेयुः।किञ्चित् पदं, परतः पूर्वतः वा, यादृशपदाभावे अभिमतम् अर्थं बोधयितुं न प्रभवति,तयोः पदयोः परस्परम् आकाङ्क्षा इति व्यतिरेकमुखेन आकाङ्क्षायाः स्वरूपं प्रदर्शितम्। पिधेहि द्वारम् । अत्र पिधेहि इति पदेन द्वारम् इत्यस्य अध्याहारः, कुत्रचित् च द्वारम् इति पदेन क्रियापदस्य पिधेहि इत्यस्य च अध्याहारः। यथा वा गौ-वाहीकः इत्यत्र अस्तीति पदस्य अध्याहारः प्रसिद्धम् एव। एवं क्वचित्तु शाब्दबोधे अध्याहारः कल्प्यते। सः अपि आकाङ्क्षावशाद् एव इति अवगन्तव्यम्।एवम् कारकपदं विना क्रियापदं, क्रियापदं विना कारकपदं वा बोधं न जनयतः । अतः तेन सर्वत्र तयोः आकाङ्क्षा।

उदाहरणम्; गाम् आनय इति वाक्ये आनय इत्युक्ते किम् इत्याकाङ्क्षा जायते। तत् प्रशमाय गाम् इति पदम् आवश्यकं भवति। एवम् एव वाक्ये विद्यमानानां पदानां सर्वेषां परस्परम् ईदृशी आकाङ्क्षा अत्यावश्यकी। न केवलं पदानां, अपि तु प्रकृति-प्रत्यययोः अपि आकाङ्क्षा अत्यावश्यकी भवति।

**१०.३.२. वाक्यार्थज्ञानहेतवः > योग्यता**

(मूलम्)अर्थाबाधो योग्यता

(विवरणम्)इदं वाक्यं वाक्यार्थज्ञानहेतुषु अन्यतमायाः योग्यतायाः स्वरूपं स्वभावं च निरूपयति।एकपदार्थे अपरपदार्थस्य सम्बन्धः एव योग्यता भवति। वाक्ये

पदानाम् अर्थाः परस्परम् अन्वययोग्याः भवेयुः। तथा अन्वययोग्यत्वाभावः बाधः।तादृशबाधाभावः = अन्वययोग्यता, एव योग्यता इति उच्यते। येषाम् अर्थाः परस्परम् अन्वययोग्याः भवन्ति, तादृशानि एव पदानि वाक्ये भवेयुः। यथा पूर्ववाक्ये गोः आनयनक्रियान्वययोग्यता वर्तते। तस्य अयम् अर्थः। अन्वयस्य अनुपपत्तेः वा तात्पर्यानुपपत्तेः वा अभावः योग्यता । यथा– घटम् आनय इत्यत्र आनय इति क्रियापदार्थः घटम् इति कर्मार्थकद्वितीयान्तपदेन सह अन्वययोग्यतां भजति। एवम् एव कर्मार्थकद्वितीयान्तं घटम् इति पदम् आनयनरूपक्रियार्थेन अन्वयम् एति। एवं अन्वय अनुपपत्तेः वा तात्पर्यानुपपतत्तेः वा अवकाशम् अकल्पयित्वा परस्परम् अन्वयं प्राप्य यः अर्थः समागतः सः अबाधितार्थः भवति । तादृश-अबाधित-अर्थस्य सम्बन्धः एव योग्यता भवति।

**१०.३.३. वाक्यार्थज्ञानहेतवः > सन्निधिः**

(मूलम्)पदानाम् अविलम्बेन उच्चारणं सन्निधिः।

(विवरणम्) इदं वाक्यं वाक्यार्थज्ञानहेतुषु अन्यतमायाः सन्निधेः स्वरूपं स्वभावं च निरूपयति। पदानाम् उच्चारणे अनावश्यकः विलम्बः यथा न भवेत्, तथा वाक्ये पदानि भवेयुः। तथा अविलम्बेन पदानाम् उच्चारणं सन्निधिः। तेन प्रहरे प्रहरे असहोच्चारितानि 'घटम् आनय 'इत्यादिवाक्यानि न शाब्दबोधार्हाणि । प्रहरे प्रहरे,तदा तदा विलम्बेन उच्चरितत्वात् । एवम् एव ' गिरिर्भुक्तम् अग्निमान् देवदत्तेन' इति न शाब्दबोधः। व्यवधानेन उच्चरितत्वात् एवम्, येषां पदानाम् अर्थाः, परस्परम् आकङ्क्षिताः अन्वययोग्याः, यानि च पदानि, स्वयम् अविलम्बोच्चरितानि, तादृशपदसमूहः एव वाक्यम् इति सिध्यति।

अत्र इदम् अवधेयम्; आकाङ्क्षादिज्ञानम् इव तात्पर्यज्ञानम् अपि नानार्थकपदेभ्यः शाब्दबोधे कारणं भवति। वक्तुः इच्छा उअभिप्रायः एव तात्पर्यम्। तदनुसारेणैव नानार्थकपदेभ्यःशाब्दबोधः प्रामाणिकः। यथा भोजनवेलायां सैन्धवम् आनय इत्युक्ते भोक्तुः अभिप्रायानुसारं सैन्धवशब्दस्य लवणार्थः एव स्वीकीर्यः। न तु अश्वः। एवम् आकाङ्क्षादिज्ञानम् इव तात्पर्यज्ञानम् अपि वाक्यार्थज्ञानं प्रति कारणं भवतीति ज्ञेयम्।

क्रमेण उदाहरणानि

(मूलम्)आकांक्षादिरहितं वाक्यं न प्रमाणम् यथा, गौरश्वः पुरुषो हस्तीति वाक्यं न प्रमाणम्, आकांक्षाविरहात्। अग्निना सिञ्चतीति वाक्यं न प्रमाणम्, योग्यताविरहात्।

प्रहरे प्रहरे सहोच्चरितानि गामानयेत्यादिपदानि न प्रमाणम्, सान्निध्याभावात्।

(विवरणम्) इमानि वाक्यानि आकाङ्क्षा,योग्यता,सन्निधीनाम् उदाहरणानि प्रदर्शयन्ति। यानि पदानि आकाङ्क्षादिशून्यानि,तेषां समूहः प्रमाणवाक्यं न भवति। यथा ' गौः, अश्वः, पुरुषः , हस्ती ' इति पदसमूहः प्रमाणवाक्यं न भवति। तत्र पदबोध्यानाम् अर्थानाम् आकाङ्क्षा नास्ति। एवम् ' अग्निना सिञ्चति' इति पदसमूहः अपि प्रमाणवाक्यं न भवति। तत्र अग्नेः सेककरणत्वम् असङ्गतम् इति न तयोः अर्थयोः अन्वयः। यदा ' गाम् आनय ' इत्यादीनि पदानि विलम्बेन उच्चरितानि भवन्ति, तदा तेषां समूहः अपि न प्रमाणम्। सहोच्चरितत्वाभावेन सान्निध्यं तत्र नास्ति।

वाक्यात् वाक्यार्थबोधे प्रथमं श्रवणादिना पदज्ञानम्-करणम्, ततः तस्य पदस्य कः अर्थः ? कस्मिन् अर्थे शक्तिः ? इति तादृशशक्तिज्ञानम्, अनन्तरं च तत्तत्पदार्थस्य स्मरणम् = उपस्थितिः, जायते। अयं च व्यापारः। तथा उपस्थितानाम् अर्थानाम् आकाङ्क्षादिवशात् कर्तृत्व-कर्मत्वादिरूपेण च समन्वयः भवति। एवं वाक्यात् पूर्ण- रूपेण वाक्यार्थबोधः भवति। पदज्ञानम्, शक्तिज्ञानम्, ततः पदार्थस्मरणम्, अनन्तरं च वाक्यार्थबोधः इति क्रमः।

## १०.४. वाक्यस्य द्वैविध्यम्

(मूलम्) वाक्यं द्विविधम्,वैदिकं लौकिकञ्चेति। वैदिकम् ईश्वरोक्तत्वात् सर्वम् अप्रमाणम्। लौकिकन्तु आप्तवाक्यं प्रमाणम्। अन्यत् अप्रमाणम्।

(विवरणम्)इमानि वाक्यानि वाक्यस्य प्रकारद्वयं प्रदर्शयन्ति।वैदिकवाक्यम् इति, लौकिकवाक्यम् इति च वाक्यं द्विविधं वर्तते। तत्र वैदिकवाक्यं वेदस्वरूपं परमेश्वरवचनात्मकम् इति सर्वम् अपि प्रमाणभूतम् एव।लौकिकवाक्येषु यथार्थवक्तुः आप्तस्यैव वचनं प्रमाणं भवति। अन्यत्तु अज्ञानाम्, स्वयं भ्रान्तानाम्,सम्यक् ज्ञाने अपि परवञ्चकानां वचनानि प्रमाणानि न भवन्ति। तेभ्यः यथार्थज्ञानं न जायते इति भावः ।

## १०.५.शब्दप्रमाणस्य निरूपणसमापनम्

(मूलम्)वाक्यर्थज्ञानं शाब्दज्ञानम्। तत्करणं शब्दः। एवं यथार्थानुभवः निरूपितः।

(विवरणम्)आकाङ्क्षा- योग्यता- सन्निधि-वशात् वैदिकवाक्यतः वा, लैकिकवाक्यतः वा,यः अर्थबोधः जायते तदेव शाब्दज्ञानं भवति। तादृशशाब्दज्ञानसाधनस्य एव शब्दप्रमाणम् इति व्यवहारः। वाक्यात् जातम् पूर्णवाक्यार्थज्ञानम् एव शाब्दज्ञानम्उ

शाब्दबोधः इति कथ्यते। तादृशप्रमात्मकशाब्दबोधं प्रति असाधारणकारणं शब्दप्रमाणं भवति।

**स्वावलोकनप्रश्नाः**

१).शब्दः कः ?

२)वाक्यं च किम् ?

३)पदं च नाम किम् ?

४).आकाङ्क्षा- योग्यता- सन्निधयः वाक्यार्थज्ञानहेतवः किमर्थं जाताः ?

५).वाक्यस्य द्वैविध्यं कीदृशम् ?

**१०.६. उपसंहारः**

एवम् अत्र शब्दस्य ,वाक्यस्य शाब्दज्ञानस्य च शब्दप्रमाणस्य लक्षणानि कथितानि। वाक्यार्थज्ञानहेतूनां आकाङ्क्षा- योग्यता- सन्निधीनां स्वभावश्च वर्णितः। एवं क्वचित्तु शाब्दबोधे अध्याहारः कल्प्यते। सः अपि आकाङ्क्षावशाद् एव इति अवगन्तव्यम्। वाक्यस्य प्रकाराश्च सूचिताः।

**१०.७. अभ्यासः**

१).शब्दप्रमाणस्य लक्षणं किम् ? तत्र अन्तर्भूता सामग्री कीदृशी ?

२).वाक्यार्थज्ञानहेतवः के ? वाक्यार्थज्ञानजनने तेषां हेतुत्वं कीदृशम् ?

* * *